त्वात्किंबोधकत्वावच्छेदेनशाब्दविषयकत्वं प्रतिज्ञायते उतयत्किंचित्त्वमिति पक्षद्वयावच्छेदकत्वावच्छे
देनतत्त्वं किंवाशाब्दत्वसामानाधिकरण्येन । नाद्यः । घटादिप्रत्यक्षस्याव्यवहितप्राक्काले घटादि
पदोपस्थितेरनैयत्येन ताहशप्रत्यक्षस्य घटादिपदविषयकत्वासंभवात् । एवं घटाघटानुमि
तावपि तत्त्वादिनं नसंभवति । व्यापकतयानदवच्छेदकतया व्याप्तेर्यहेतदभावात् । तदनंतरं घ
टपदंस्मारस्मात् कनोमि घटपदमनुमिनोमीत्यनुव्यवसायाभावाच्च । न द्वितीयः । घटपदज्ञानज
न्योपस्थितेस्तत्वाच्कयदेऽभेदेनतस्यशाब्दविषयत्वासंभवात् । पदज्ञानस्यसंवन्धिज्ञानवि
धयार्थस्मानकत्वेनहस्तिपकदर्शनजन्यहस्त्युपस्थितौ हस्तिपकस्येव जन्यजन्यार्थोपस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्य॰द॰ तावुद्बोधकतावच्छेदकपदस्य विषयत्वासंभवाच्च· घटो न घट इति सार्वजनीनप्रतीत्या शब्दार्थयोः
१३९ स्तादात्म्येमात्राभावेन नार्थाकारवृत्तेः शब्दाकारतासंभवोपि। घटशाब्दवोवानन्तरं घटपदं शाब्द-
यामीति प्रतीतेः सार्वजनीनत्वेक्षणविलम्बसहिष्णुतासंभवेदपि। नन्वतस्तथात्वमिति नाकि-
ञ्चिदेतत्। अपि च भिन्नविषयेनुमितिसामग्र्या बलवत्वाद्घटेनादस्मानुमितिसामग्रीकाले
केवलघटत्वविशिष्टविषयीकाशाब्दधीर्जायतामितीच्छाबलाद्घटशाब्दधीस्तत्र वयं ब्रूतम्
नं इत्युपपदमेव घटशाब्देच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्योः प्रतिबन्धिका रामः
याः सत्त्वात्। नापि नैतयोः सिद्धसाधनात्। विषुमुच्चारयेत्यादौ विह्वादिपदानां लक्षणया १३९

139

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाब्दविषयतायाः परैरप्यनुमानात्। उक्तभाष्यादपि कश्चिच्छाब्दबोधे शब्दो विषय इत्यर्थस्यैवलाभा
त्।। सति तात्पर्ये क्वचिदन्यत्रापि विशेष्यांशेनन्दामाभ्युपगमेक्षतिविरहाच्च।। अतएव नलादीनां
विशिष्यतत्तद्रूपेणानुपस्थितत्वेपि नलपदवाच्यः कश्चिदासीदिति सामान्यशाब्दिकेयहातत्पद
वाच्यत्वेन तेषां बोधः प्राचीनसम्मतउपपद्यते अभेदे शाब्दभानंतु परैर्न्निवस्यकृतभाष्यसम्मतम
तेनैव। अतएवतस्माद्विलक्तस्यैवबोधः। हरिवचनानितु प्रणवब्रह्मणोरभेदोपासनपराणि निश्च
यबोधकानीति निनतैर्व्यावहारिकार्यस्य सिद्धिरस्तस्माच्छाब्दबोधमात्रस्य शाब्दविषयकत्वंनापि
च।। रसहमधिकमस्मेव्यक्तीभविष्यतीति। अन्मभैति। भेदग्रहस्यैवाभ्युपगमइत्यर्थः।प्रत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. स॰परश्चेतिनियमशास्त्राणांनिषेधसुखेनापिप्रवृत्तेः प्रत्ययपरैवप्रकृतिः प्रयोक्तव्यानकेवलेत्यस्मिंप्रा
१५० यकस्यापदंनप्रयुञ्जीतेतिनिषेधविधेः प्रत्ययप्रयोग्यस्यप्रत्ययंविनाप्रयोगातिक्रमणादसाधुता
पत्तेरित्यर्थः अस्मिन्मतेतुतस्यप्रत्यययोग्यत्वाभावान्निषेधविषयतायाएवाभावात्तदतिक्रमण
प्रसक्तेरसाधुत्वादेवचतत्रावादेशादिरिय अन्यथाभाषाशब्देष्विवतदप्रवृत्तिःस्यादितिभावः॥ ॥
इतिश्रीभूषणसारदर्पणेनामार्थनिरूपणम्॥ ॥अथप्रसक्तौवनिर्वाह्यनामसमुदायात्मकसमा
सेऽतिरिक्ताशक्तिरितिमतंदूषयिष्यन्प्रसङ्गात्समासार्थंनिरूपयितुमादौतद्विभागप्रदर्शनमि रामः
त्याशयेनाह समासानिति। समासत्वंचशक्तिसम्बन्धेनसमानामपदवत्त्वम्। एकार्थीभावापन्नपद १५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराय विशेषो वा। एकार्थीभावे मानं च· किं पुनः सामर्थ्यं नाम पृथगर्थानामेकार्थीभावः सामर्थ्यं वच
नम् क्व पुनः पृथगर्थानि· एकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति·। समासे पुनरेका॰
र्थानि राजपुरुष इति समर्थसूत्रस्थं भाष्यम्· तन्मूलिका वक्ष्यमाणा युक्तयश्च· तत्रैकार्थत्वे॰
मेकोपस्थितिविषयार्थकत्वं न त्वेकार्थशक्तत्वं घटादिपदानामपि घटघटत्वतत्संबन्धरूपनाना॰
र्थशक्तत्वेनैकार्थतानुपपत्तेः। नानोपस्थितिविषयार्थकत्वम्· पृथगर्थकत्वम्। यथा निःस्तद्
वृत्त्या ज्ञायमाना यत्पदार्थोपस्थितिरेव विशेष्यविशेषणभावापन्नविशिष्टार्थमवगाहते·।
सं तत्पदार्थे समर्थमिति भाष्यात्। राजपुरुषादिपदं राजसंबन्धवत्पुरुषादेः शक्तमित्याकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.म. कः शक्तियहः ततश्च प्राप्ताप्राप्त विवेकेन विशिष्टशक्तिः पश्चाद्यर्थपर्य्यवस्यति अतएव न तत्र रा
१४१ जादेः सुन्दरादि पदार्थान्वयः एकदेशत्वात् देवदत्तस्य गुरुकुलमित्यादौ गमकत्वात्तु समासः
इति वक्ष्यते। जहत्स्वार्था वृत्तिः पदानामानर्थक्यमिति तु न सम्यक्। कुम्हावाकुरित्यादावा
त्याघनायतेः भूतपूर्वगत्याश्रयणेनानुसन्त्यां गतावुक्तम्। तदुक्तम्। जहत्स्वार्था तु तत्रैव यत्र
रूढिर्विरोधिनी। अवयवार्थविरक्तोपत्र समुदायार्थस्य तत्रैव सा। यथा कुशलसर्पादावि
तितदर्थः अयमेव पक्षः समासे खल्वभिन्नैव शक्तिः पङ्कः। जहदिति वदताम्। लक्षणा रामः
सम्मतः तथा सति पङ्कजशब्दो परियोगारूढमभ्युपगमे न तदर्थान्तोयन्यासम्सार्थकत्वात् १४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जरुत्त्वार्थोऽष्टनिर्यरीति पक्षस्य तत्संभवत्वेऽस्त्व भवेत्तस्य पक्षतया परैस्तत्र तदनभ्युपगमेन तदुपन्या
सानुपपत्तेः स्पष्टत्वात्· अधिकमग्रे वक्ष्यते। इतिगतिमतोदात्तवतीति। उपलक्षणमिदं सहत्तु
पेतिभ्योऽविभागस्यापि। अनुव्यचलदित्युदात्तो व्यचलदित्यनेन वेप्याचलदित्यनेनत्युगपत्तास
ः। अन्वितिसुबन्तेनव्यचलदिति समुदायस्य समर्थत्वात्तस्यां समाससंज्ञायां शाकलप्रतिषे
धाद्ग्रहणाद्देशः समासोऽन्तोदात्तत्वं च भवति तिङः कत्वस्योक्तत्वात् अस्त्यर्थव्यापारस्य संख्यान
यायोग्यत्वाद्यानतत्तः सुबन्त्यन्तिः समपपरिपालकौत्सर्गिकैकवचनस्य तुनावस्तरश्च न्दसि·
तदायादनासंभवादितिभावः। अन्यथेति। सुबन्यन्तेः प्राक्समाससंज्ञाभ्युपगम इत्यर्थः। अन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल०द० लोपेत्यस्यापदत्वादित्यादि ॥ यच्च सुप्यपदमिति सूत्रे भाष्ये ॥ नयोर्योगयोर्निवृत्तं सुप्सुपो नु
१४२ क्तम् । तथा सुपदमिति महासंज्ञाबलादेव पूर्वपदस्य सुबन्तत्वस्यानन्तरमेव समासः इति भावः ॥
प्राक्समुत्पत्तेरित्येकदेशप्रदर्शनं प्रयोजनमित्येण परिभाषाः प्रयोजनमपि दर्शितम् । सुबुत्प
त्तेः पश्चात्समासे हि स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमिकस्य स्यात्तरङ्गबहिरङ्गभावमू
लकस्य कुत्सित इति सूत्रभाष्यसंमतत्वे नान्तरङ्गत्वात्सुबुत्पत्तेः पूर्वं टाप्य नदन्तत्वात्क्रीता
त्करणपूर्वादिति ङीषो ऽनुपपत्तेरिति दिक् । भाष्ये तु स्यादित इति । तत्र हि प्रत्येकं समास राम:
संज्ञावारणं फलं महत्संज्ञाप्रयोजनं समुदाये वा कथं पारस्मा प्तिन्यायेन परिहृत्यन्ता हि सि १४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊपत्सहयग्रहणं करोति तस्यैतत्प्रयोजनं योगाङ्गं यथा विज्ञायेत। सति योगाङ्गे योगविभागः करि
ष्यते सह सुप्समस्यते केन समर्थेनानुव्यचलदनुप्राविशत्॥ ततः सुपा त्व सह सुप्समस्यते॰ अधि॰
कारश्चलक्षणं च। यस्य च समासः स्यात् तल्लक्षणं नास्तितस्येदं लक्षणं भवतीत्युक्तम्। तवाधि
कारप्रयोजनं देवदत्तः पचतीत्यादौ सामानाधिकरण्ये न समाससंज्ञावारणं बोध्यम्। भेद॰
मिति। याष्ट्रिय रूपमित्यर्थः प्राचीनेत्यादि यद्यप्यव्ययं विभक्तीति सूत्रे भाष्ये समुदायस्य संस्का
र्यत्वेन प्राधान्यात्तस्यैव सम्बुध्यादयो विशेषणानीति समुदायात्सम्बुध्यादीनां गम्यमानत्व।
द्वाथव्ययीभावापत्तिरित्यभिप्रायेण एकस्मान्न भवति समप्रः सम्बुद्ध इति। नैष दोष इ॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰र॰ इकश्चित्समासपूर्वपदार्थप्रधाइत्यादिसमासलक्षणमुक्तानात्रपूर्वपदार्थप्राधान्यम् गम्यतइति
१४३ समाहितंतथापिनेमेसमासार्थानिर्दिश्यमोइत्यादिनायत्रान्तरोपन्यासेनोक्तलक्षणेष्वतिभ
रस्तवनादरोऽवश्यंभावः लक्षणस्येति॰ तत्त्वंचासाधारणधर्मवत्त्वम्। धर्मेऽसाधारण्यंचतदितरा
वृत्तित्वेसतिसकलतद्वृत्तित्वम्॰ यथासास्नादिमत्त्वम्। गोर्लक्षणम्। तच्चरूरुःवत्वगगनस्व
स्वरूपादीनांलक्षणवारणायसत्यन्तम्इतित्वसाकल्यानांनिवेशः। तदुक्तम्॰ लक्षणेनान्ये
वपरानिदेयानिर्देशव्याप्त्यतिव्याप्त्यसंभवावाप्यतेइति। तत्रालक्ष्येलक्षणासत्त्वमव्याप्तिः राम॰
: अलक्ष्येतत्सत्त्वमतिव्याप्तिः। लक्षणयांत्रावर्तनमसंभवः उदाहरणानिवक्ष्यन्ते। अ॰ १४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साधारणधर्मवत्ताज्ञानात्तत्कर्माश्रयइतरभेदानुमितिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति ।। प्रा
योवाद इति प्रायमस्तेषामुपलभ्यमानत्वेपि जन्मेषामपि केषांचिदुपलब्धेरित्यर्थस्तत्रैवाविक्ष
ष्यति भूतपूर्वइत्यादि । एषां वक्ष्यमाणयत्किंचि ।। लक्षणाक्रान्तत्वेपि तत्तदधिकारिपरत्वा
नुशिष्टत्वादसङ्ग्रहो बोध्यः समासाभिधारि यत्तत्वानुविधृत्वाद्विभागे तदसङ्ग्रहे इष्टापत्तेः
योगात् ।। पूर्वपदार्थस्या हि प्राधान्यं च समासघटकपदार्थप्रकारता निरूपितमुख्यविशेष्य
त्वम् । तथा च पूर्वपदार्थविशेष्यकबोधजनकत्वमव्ययीभावत्वमित्यर्थः । एवमपि ।। उ
पकुम्भमित्यत्र कुम्भनिरूपितसामीप्यस्य विशेष्यतया बोधाद्राजपुरुष इत्यादौ राजसं

ल.द. वन्विपुरुषस्योत्तरपदार्थस्य पीताम्बरः इत्यत्र पीताभिन्नाम्बरसंबन्धिनोऽन्यपदार्थस्य धवखदि
१४४ रः इत्यत्र साहित्यापन्नधवखदिरयोः पूर्वोत्तरपदार्थयो विशेष्यतया भानाद्यथायथं लक्षण॰
समन्वयः व्यभिचारादिति॰ यद्यपि व्यभिचारेनेति व्याप्तिरेव तथापि प्रकृते दोषत्वेन व्यभिचा
रपदेनोभयं लक्ष्यते [illegible]स्यात्मे व्याप्तिरिति तमेवाभिनयेन प्रदर्शयति तथाहि त्यादि पूर्व॰ १५५
पदार्थेति॰ इत्यमतादिपदार्थेत्यर्थः स्वमस्तोपि॰ अव्ययीभावलक्षणेति॰ पूर्वपदार्थविशे॰
ष्यकबोधजनकत्वरूपतः लक्षणासत्वरूपेत्यर्थः अन्यपदार्थप्राधान्यादिति॰। समा राम:
सघटकसप्तम्यर्थाधिकरणविशेष्यकबोधजनकत्वादलक्ष्यलक्षणसत्वरूपेत्यर्थः १४४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पङ्कुर्वी हीति। न ह्यक्षराणोन्यर्थः। स्वमतेपि न तु तर्हि कान्यव्ययीभावादिलक्षणान्यनर्थकान्यत आह। सिद्धा
न्तेविति लक्ष्यतावच्छेदकं तु शक्तिसंबन्धेनाव्ययीभावादिपदवत्त्वम्। अतस्सर्वादीनां लक्ष्यता
वच्छेदकानाक्रान्तत्वादसंग्रहो न दोषायेति भावः। जहत्स्वार्थवृत्तिपक्षमवलम्ब्य मूलमवतारय
ति। असमस्तवशेषामिति। अस्य जहत्स्वार्थवृत्तिपक्षे इत्यादिः। राज्ञाम्॰ लक्षणानाम्। असंभ
वो लक्ष्यमात्राभाववर्त्तनमित्यर्थः। तत्पक्षे पूर्वोक्त पदयोरनर्थकत्वेन कुत्रापि वृत्तेरभावेन तदर्थघटिता॰
नां तेषामुपकुम्भादावप्यभावादिति भावः। मूले भो॰ नैति शाब्दनित्यतावादिमते यथाश्रुतमेत
द्वस्याप्यव्ययीभावादावसम्भवादाह सोपीति। व्यवहारोपीत्यर्थः। अन्यधर्मस्य कथमन्यवो॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰ल॰ धकत्वमत आशयं प्रकाशयति सारेस्त्यागवयेत्यादि। नद्वेवेति। रेखागवयादिवदेवेत्यर्थः। यथाग
१४५ वयादाववियमानमपि रेखागवयादिनिष्ठं रेखाकृतिपुञ्जं गवयादिपदवैसादृश्यमूलकाभेदा
ध्यवसायाद्गवयादिबोधकं तथा समासे विद्यमानमपि विग्रहवाक्यनिष्ठपूर्वपदार्थादिप्राधान्या
संसादृश्यादव्ययीभावादिबोधकमित्यर्थः। अजहत्स्वार्थवृत्तिपक्षे तु पूर्वपदार्थप्राधान्यान्यव्यवहा
रो नतु तु यथा हस्त्याशयेन मूलमवतारयति। नन्विति। अनेकधोक्ते स्थितिः अथतेषां वक्तां किं 145
जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्थेत्यादिनेत्यादिः। एकार्थीभावकृतो। व्यपेक्षानुरुद्धार्थपर्य्य रामः
वसायिनां पदानामाकारः। क्षाववज्ञान्तरस्यार्थान्वयबोधकत्वम्। पर्य्यवसानं लभ्यत इति। समर्थ १४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्रभाष्यपर्य्यालोचनयानुरूपकार्थाभावः सामर्थ्यमितिपक्षस्यवृत्तिद्वयस्वीकारो बोध्यभेदेन।
किन्तु अथयेह तिं वर्त्तयति किन्त आहु रित्यादिभाष्यात्तथा देवेयं न. नि निर्णीयन्ते तिम तत् समवलं-
म्बायं विचार इति लभ्यते। समासस्थले कैयटेन प्रकारेण समवशक्तिता अवच्छेदः। दृष्टान्तमाह घटा-
दिपदानामिवेति। आनुपूर्व्वं त्वघटकत्वाभावविशिष्टानुपूर्व्यास्व शक्ततावच्छेदकत्वेन घटभा-
दिपदान्तर्गतघटत्वादिसमवेतानुपूर्व्याः शक्ततावच्छेदकत्ववत्समासान्तर्गतराजानुपूर्व्याः त्व-
क्ततावच्छेदकत्वासम्भवादित्यर्थः। अन्यथा रामादिपदाद्घ्यादीनामवयवार्थानामपि पदार्थो-
पस्थितिशाब्दबोधयोरापत्तिरवान्तरस्त्वनुपस्थितिर्धनं वनमित्यादौ जन्त्वापत्तेश्च। वाक्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ न्तुपदान्यर्थवन्त्येव राजसंबन्धी पुरुष इत्याद्यर्थे राज्ञः पुरुषः अश्वो राज्ञ इत्यादिविशिष्टानुपूर्वीः
१४६ ष्वयस्य शक्ततावच्छेदकत्वेपि प्रत्येकपदवृत्तिं विनावाक्यार्थबोधादर्शनादिति भावः। नचैवं त
त्कल्पे विशिष्टरूपोपादानं विहितत्वानापत्या महाबाहुरुपत्या इत्यादौ दोषः। अनर्थक
त्वादेवमर्थवत्त्वनिबन्धनप्रातिपदिकत्वाभावे तन्नलोपाद्यनापत्तिश्चेति वाच्यं वृत्तिप्राप्तावि
अर्थवत्त्वमारोप्य तत्तत्कार्यस्योपपादनात्। इदं च प्रत्ययोत्तरपदयोश्चेति सूत्रे भाष्ये 146
स्पष्टम्। नचैवं वाप्यश्व इत्यादौ नदोषो जहत्स्वार्थायां वृत्तौ वानर्थकत्वादीतीदृतो चेत्सत्यमर्थे रामः
इति सूत्रस्य भाष्यविरोधो दुःपरिहरः आरोपितार्थवत्त्वस्य समासान्तर्गतपदेषु स्वीकारादि १४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिवाच्यम्। अर्थग्रहणसामर्थ्येनारोपितार्थस्य तद्ग्रहणादि। त्याश्रयात्. एकस्यैव पदस्य वृत्तितद्वा
क्यत्वयोरर्थवत्त्वानर्थवत्त्वे च प्रयोगानुरोधेन स्वकारणम्. योगरूढिस्थले तु योगार्थाभावे राजशक्त्यभ्यु
पगमान्न तद्दुष्टेऽपि। न चात्र पक्षे राजादिपदैः सर्वथा स्वार्थत्यागे तद्दानं न स्यात्तस्याह्येकपदा
र्थोपरपदार्थविशेषणमिति व्यवहार इति वाच्यम्। विशिष्टेनैव राज्ञादि विशिष्टपुरुषस्योपस्था
पनेनाद्यदोषाभावात्। अथवान्वयाद्विशेषणं भवतीति भाष्येण द्वितीयस्यापि समासानात्।
निष्कीर्णोऽस्त्विति मनःसु ज्ञामोदान्वयमात्रेण यथा चम्पकपट व्यवहारस्तथा सदृशार्थान्वय
मात्रेणैव राजादिपदार्थः पुरुषविशेषणमिति व्यवहार इति तदर्थ इति जहत्स्वार्थवृत्तिपक्षोपपत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· परान्वेवं हि दृश्यते लोके पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति तद्यथा तक्षा राजकर्मणि प्र
१४१ वर्तमानः स्वं कर्म जहाति एवं युक्तं पदार्थोऽपि पुरुषार्थे वर्तमानः स्वमर्थं जह्यादिति भाष्यादेतत्कल्पे
ऽपि पूर्वपदार्थस्य अजहत्स्वार्थत्वं लभ्यत इति। अन्यथेति। वृत्तौ व्ययेभावे एकार्थीभावसामर्थ्याभ्युपगमे इत्यर्थ
: इत्यस्यापि व्याप्तिना राजपुरुषो भार्यायाश्चेन्ये कत्रव्यमिति विषयता शालिवो धजनकस्य
समुच्चयः। आपत्तेरिति। अस्मन्मते तु पदार्थैकदेशत्वार्थेऽपि शक्त्यभ्युपगमेन राजकीयभिन्नत्वे 147
नावगते विशेषणान्तराभोगाच्च न समेति भावः। अजहत्स्वार्थवृत्तिपक्षस्य भाष्यानुसारेणान्य रामः
थैवोपपादनाच्च पक्षां सामर्थ्यमेक इत्येकीयमताश्रिता ननु स्तत्याह। अयमभिप्राय इति।ना १४१

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिरिक्ते ति। एकत्र प्रत्येकात्मत्यातिरिक्तेत्यर्थः। कल्पकाभावादिति कल्पकस्यान्यथानुपपत्तिरूपप्रमाणस्य
स्याभावादित्यर्थः। ननु विशिष्टार्थानुपपत्तिरेव तत्कल्पिका भविष्यतीत्यत आह। क्लृप्तेत्यादौ ति। तत्
त्कल्पतस्य विशिष्टशक्तिकल्पनस्येत्यर्थः। ननु स्यादेवं यद्येतन्मते प्रत्येकपदशक्तिकल्पनासैव ने
ति कागौरवावसर इत्याह। क्लृप्तशक्तेति। इति शाब्दकाले क्लृप्तायाः प्रत्येकपदशक्तिस्तत्परित्याग
इत्यर्थः। कालभेदेनाप्येकस्यैव शब्दस्यार्थवत्त्वानर्थकत्वयोर्विरुद्धत्वात्। नलोपादिकमपि स्यादनु
पपत्त्या बहुतिरस्कारायां तत्रवोकारस्यैरोचित्तत्वादितिभावः। ननु प्रत्येकशक्त्यानंतपदार्थोप
स्थितावपि विशिष्टशक्त्यनङ्गीकारेण तदनुपस्थित्या कथं तस्य शाब्दविषयतेत्यत आह। तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰ल॰ वेति॰ आकाङ्क्षेति॰ आदिपदाद्योग्यतादिपरिग्रहः। राजपदाव्यवहितपुरुषपदात्वादिरूपाका
१४८ ङ्क्षादिकारणसमवधानादित्यर्थः। तथा च प्रत्येकपदार्थोपस्थितिसहकृताकाङ्क्षादिभिरव॰
विशिष्टबोधसंभवे न तत्पूर्वं विशिष्टोपस्थित्यपेक्षा यस्येत्याकल्पनेनेति भावः। अयमेवेति
अयमर्थमभिप्राय इत्यादिनोक्तस्येत्यर्थः भाष्यकैरप्यस्य परस्परव्यपेक्षां सामर्थ्यमेके इत्या
दिने विशेषः उक्तापत्तिमुद्धरति॰ न चात्रेति॰ अन्यथापत्तिरिति यथाश्रुताभिप्रायेण। संब
न्धिलक्षणाया आपत्तेरभावस्य वक्ष्यमाणत्वात्॰ प्रसङ्गादिति स्फुटीकृतिकालाव किन्तोपेल॰ रा॰सः
तानर्हतावच्छेदकधर्मवत्त्वात्मिकेत्यर्थः। शक्तिभेदमिति घटे स्तमासादि इनेर्भेदं लेदसे मर्गा १४८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिरूपार्थकृतमित्यर्थः तदुक्तं भाष्ये । सामर्थ्यं नाम भेदः संसर्गो वा । अपरस्त्वाह भेदसंसर्गसामर्थ्यम् इति·
यदि हि तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्तदात्मकत्वात्सामर्थ्यस्येत्यतस्तदर्थकत्वं त
स्येति तद्भावः । भेद इति · संसर्गाविनाभावित्वाद्दडमोयमानसंसर्गस्तादात्म्यसंबन्धावच्छिन्नप्र·
तियोगिताकाभाव इत्यर्थः । तदेवाह · अन्योन्याभाव इति संसर्गा इति · । भेदाविनाभावित्वादनुमी
यमानभेदो भेदमूलकः संसर्ग इत्यर्थः । वस्तुतस्तु भेदसंसर्गौ वा सामर्थ्यमिति भाष्यस्य राजादिपद·
समभिव्याहृतपुरुषादिपदेन राजादिविशिष्टपुरुषादिरूपविशिष्टार्थस्य बोध इत्यभिप्रायः । न
नु भेदे पृथक्शक्तिबोधकत्वात् । तादृशबोधानुभवात् रामकृष्णावित्यादि वस्तुके भेदस्यवाच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न·द ताया‍उरूपपादत्वाच्चेति । व्यपेक्षावादस्येति । अव्यवहितो ह्यविभक्त्या वर्णितस्य विशेषः । उक्तोऽर्थः
१४९ न्त्वार्थप्रसङ्गस्यानिर्दुष्टत्वमेवेतिभावः स्वयंयाक्तीति । उक्तवक्ष्यमाणेत्यर्थः । आख्येति · नानाकारको
त्तिवात युष्मदस्मदादेशऽनुत्यादिभाष्यदूषितत्वादित्यर्थः । वृत्तिमात्रेति । मात्रपदं कृत्स्नार्थकम् । अ
न्हत्वार्थलक्षणया वृत्तिपदन्वकोपस्थापकमित्यर्थः । वाक्याभिधानइति · तदर्थाभिधानमित्यर्थः
भाष्यादित्यस्य समर्थानांपदवनमित्यादिः मूलेयरू अव्ययीभाववदितिसमन्वयन्ताइति · उपमेयस्यासी 149
दर्शनात् । पङ्कजशब्दे यथा पद्मत्वशक्त्या रीतिः तच्छक्तिमान् समासेपीत्यर्थः नवपङ्कजपदे रूढि० राम:
स्याकारेमानाभावः । समुदायाय पद्मत्वविशिष्टप्रतीतेरेवमानत्वात् । मदालिप्यतो पस्थिने रूपेक० १४९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्यत्वान्पङ्कजपदाद्योगेन कुमुदस्यापि बोधप्रसङ्गः ॥ रूढिस्वीकारे पुद्भत्पदेन हस्तादिरिवयो
गेन पङ्कजपदेन कुमुदस्यापि बोधेनेति तन्न पद्मयोगरूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबो
धे रूढेः प्रतिबन्धकत्वकल्पनात् । अथवा रूढ्या नियमतः स्मृतं पद्ममेव कर्तृव्यक्तिशक्तं उप्रत्ययेन प
ङ्कजनिकर्तृतया बोध्यते बाधकं विना व्यक्तिवचनानां सन्निहितव्यक्तिविशेषपरत्वमिति नियमा
त् । व्यक्तिवचनानां प्रातिकेऽपि व्यक्तितात्पर्यं कारणां सन्निहितो यो व्यक्तिविशेषस्तत्परत्वमिति त
दर्थः । घटेन जलमाहरेदित्यत्र सन्निहितसच्छिद्रव्यक्तिबोधवारणाय तत्र बाधकं विनेति तथा च
पद्मे तात्पर्यसत्त्वेन तदेव योगेनापि प्रतीयते न कुमुदम् । प्रथमकल्पस्तु रूढिज्ञानस्य योगासाभावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ न्यवगाहित्वाऽजनकज्ञानाविषयकत्वाच्च प्रतिबन्धकत्वासम्भवान्न क्षोदक्षमः। सिद्धेरनापत्त्याश्र
१५० यिमन्त्रादिन्यायेन प्रतिबन्धकत्वाभ्युपगमेप्यन्यत्र तथा कल्पने मानाभावादित्थं च पदज्ञानजभवसामग्री
सत्यां तस्यैव बोधो न तु कुसुदस्य सत्यां हि सामग्र्यां फलानुत्पादे प्रतिबन्धकापेक्षणादिति। न तु किं का
त्तदृशान्ते न वृत्तिमान्ये समुदाये शक्तिस्वस्वकीर्तिकथने पूर्वोक्तार्थस्वयमेवस्यतीति। नन्वजहत्स्वार्थ
वृत्तिकल्पे विशिष्टशक्तेः संबन्धांशे विरामः स्वोक्तनादावप्यसंबन्धाशावृत्तेः स्वीकारात्कोवृत्तिः 150
कोक्यार्थयोर्वैयाकरणनये तिशेसइति चेदत्राहुः तदाहि फलबलात्पदार्थोपस्थितिकाले नियमतः रामः
संबन्धांशाऽप्युद्बोधकासमवधानकल्पनेन पृथगुपस्थितयोः पदार्थयोः संसर्गबोधः। इतोऽपि पदार्थो १५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पस्थितिसमकालमेव नियमतः संसर्गांशेऽवोधकसमवधानकल्पनाद्विशिष्टार्थोपस्थितिरित्येवं लक्षणापो
पपत्तेरतस्य प्राप्तेस्त्वका वो विशेष्यविशेषणाभाववैपरीत्येन वोधः। तत्राप्रतीयमानद्वितीयार्थः। सम्बन्ध॰
श्चाभयं समुदायशक्तिसाध्यमनन्यलभ्यत्वात्। कृतशक्तयो वराजपदादिना देवोपस्थितिसंभवेन तत्र समुदा
यशक्तिकल्पने गौरवाच्च। नामार्थयोरभेदान्वय इत्यादिव्युत्पत्तेश्च पृथगुपस्थितनामार्थविषया इति। जह
त्स्वार्थइति पक्षे पङ्कजशब्दस्य पूर्वोक्तरीत्या हस्त्य नत्वासंभवादन्यथा मूलमेव तारयति। विशिष्टशक्त्यस्वी॰
कारे दृशामिति। साधकमिति। विशिष्टशक्तिसाधकमित्यर्थः। व्यपेक्षावादिनये रामकृष्ण इत्यादौ प्रत्येकप
दद्वन्द्व्यापदार्थोपस्थितावाकाङ्क्षादिवशाद्विशिष्टार्थबोधवत्पङ्कजपदेऽपि तत्रैव विशिष्टार्थोपस्थित्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ रूढेरुच्छेदापत्तिर्मेवमातवेष्टा इत्यारुपङ्कजनिकर्तुरिति। तेन रूपेणापन्नस्यापीत्यर्थः। योगादेवेति। अ
१५१ वयवशक्तेरेवेत्यर्थः। तत्रापि पङ्कजादिपदेषु तत्र तत्स्त्रीकारे तु किमपराद्धं समासे विशिष्टशक्त्येति भा॰
वः। सा समुदायशक्तिः। तत्कल्पनस्य। रूढिकल्पनस्य। तथोपस्थितिरि॰ स्वामित्वादिनास्वाम्या उप
स्थिरित्यर्थः। सुवचेति॰ पद्मत्वादिनोपस्थिरपि लक्षणयाऽऽइति वक्तुं शक्यमित्यर्थः। रथकाराधिकरण
विरोधमपि तत्राह॰ स्वमिति॰ लक्षणामिति॰। निरूढलक्षणामित्यर्थः। तस्यां शक्तिसमत्वादिति भाव 151
:योगेनेति॰ प्रत्येकपदवृत्त्युपस्थाप्यस्य रथकर्तृत्वेनेत्यर्थः। उपपत्ताविति। शास्त्रसंकोचमन्तरेणाप्यनुष्ठा राम:
ननिर्वाह इत्यर्थः। तत्कल्पनामित्यादि। रूढिकल्पनानित्यर्थः। तां कल्पयित्वेति यावत्। जातिविशेष १५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्येति। रथकारस्तु माहिष्यात्करण्यां यस्य सम्भव इति स्मृतिसंकोचितविशिष्टस्येत्यर्थः। अयुक्तमिति। विने
वशात्स्वसंकोचं विधेश्चारितार्थ्यादिति भावः। ननु नेयं शक्तिर्विशिष्टशक्तिसाधिका प्रतिबन्देरनुत्तरत्वात
दुद्धारस्य स्वयमेव वर्णयिष्यमाणत्वाच्च। किंच पङ्कजपदे लक्षणयापि न निर्वाहः तथाहि। सा किं पङ्क
जपदस्य उत्तरपदस्य वा। न तावदाद्यः समुदाये शक्त्यभावेन तद्घटितलक्षणाया असम्भवात्। नान्त्यः पङ्क
जनिकर्तृबोधस्य सर्वासिद्धस्य यतोऽनुपपत्तेरिति लक्षणानवसरादनायत्त्यात्तत्र विशिष्टशक्त्यभ्युपग
मः राजपुरुष इत्यादौ तु प्रत्येकपदवृत्त्यापि विशिष्टार्थबोधनिर्वाहे कृतं समुदायशक्त्या नापि पृथकारा
धिकरणविरोधः। यौगिकार्थरथकारणनिमित्ते वर्षाविधानस्य संकरस्यापि विशिष्टबाधनायेक्षया लघुत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ पित्र्यभूगणां त्वा देवानामिति मन्त्रवर्णाद्धमुसौ धन्वनयथोपप्रतिलोमज्ञातिरथकारस्यैव तदधिकारा
१५२ न्यात्ला घवा नादरेगारूढार्थे नत्रविशिष्टप्रधानकल्पनात्‌। नचापूर्वविपाध्यय कल्पनागौरवम्‌ फलमुख
त्वात्‌ प्रकृते राजपुरुषादिसमुदाये शक्तिग्राहकं नतादृशं कोशादियेन तद्बलादनयवार्थः परित्यज्येत
त्यपि। तोयाम्भल मवताग्व त्ति। आयकानरमिति। लिङ्गेति। कुक्कुटाराडमित्यादौ कुक्कुटपदार्थे स्त्रीत्वस्
याप्रतीतेरितिभावः संख्येति। राज्ञोराज्ञां वा पुरुष इति वाक्य उपसर्ज्जनपदानि संख्याविशेषपरं स्वा
र्थमभिदधाति समासे त्वन्तर्भूतस्वार्थे प्रधानार्थमभिदधातीति भाष्यात्तत्र संख्याविशेषस्याप्रतीतिरिति। रामः
भावः संख्यादित्यादिपदादिस्वेत सर्वैकार्थीभावकृता विशेषाः संख्याविशेषाव्यक्ताभिधानमुपसर्ज॰ १५२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न विशेषणं वा योग इति भाष्योक्तस्य राज्ञो गवाश्वपुरुषस्य देवदत्तयज्ञदत्तविष्णुमित्राणां गौरित्यादौ न्वायोगस्य
वसमर्थः। वचने रवेति। सविशेषणानां हन्ति नेत्यादिभिरित्यर्थः। उक्तार्थमेव प्रकटयत्ययं भाव इति। न्याया
सिद्धमेव सूत्रमिति। इह व्यपेक्षायां समासो न भवति एकार्थीभावे वाक्यं न भवतीति भिन्नविषयत्वेन बाध्य
बाधकभावासम्भवादिति न्यायसिद्धं विभाषावचनं नापूर्वमित्यर्थः। तदुक्तं भाष्ये न संज्ञाया भावाभावावि
ष्यते इति। एकार्थानां विकल्पना नानार्थो विकल्प्येते इति तदभावः। अन्यथा सम्भवादिति। हेतो ह्युपसर्जनप
देन प्रधानार्थाभिधाने नाभाव्यम्। स्वस्य विशेषणाकाङ्क्षायां वप्रधानापेक्षमिति कथमेकार्थीभावः
श्चस्या युगपद्गुणप्रधानभावाविरोधादिति न्यायसिद्धमेवेत्यर्थः। अनन्येति। व्यपेक्षा या दस्या या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· तस्माणिय· त्वादेवेत्यर्थः। दूषणमसम्युक्तमिति· असम्भानाकारकाणि ज्ञातसुषमदस्मरादेशप्रतिषेधः। अयं
१५३ दराडोहरानेनेत्यादिनेतिशेषः। कैयटोक्तं दोषसंघातमाह·। इति दूषणान्तरमिति·। इत्याकारकं दूषणा
तथेत्यादिनरामित्यर्थः। पूर्वोक्तानामिति·। निष्कोशाम्बिरित्यादौ कान्ता ध्यर्थवाचकानां लोपवचन·
मित्यादिकानामित्यर्थः। एतद्दूषणोद्धारस्य वक्ष्यमाणत्वादाह·। दूषणान्तरमिति· व्युत्पत्तिमङ्गमावि
ष्कर्तुमाह· अयमाशय इति· लक्षणेनेति·। वाक्ये इति शेषः। स्विवर्गादित्यादौ वाक्यस्यगोस्वामिलक्ष
कत्वेभीप्सितबोधलाभसंभवादाह· प्रासादकादाविति· लक्षणासामपीति· इदं च मीमांसकमते राम:
न·। स्वबोधक· संबन्धस्यैवैतैर्लक्षणात्वाभ्युपगमात्·। बोधोत्तरमित्यस्या उपपत्तिप्रतिसन्धानेसती १५३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तित्यर्थः लक्षणायामपीनान्तलक्षणायाऽसंभवं सूचयति। अर्थालाभादिति। प्राप्तिकर्त्रभिन्नोदकसंबं-
न्धिनो लाभेप्यनुभूयमानोक्तार्थालाभादित्यर्थः। तादृशसमानाधिकरणेति। सामानाधिकरण्यं चात्र समा-
नविभक्तिकत्वम्। अन्यथा कर्मत्वाक्षिप्तकर्त्रान्तार्थोदकपदार्थयोर्भेदान्वयाभ्युपगमे इत्यर्थः। भङ्गापत्ते-
रिति। तादृशव्युत्पत्तेरत्रैव व्यभिचारादिति भावः। ननु नञ्युत्पत्तौ समानाधिकरणपदस्यैकार्थाभिधायित्वस्यै-
वानिक्षेतेदंतिद्वयोः अत आह प्राप्तेरिति। अन्वयासंभवादिति। नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वय-
स्याव्युत्पन्नत्वादिति भावः। अन्यथा देवदत्त इति। अन्यथा उक्तव्युत्पत्त्यनभ्युपगम इत्यर्थः। ग्रामो लभ्यत
इति। वाक्येनेति शेषः। उक्तबोधस्य संभवद्युक्तिकत्वं कथंचिल्लक्षणापि कल्प्यतनदेवनास्तीत्याह। प्राप्ते-र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या॰द॰ धात्वर्थतयेति। प्रकृतिप्रत्ययोरिति न्यायस्य संख्यादौ व्यभिचारित्वं संभाव्याह। प्राप्तपद इति। नामार्थत-
१५४ येति। नामजन्यप्रतीतीति विशेष्यस्यैव नामार्थत्वादिति भावः। अभेदान्वयायत्ते चेति। समानविभक्तिकना-
र्थयोरिति धुन्यजोरिति भावः। इत्थमिति। भवन्मते वहनकर्माभिन्नो रथ इति बोधोत्तरं संबन्धिनि लक्ष-
णायामपि रथकर्मकवहनकर्त्तानत्वानितीशितार्थस्य लाभे एवं कर्मार्थकक्तप्रत्ययस्य कर्त्तरि लक्ष-
णायां तु धात्वर्थवहने रथस्य कर्मतयाभेदसंबन्धेनान्वयोऽनुल्लेखे च कथं व्युत्पत्तिविरोधादित्यादिपूर्वो-
क्तदिशावसेयमित्यर्थः। अत्र हीति। बोधाभ्युपगमादित्यनेनान्वयः। अतः ऊढरथ इत्यादिसमासे 154
विशिष्टशक्त्युपगमे तु तत्कस्या अपि व्युत्पत्तेर्विरोध इत्याह। अतिरिक्तेति। अस्य समर्थ बहुव्रीहिपर्यवसाने राम:
१५४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बीजं प्रदर्शयति । अयं भाव इति । विनाशक्तिमिति समुदायशक्तिमित्यर्थः । न चातद्गेति । तादृशसमुदायघटकाष्ट
वोत्तरपदस्योरित्यर्थः ॥ चित्रगवामीत्यादि । सामानाधिकरण्ये नामार्थयोरिति व्युत्पत्तेरिति भावः । ननु गोपद
स्य गोमल्लिक्षणायां विचित्रस्याभेदान्वयोचिता भिन्नगोस्वामीति बोधो नानुपपन्नो अत आह । चित्रादिमा
त्रस्येति । आदिना गवादिपरिग्रहः । प्राथम्यात्पूर्वपदे लक्षणोत्याश्रयेन चित्रपदोपादानम् । लक्षैकदेश
त्वेनेति । लक्षणोस्वामिरूपपदार्थैकदेशत्वेनेत्यर्थः । अन्यथायोगादिति । एकपदार्थप्रकारतानिरूपितवि
शेष्यतासंबन्धेनाशाब्दबुद्धिं प्रति विशेष्यतासंबन्धेनापरपदजन्योपस्थितेर्हेतुत्वेनेत्यर्थः यथार्थवसिता
याः पदार्थः पदार्थेनान्वेतीत्यादिव्युत्पत्तेरविघातकान्वयासंभवादिति भावः । कस्यचिन्मतमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· शक्यनिरासे। नवेति साक्षादिति· गवाहारकइत्यर्थः। तथाच षष्ठ्यर्थबहुब्रीहौ नत्रुत्यन्यतरकल्पनमि
१५५ मितिभावः। पदद्वयवृत्ति· विनिगमकाभावादितिभावः नैयायिकेति·। असंबन्धिनेत्यादिः एकदे
शान्वयभियाहितैरित्यसुक्तम्·। बोधहानीति· बोध्यमानस्य स्वामिनो देशाभानापत्तेरित्यर्थः। वि
निगमनाविरहेति·। चित्रपदं तात्पर्यग्राहकमुत गोपदमित्येकतरपक्षपातित्व क्तिविरहादवस्थे
नेत्यर्थः। असम्भवादि·। एकतर पदेलक्षणायां असंभवादित्यर्थः। पदद्वयलक्षणायां कृ ऋदोषइ·
तिभावः। अन्ययार्थान्वयानुपपत्तिरेव उत्तरपदेलक्षणायां विनिगमकाभवि ष्यतीत्याशङ्क्यनिरासे, रामः
नवेति· एवंमिति· उत्तरपदस्यैवान्यपदार्थलक्षकत्वे इत्यर्थः। बहुब्रीह्यसंभवहेतुमाह· अनेकमिति·। १५५

155

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्विधानादिति· बहुव्रीहिविधानादित्यर्थः। अयंभावः वृत्तेर्विशिष्टार्थकत्वं न शास्त्रैकगम्यं प्रवृत्तेनेत्याहव
र्थानादेशनात्· किन्तु लौकिकव्यवहारगम्यम्· स्वभावतएवैतेषांशब्दानामेवार्थेष्वभिनिविष्टानां निमित्त
त्वेनान्वाख्यानं क्रियतइति समर्थसूत्रभाष्यात्। अनेकमन्यपदार्थे चार्थे द्वन्द्व इत्यादौ नामनेकं प्रथमान्तम
न्यार्थप्रतिपादकं बहुव्रीहिसंज्ञकं भवति· चार्थे वर्त्तमानः प्रथमान्तसमुदायः सद्वन्द्वसंज्ञको भवतीति तं
क्रमशो लोकसिद्धार्थानुवादेन बहुव्रीह्यादिसंज्ञाविधायकत्वमात्रम्· अर्थस्यापि विधाने वाक्यभेदापत्तेः।
स्वसमानार्थकवाक्यानिवृत्तेरपि विभाषाधिकारेऽपि विधेयं स्यात्। एवं च सुवन्तसमुदायस्यान्यार्थप्रतिपा
दकत्वे कथं बहुव्रीहिः स्यादिति· नन्वेकस्य पदस्यान्यार्थप्रतिपादकत्वे तात्पर्यग्राहकतया परपदस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ एपयोगित्वेन समुदायस्य विशिष्टार्थप्रतिपादकत्वमविकलमत आह । किं चैवमिति । समासस्य चरमप-
१५६ दस्यैव लक्षकत्वे सतीत्यर्थः । इष्टापत्तावाह । एवं सतीति । चरमवर्णस्य वाचकत्वे सतीत्यर्थः । अत्रापि प-
प्राप्तोदकादावपीत्यर्थः । आपत्तेरिति । ज्ञापकव्यतिरिक्तनिर्णयकालिकापत्त्यापादकत्वत्तान्वानस-
त्वादिति भावः । ननु एकपदमात्रश्रवणान्न लक्ष्यार्थबोधः तदानीं लक्षणाकल्पित । त्यर्थग्रहजनकपू-
र्वपदोपस्थितेरभावादत आह । अन्यत्रेति । भूयसाम् इत्यर्थः । विलस इति । उत्तरपदलक्ष्यार्थे प्रकृत्यर्थत्वा- 156
भावेन तत्र प्रत्ययार्थानन्वयापत्तिरित्यादि तत्रोक्तं मः । अनुपयोगीति । अनुपातित्यागः । प्रकृते प्रतिज्ञाहानि- रामः
रेव व्यपेक्षावादिन इति । समर्थसूत्रे परस्य नान्वययोग्यत्वरूपसामर्थ्यमेव व्यपेक्षेति वादिन इत्यर्थः । न १५६

Nepal Sanskrit University, Beljhundi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समासे शक्तिरिति। समासे राजपुरुषादिसमुदाये विशिष्टशक्तिर्नेत्यर्थः। समाससंज्ञाप्रयोजकत्वं तु प्र
त्येकपदस्य निरुक्तिर्नास्तीति यावत्। संसृष्टार्थं समर्थमिति भाष्यकारोक्तेः संसर्गस्य पृथगुपस्थिति
निबन्धनत्वात् परस्परव्यपेक्षैव सामर्थ्यम्। इत्युक्तोः सामर्थ्यइत्यत्र समर्थपदस्य तादृशार्थकत्वस्य स
र्वैर्वाऽङ्गीकारात्। पराङ्गवद्भावानुरोधाच्च। अन्यथा समासादावेकार्थीभावः पराङ्गवद्भावादौ व्यपेक्षे
ति वाक्यभेदापत्तेः। तत्र व्यपेक्षानादेनेतु। ऋते नमित्रावरुणा। हन्तासुधाद्गमस्य शाविन्यादौ हतेनेत्या
देः पराङ्गवद्भावे सत्यामन्त्रितस्य चैत्याद्युदात्ततापत्तिः। न चैतन्निमित्तग्रहणं कर्त्तव्यमिति वार्त्तिके
नामन्त्रितार्थस्य यन्निमित्तं तद्वाचकमेव पराङ्गवदित्यर्थकेन नियमितत्वात् पराङ्गवद्भावाप्रशक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰क॰ रितिवाच्यम्। समर्थपरिभाषामाश्रित्य तत्सव्याख्यानस्यैवन्याय्यत्वात्। कृतेन मित्रावरुणावित्यनयोः
१५७ समभिव्याहृतक्रियान्वयित्वेन परस्परसामर्थ्यात्। मित्रावरुणाद्वन्द्वस्य च्यावेनयोस्तु सार्थिकान्वय
बोधसत्त्वदशायेन सामर्थ्यम्। स्यपूर्वेदं वेदभाष्ये। अत एवानन्तरपाठोपि चरितार्थः। अश्वो राज्ञः पुरुषो देव
दत्तस्येत्यादौ निरुक्तव्यपेक्षारूपसामर्थ्याभावादेव समासाप्रसक्तेः। समर्थस्तु त्रार्थस्तु पदसंबद्धी समा
सिद्धिविधिः साक्षात्परस्परपदार्थसंसर्गप्रयोज्यातिविषयतानिरूपितविषयताप्रयोजकत्वरूपव्यपेक्षापर 15
नामकसामर्थ्यवत्पदाश्रितो बोध इति। बहुव्रीहौ चित्रादिविषयतायाः साक्षात्प्रयोजकत्वाभावात्परस्प एमः
रयेति। किं च वृत्तित्वावच्छेदेनैकार्थीभाववादिमते स्वावयवार्थातिरिक्तार्थाभिधायकत्वरूपवृत्ति ल १५७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षरणस्य कर्मधारयेऽव्याप्तिः तत्रावयवार्थातिरिक्तत्याभावात्। इति न्वसामानाधिकरण्येन तु रथन्तरादिरूढे
पङ्कजादि योगरूढे च कोशादिसिद्धायाः समुदायशक्तेरस्माभिरप्यभ्युपगमेन सिद्धसाधनात्। अथ यौ
गिकचित्रगवादिसमुदायेशक्त्यभ्युपगन्तुकोशाद्युक्तत्वात्समासघटकप्रत्येकपदशक्त्यैवोपपत्तेश्च तेष
इति तदभिसन्धिः। नास्तिकत्वस्य वृत्त्यनुपपत्त्यभावप्रयोजकतया दर्शयन्ति। राजपुरुष इत्यादावित्ति। अत्र
राजपुरुषपदसमूह्यमाणविभक्तिपूर्वपदकषष्ठीसमासघटकस्य। चैत्रदास्याः पुत्र इत्याद्यलुक्समासेन दोष
ः। नन्वसंबन्धस्यैवलक्ष्यार्थस्यैव च व्यासमासयोः समानाकारबोधजनकत्वप्रवादोऽप्युपपन्नस्यात्। राजा
दिसंबन्धरूपलक्ष्यार्थस्योत्तरपदार्थे आश्रयतयान्वयेनैवोपपत्तौ संबन्धिनि लक्षणाभ्युपगमे प्रयोज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्योपस्थिते ३

ल.र. नामावच्छेदेतिवाच्यम् राजापुरुषइत्यादावपिराजादिपदार्थस्य स्वस्वामिभावसंबन्धेनपुरुषादावन्वयबा
१५८ धगाग्यनिपातातिरिक्तनामार्थनिष्ठाभेदातिरिक्तसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन॰
शाब्दबुद्धित्वातिविशेष्यतासंबन्धेन प्रत्ययनिपातान्यतमजन्योपस्थिते हेतुत्वात्स्यावश्यकतया प्रकृ
ते राजसंबन्धरूपनामार्थस्य प्रत्ययनिपातान्यतमानुपस्थिते पुरुषादावन्वयासम्भवात्।। निपातातिरि
क्तत्वविशेषणात् चन्द्रइवमुखमित्यादाविवपदार्थसादृश्यस्यनामार्थस्य प्रत्ययजन्योपस्थितिमिव·प्रये॰
मुखे निपातातिरिक्तनामार्थचन्द्रस्य तथोपस्थित्यविषये सादृश्येन्वयेपि न क्षतिः।। अभेदातिरिक्तसंबन्धा रामः
वच्छिन्नत्वस्य प्रकारतायां निवेशाच्च· राजापुरुषइत्यादावभेदान्वयेपि न सा· नचस्तमस्य नामातिरिक्त १५८

158

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेनापि नाम्नो विशेषणीभूतत्वान्न प्रकृते तदुपपत्तिरितिवाच्यम्। गौरवात्। क्वचिद्गत्या संकोचेपि सर्वत्र संको
चेस्यान्याय्यत्वाच्च। प्रकृते संबन्धिलक्षणाभ्युपगमस्यैवगतिमत्वात्। निपातानां द्योतकत्वनये घटादिपदानां
घटादिप्रतियोगिकलाक्षणिकत्वेनैवोपपत्तौ व्युत्पत्तौ निपातातिरिक्तत्वस्याप्रवेशाद्वेतिभावः। अत एवेति। भू
वपदस्य संबन्धिलाक्षणिकत्वादेवेत्यर्थः। नविशेषणान्वय इति। पदार्थः पदार्थेनान्वेतीति व्युत्पत्तेरितिभावः
ननु गभीरायां नद्यां घोष इत्यादौ नदीपदलक्ष्यतीरस्थैकदेशे नद्यां गभीराद्यन्वयवदत्राप्येकदेशान्वयो
दुर्वार इति चेन्न दृष्टान्तासिद्धेः। तत्राप्येतन्मते नदीपदगभीरनदीतीरलक्षकतायां गभीरपदस्य तात्प
र्यग्राहकतायाश्च वक्ष्यमाणत्वात्। तादृशव्युत्पत्तेः संबन्धिव्यतिरिक्तविषयतया वेवेत्तस्य नसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द.
१५९

न्यायैकदेशान्वयेपिक्षतिरिति।उक्तार्थतयेति।तत्रनिरादीनांद्योतकतयाशाम्व्यादिपदस्यैवकोशा
म्व्यधिकनिष्क्रमणकर्त्राद्यर्थेलक्षणाभ्युपगमेनैवेप्सितार्थबोधोपपत्तेरुक्तान्तादित्रादीनामुपाद
नासंभवात्यर्थः आवश्यकत्वमिति।तेनयारायरागादावष्टार्थकतयास्पष्टत्वेपितत्पर्यकतया
वाऽप्रयोगेपिनक्षतिरितिभावः।प्रतिबन्दीति।पङ्क.जादिपदेपद्मत्वादिविशिष्टशक्त्यनुपगमेन
पेत्यर्थः।अवयवशक्तिमजानतोपिन्युक्ताद्दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यंस्पष्टं।शक्तिग्रहे।अवय 159
वशक्तिग्रहाभावे।तेभ्यः।पङ्कजादिपदघटकावयवेभ्यः।विशिष्टार्थबोधइति।पद्मत्वादि रामः
त्वेनापद्मत्वादिबोधइत्यर्थः।लक्षणायाः शक्तिघटितत्वात्किंतुसमुदायशक्त्युपस्थितेत० १५९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मिन् अवयवशक्त्य उपस्थापित पङ्कजादि कर्तृजन्मभेदान्वयोपगमस्येति भावः। अत एवेति तन्त्यदीयलक्ष
णायेह तत्पद शक्तिज्ञानस्य हेतुत्वादेवेत्यर्थः। उत्तरपदलक्षणायां विनिगमकमाह॥ यौगिकत्वेनेति॥
विलम्बितत्वादित्यनेन शीघ्रोपस्थितिकत्वमुत्तरपदलक्षणायां। विनिगमकमस्तीति सूचितम्। न
नु सुन्दरत्रिपदो यौगिकत्वप्रमुदकादि पदानामपि सम्मतत्वात्॥ प्रत्याय्यानामिति॥ यथाश्रुतमक्षेत्यर्थे पद
मयथाव्याचष्टे॥ सन्निहित। तथा चाणुरपि विशेषो ऽध्यवसायकर इति न्याये नोत्तरपदस्य वलक्षणेति न
वोधादित्रयदूषणमपीति भावः। पूर्वोक्तदूषणान्तमुद्धरति॥ घटादि घटे चेति कल्प्यमानेष्वप्रकृत्या॥ ऽस्तु
प्रत्वं सूचयति॥ विशिष्टस्येवेति॥ व्यवहारादिनातत्रैव निर्धारणादिति भावः। असत्वादि स्वयमतत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.इ. पिविनिगमकगवयरणास्यादितिशेषः। उत्तरपदइति। प्राप्तोदकादि घटकोदकादिपद इत्यर्थः। साल
१६० क्षणाविशेषइतिः षष्ठ्यादिपदात्समासस्य लक्षणायां वैयर्थ्यमित्यर्थः। अत्रेदं बोध्यम्। उक्तयुक्त्या
यकुम्भमित्यादावुत्तरपदस्यैव सामीप्यार्थलक्षणा पूर्वपदं तात्पर्यग्राहकम्। तत्पुरुषेपि कचिद
र्द्धपिप्पलीत्याद्येकदेशिनि चरमपदस्यैव साविप्पल्यर्द्धाद्यर्थे। इतरद्योतकम्। नीलोत्पलमित्या
दिकर्मधारयेतु। नकापिसा। प्रत्येकपदशक्त्युपस्थितयोरभेदान्वयसौलभ्यात्। बहुव्रीहौतु अन्यपद 160
स्वस्येतिसार एव व्यक्तम्। पाणिपादमिति। द्वन्द्वे उत्तरपदस्य पाणिपादसमाहारेलक्षणा। पदा रामः
न्तरं द्योतकम्। तत्रैव परस्परपाचादनकर्मत्वान्वयः। एवमितरेतरयोगद्वन्द्वे साहित्यायन्त प्रत्येक. १६०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदार्थयोरन्तरपदस्यैवसा॰ ।अतस्त्वद्विवचनाद्यर्थोद्वित्वाद्यन्वयस्तत्र समाहारद्वन्द्वे साहित्यं विशेष्यमं
न्यत्तु विशेषणमिति भेदः । यद्वा॰ समाहारद्वन्द्वे साहित्याप्रतीतेर्न तत्र लक्षणा॰ । किन्तु प्रत्येकपदशक्त्या प
स्थाप्ययोरेव साक्षाज्ज्ञादनकर्मत्वान्वयः । द्वन्द्वश्च प्राणीति प्रकरणादिति॰ । सर्वैकत्वसमासस्यैव सर्वं
समाहारयदव्यपदेशम्॰ स्तनत्रातु तद्व्यपदेश औपचारिकः । नात इतरेतरयोगेनत्र प्रसङ्गः । स्वमितरेतर
योगेपि न लक्षणा॰ । एकस्मात्पदादुभ॰ पदद्वयात्प्रत्येकशक्त्युपस्थितार्थयोर्द्वित्वान्वयसंभवात् । एकक्रि
यान्वयित्वरूपस्यैकबुद्ध्यवच्छिन्नत्वस्य वासामर्थ्यस्य पश्चादेवागमेन पूर्वं तत्र लक्षणा । यद्वासंबा
न्धः । चार्थे द्वन्द्व इत्यस्य चार्थान्वययोग्य इत्यर्थान्न तद्विरोधोपि॰ उक्तवैतत्वं । द्वन्द्वत्वावच्छिन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· स्यप्रधानीभूतार्थद्वयप्रतिपादकत्वरूपद्वन्द्वः। सामासिकस्य चेत्यनेन समासस्य हमध्ये द्वन्द्वस्य विभूतित
१६० यापरिनिगरणनस्यव कृतस्य सङ्गृहीतेः। विशिष्टशक्त्या लक्षणया वा तत्स्यप्रधानीभूतसमासाह्यप्रतिपादकत्वे
नुसमासान्तर्नाद्वन्द्वस्याविशेषात्तदसङ्गतिः स्यप्रैव। यत्तु भारतभावदीये। समासमेकत्रासतंसमासो वि
दुषां गुरुशिष्याणां वामनन्त्रार्थेकथार्थचैकत्रावस्थानत्रानिदितमर्थजातं सामासिकं चात्रनार्थिकं
स्मृ। तस्यटस्येक इतीकादेशः। यस्येति चेत्यलोपः। तस्समध्ये द्वन्द्वो रहस्यो हम्। द्वन्द्वं रहस्येति सूत्रे द्व 161
न्द्वशब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्धमिति व्याख्यातम्। तत्तु पिदितार्थस्य चतुर्थे चतुरथ्यां वाद रामः
शेनाद्वयन्तराधिकरणन्यायेन शाङ्कनिनसमासद्वन्द्वः। त्समासरूपार्थस्यैवोपस्थितेन चित्तत्त्वम १६०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्तस्य साम्प्रतिकत्वकः समासशक्त्यानुचितस्यानभिधानात्। द्वन्द्वस्यैतन्मते नैनाहस्येवाव्ययत्वादिति द्वन्द्व
स्यानित्यनपुंसकत्वेन पुल्लिङ्गस्य तत्राविवक्षासंभवात्। सप्रासवाचिनश्च तस्य पुल्लिङ्गः। तायाश्चा
र्थे द्वन्द्व इत्यादौ द्वन्द्वस्याभिधायिकत्वाच्च तेन समासग्रहणस्यैवोचितत्वाच्च चिन्त्यम्। न च साहि
त्याभावे अन्यतरस्य क्रियान्वयविवक्षायां पदस्यैव द्वंद्वादिनं हि स्वीति वाक्यवत्स्यैव पदद्वयस्य द्वि
त्वोक्तिः स्वीप्रयोगापत्तिरिति वाच्यम्। प्रत्ययार्थं द्वित्वावच्छिन्नधर्मिकस्यैव पदार्थान्तरेऽन्वयबो
धस्य तत्र दर्शनेनाज्ञापितदवच्छेदेनान्वयस्यैवोचितत्वात्। न च द्वित्वान्वययोग्यतावच्छेदक
स्य हि समभानमन्तरेण द्वित्वान्वयबोधस्य कथमिति वाच्यम्। योग्यतावच्छेदकोपस्थितेरनपेक्षणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.६. न्.। उपास्मतेयोग्यस्वदन्वयात्.। अतस्वघटेनजलमामयेत्यत्राऽर्थितनस्यैवयोग्यत्वलेनान्वयः। ननु
१६२. छिन्नेतरप्रकारकः शाब्दबोधस्तत्र प्रकृतसमर्थतावच्छेदकस्यैवाछिन्नत्वान्वयपयोग्यतावच्छेदकत्वेपिक्षः
तिविरहात्त्व.। विवेचितंचेदमधिकमन्यत्र नवसौमेवस्थानावभिमादधीयाताऽभित्यत्रसाहित्यला
भोनस्याऽदितिवाच्यम्.। यत्कर्त्तव्यंतदनयास्महेतिवचनान्तरात्तत्.। सिद्धेः यद्यपिद्वन्द्वपरस्यनान्वे
पित्वरूपव्यपेक्षादुर्घटा तथापिवाधैर्द्वन्द्व इतिविधिसामर्थ्यादेवत्रसतत्रमासस्तदर्थस्तत्कस्वस् 162
न्वयान्वायप्रयोस्त्वनेभिधानत्वेनद्वन्द्व इतिस्पष्टम्भाष्ये। यत्त्वेकस्यांक्रियायामेकरूपेणान्वयित्व राम:
मेवतत्रसामर्थ्यमितितन्न.। कश्चिदेतस्यकश्चित्सर्वैर्जातस्यसामर्थ्यस्याश्रयणोसमर्थसूत्रेवाक्यभे १६२

Nepal Sanskrit University ... Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दायतेरेकक्रियान्वयित्वस्य तत्तो नन्तु भवाच्चेति · पूर्वोक्तापत्तिमिष्टत्वेनापि परिहरति । स्यादुक्तमिति । चरम
वर्णास्येवेति · पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितान्तिमवर्णास्येत्यर्थः । नातः केवलचरमवर्णश्रवणा
दर्थबोधापत्तिः । अधिकमन्यत्रवक्ष्यते । व्यपेक्षायां सामर्थ्ये समासस्को ऽसङ्गृहीतो भवतीति भाष्याशयं ·
प्रकाशयन्नैयायिकमतं दूषयन्नत्रोच्यत इति । संज्ञादीत्यादिनाऽयन्त्वादिपरिग्रहः । भाष्यसिद्धया इ
ति · समासग्रहणमर्थवत्समुदायानां नियमार्थमिति भाष्यसिद्धया इत्यर्थः । स्पष्टमिति · वाक्यस्या ·
र्थवत्त्वेन प्रातिपदिकत्वप्रसक्तौ तद्व्यावृत्तये वचनानन्तरमाशङ्क्य नियमार्थसमासग्रहणेन समाहि
तम् · समासेऽशक्त्यनभ्युपगमे तु तस्य वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेनाप्राप्तसंज्ञाविधयेन ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श॰र॰ स्यावक्लृप्तकतयानियमार्थत्वव्याघातः स्पष्टस्व। तस्मादेतद्भाष्यमपि विशिष्टशक्तौ मानमिति
१६३ शौक्तत्वादित्यर्थः। न चार्थवत्पदसामर्थ्ये नार्थवाचकपदघटितेऽपि प्रातिपदिकसंज्ञासि
द्धिरन्यथा धात्वादिपर्युदासे नैवार्थवत्त्वे लब्धे तदुपादानवैयर्थ्यं स्पष्टमेव। दशदाडिमानी
त्यादेरनर्थकस्य पदसमुदायस्य तु नियमेन वारणीयत्वादिति वाच्यम्। अर्थवद्ग्रहणस्योक्तनार्थता
याः सिद्धान्तसिद्धत्वेन तत्सामर्थ्याभावात्। अर्थवद्ग्रहणं संज्ञिप्रदेशार्थमिति भाष्येणार्थ 163
वत्त्वेन साहचर्यपदोपधानार्थं तदुपयोगादर्शनाच्चेति विशिष्टशक्त्यभ्युपगममन्तरेण समासस्य प्राति राम:
पदिकसंज्ञा दौर्लभ्यमेवेति भावः। ननु चित्रगुरित्यादौ विशिष्टशक्त्यस्वीकारेऽपि नार्थवत्त्व १६३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निबन्धनप्रातिपदिकसंज्ञानुपपत्तेः तथाहि॰। नसक्तसंबन्धो लक्षणा॰ गम्भीरायां नद्यां घोष इत्यादाव
सम्भवात्॰ तत्रतावन्न गम्भीरपदं तीरलक्षकम्। तद्यामित्यस्यानन्वयापत्तेः। नहितीरं नदी॰। अतएव नन
दीपदमपि तथा गम्भीरपदार्थस्यानन्वयापत्तेः। नचपदद्वये प्रत्येकं शा॰। विशिष्टं नदीतिर॰। भानप्रसङ्गात्
नचनदीपदेनैव गम्भीरनदीतीरं लक्ष्यते गम्भीरादिपदं तात्पर्यग्राहकमितिवाच्यम्॰। गम्भीरपदस्य तात्प॰
र्यग्राहकत्वमुतनदीपदस्येति विनिगमनाविरहात् नचनदीपदस्य द्रव्यवाचकतया साक्षात्संबन्धस्व
लक्षणायां विनिगमक इतिवाच्यम्॰ गम्भीरपदस्यापि नित्यगुणिवाचकतया तदर्थस्यापि साक्षात्संबन्धा
विशेषात्। तस्मात्पदद्वयलक्षणायां गौरवात्समुदायस्यवसाङ्गीकार्या॰। अतएवार्थवादवाक्यानां प्राशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ त्ये लक्षणेति संगच्छते· किन्तु स्ववोधसमवन्धरूपेवसा। अस्ति च गभीरायां नद्यामित्यत्र वाक्यज्ञाथा गभी॰
१६४ राभिन्ननदीतत्संवन्धवत्तीरइति· एवं च चित्रगुरित्यादिसमुदायस्य लक्षणया चित्राभिन्नगोस्वामिरूपा
र्थवोधकत्वन्तु पार्थवत्वाभ्यांतीयदिकसंज्ञानानुपपन्नेत्यत आह। समासवाक्य इति। वाक्य इत्युक्त्या क्व
चिन्नत्संभवेपि सर्वत्र राजपुरुषादिसमासे तदसंभवं सूचयति· असंभवेति·। अयमाशयः स्वज्ञाप्यसंवन्धस
न लक्षणात्वमपभ्रंशोपि तत्प्रसङ्गात्· किंच· स्वज्ञाप्यइत्यत्र स्वनिष्ठज्ञापकतानिरूपितज्ञाप्यतावदर्थसंव
न्ध इत्यर्थो वाच्यः। तत्र ज्ञापकत्वं हि बोधकत्वमुत ज्ञानजनकज्ञानविषयत्वमात्रम्· नाद्यः वाक्ये ल॰ रामः
क्षणाभावप्रसङ्गात्·। तदर्थस्य गभीराभिन्नस्य पृथग्वोधनात्·। नान्त्यः प्रत्येकं वर्णानामर्थवत्त्वापत्तेः॰ १६४

164

त्याविभक्त्यापत्तिरितिस्वशक्यसंबन्धोलक्षणेत्येवाऽङ्गीकरणीयम्।तथाचसमासेतदसंभवेनप्रातिपदि
कसंज्ञानुपपत्तिरतदवस्थेतितदर्थंविशिष्टशक्तिस्वीकारआवश्यकइति।भाष्यसिद्धेति।निवेकाशेदे
प्रतिषेधो॰नवक्तव्यादित्यादेरुक्ताभिधानादितिभावः।स्वव्यतामिति।अतिसमासश्चप्रातिपदिक
मित्येवस्वव्यतामित्यर्थः तथाचतिङ्सुबन्तभिन्नंयत्तत्प्रातिपदिकमित्यर्थेनसमासप्रातिपदिकत्व
लाभादतिरिच्यमानंसमासग्रहणंनियमार्थमस्त्वित्यर्थः॥प्रत्येकंवर्णेष्विति।वर्णानामानर्थक्यप
क्षेप्रातिपदिकसंज्ञायांप्रकाशनीयार्थाभावादविशेषणप्रतिवर्णविभक्तिसंभवादव्ययादिवेतिभा
वः।अर्थवत्त्वेति।अर्थवद्ग्रहणस्यानर्थकत्वेनेत्यर्थः।नन्वार्थवत्समुदायघटकवर्णानामर्थवत्त्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. यच्चपरस्यापि भाष्ये दर्शनात् तद्ग्रहणेपि विभक्तिदुर्वारेति वाच्यम्· तत्र सेपि संघातस्यैकार्थ्याभावात् सुबभावो व॰
१६५ र्णादिति भाष्यात्तच्चैरगे केवलविभक्तिः समुदायावयवार्थगतमेकत्वं बोधयेत्।एकमेव तदेकत्वं तत्रैके
न सुवा प्रत्यापितमिति बोधनीयाभावाद्विभक्तेः प्रत्येकवर्णादनुपपत्तेरिति भावः। ननु समासवाक्यस्या॰
र्थवत्त्वाभावेपि न प्रातिपदिकसंज्ञानुपपत्तिः। कृत्तद्धितेति सूत्रेणैव तत्संभवात्· संभवति विधित्वे॰
नियमकल्पनाया अन्याय्यत्वात्· समासग्रहणमेव च सर्वकार्थीभावाभावे मानम्।· वाक्यस्य तु न॰
पूर्वसूत्रेणात्प्रसक्तिरर्थवत्त्वाभावात्।· संसर्गस्याशक्यत्वेप्याकाङ्क्षादिना शाब्दे तद्भानसम्भ॰ रामः
यथावत्त्वात्।· एवं प्रकृतिप्रत्ययसमुदायस्याप्यनर्थकत्वेनाप्राप्तसंज्ञाविधानार्थं कृत्तलग्रहं॰ फि।१६५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामिति समस्तस्यैव सूत्रस्य विधायकत्वम्। आद्यसूत्रस्यान्वयुत्पन्नसाधुशब्दस्वरूपमेव ननु बहुपटुरि
त्यादिसमुदायो ऽप्युत्तरपदलवशिकता। समस्तसमुदायस्य त्वनर्थकत्वे न पूर्वसूत्राविषयत्वे न तत्र तत्प्रा
तिपदिकत्वविधानार्थं सूत्रकारेण द्वितीयं सूत्रं प्रणीतम्। अतस्त्वाद्यार्थवदिति नानुवर्त्तते ऽसम्भवात्
प्रयोजनाभावाच्च। तत्र कृद् इत्येन प्रत्ययपरिभाषया तदन्तग्रहणं संज्ञाविधावनुपन्यस्य प्रायिकत्वा
त्। ऽन्तरादिवन्नेवत्त्रकृतामप्रयोगेण तदुपादानवैयर्थ्याच्च। यद्यपि कृदन्तात् तद्धितपदस्य तद्धितान्तपरत्वे
वलभ्यते तथापि लक्ष्यतावच्छेदकाकान्तबहुषट्कादिसंग्रहाय तन्त्र्यावयवहितो तरत्वसंबन्धेन तद्धितवि
शिष्टप्रकृतिघटितसमुदायतद्धितान्यतरपरतया व्याख्येयम्। प्रकृतित्वं च प्रत्ययविधानाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰रु॰ खित्वम्। इरियानित्यादेस्तु प्रत्ययस्यैव तदन्तत्वान्तदोषः। पचतक्यादिसमुदायात्गंनतद्धितप्रकृतेनिउक्तं तद्धित॰
१६६ वैशिष्ट्याभावान्न तत्रातिप्रसङ्गः। लक्ष्यग्रहणपरिभाषायाः। अनेनाग्रहणज्ञापिताया असार्वत्रिकत्वाच्च न स्तूल॰
के पदं शमित्यादावतिप्रशक्तिरेवं च समासग्रहणेनाप्यप्रसक्तप्रातिपदिकसंज्ञाविधानाद्राजपुरुषइत्यादिस
मुदायात्त्वात्तु समाप्तिः सुलभेति तत्रावशिष्टशक्त्यसुपामो निश्चमाणकः। वाक्यस्य संज्ञा नेत्युक्तमेव। तत्र
कौशादिनाशतत्पारस्केदात्। पचतुकौशादिकं परिस्केदकं न तत्र समासेपङ्कजादौ तां निवारयामः। एवं च वाक्य 166
स्यार्थवत्त्वाभावेन प्रातिपदिकसंज्ञाप्रसक्तेरन्यथावृत्तिरूपफलाभावेन समासग्रहणस्य नियमार्थत्ववर्णनमसा राम॰
म्प्रतम्। भाष्ये तस्य नियमपरतया वर्णनं तु संसर्गस्य शक्यत्वमित्येकदेशिमतमनुसृत्येवेत्यरुचेराह। किं॰ १६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वैवमिति। स्वंम्॰ समासे विशिष्टशक्तिस्वीकारे कर्मत्वाद्यन्वयापत्तिरित्यस्य वंगादिपदार्थशक्तिशेषः तत्र हेतु॰
माह॰ प्रत्ययनामिति॰ तथा च प्रकृतित्वं प्रत्ययविधानावधित्वम्॰। न तु प्रत्ययाव्यवहितपूर्वत्वम्॰। बहुपटुरित्या
दौ पटादिशब्दे ऽव्याप्तेः। न च तावेवसु प्तिङन्तसुप्तिङन्तविभक्त्युपलक्षणम्॰। प्रत्ययान्तरस्यापि वतो विहितो सैव
प्रकृतिमितितदर्थात्। आद्ये त्वभ्यासाभिप्रायेण। तथा च समासोत्तरपदस्य विधानावधित्वन्तत्प्रकृतित्वाभा
वेन तदर्थेन कर्मत्वाद्यन्वयः संभवत्युक्तव्युत्पत्तिविरोधादिति भावः। प्रत्ययानामिति सुप्तिङ् हि। रिङनमानयेना
दौ कर्मत्वान्वयवारणाय स्वीक्रियते। तदर्थश्च प्रकृत्यर्थनिष्ठविषयतानिरूपितविषयतासंबन्धेन शाब्दबुद्धिप्र
ति विशेष्यतासंबन्धेन प्रत्ययजन्योपस्थितित्वेन हेतुतेति। तत्र प्रकृतेः सन्निहितत्वैनैवानिवेशसंभवात॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लः दः वोक्तस्थले व्यभिचारवारणान्नतु प्रकृतित्वेन गौरवादिति मतं दूषयितुमुपन्यस्यति । पत्त्विति । सन्निहितेति । स-
१६७ न्निहितत्वं चाव्यवहितपूर्वत्वेनानुसन्धीयमानत्वं तस्य चोचित्रग्वादिपदे गवादौ वसत्त्वान्नोक्तानुपपत्ति-
रिति भावः । व्युत्पत्तिरेवत्येकवाक्येण पूर्वोक्तप्रकृतित्वघटितव्युत्पत्तेर्निर्व्यवच्छेदः । उपकुम्भादौ व्यभिचारे-
ऽदावनन्तु प्राचीनमते । नव्यनये तत्रोत्तरपदे लक्षणाभ्युपगमेन तदप्रसक्तेः । तत्रापि । उपकुम्भादिसमास
पात्यर्थः । आनुशासनिकेति । सन्निहितत्वं नाव्यवहितपूर्वत्वम् । तत्त्वेनानुसन्धीयमानत्वं वा धवखदि-
रावित्यादौ धवादिपदार्थे विभक्त्यर्थान्वयप्रसङ्गात् । किन्तु सन्निहितत्वेनानुशासनबोधितत्वं तत्त्वं ध रामः
वादिपदार्थानामिवोपादिपदार्थानामस्तीत्याशयवानाह तथाचेति । समस्यमानपदोत्तरमिति । समा १६७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यानेकपदसमुदायात्मकतया समुदायस्य प्रत्येकानतिरिक्ततया समासस्य प्रातिपदिकाद्विहितविभ
क्तेर्लुक्तत्पदसन्निहितत्वादिति भावः। संभवेदेवं यदि समासग्रहणं निबन्धनाप्रातिपदिकसंज्ञाकि
न्तु तस्यानियामकत्वं· यापूर्वसूत्रेणोवसावाच्याः। तथा चोक्तप्रकारासम्भव इत्याशयेनार्थं वक्ष्ये।
ति। तथा च शास्त्रबोधितसन्निहितत्वमादाय विशिष्टस्यैव न केवलपूर्वपदस्य लुक्स्थले व्यभिचारादु
क्तइतिभावः प्रकृतित्वस्य पर्याप्त्याख्यविलक्षणसंबन्धे न समुदायमात्रविश्रान्तत्वेपि केवलान्त्र
यतया वस्तुत्वस्य प्रकृत्येकदेशेपि स्थभवाद्गुणोऽस्य त्यतिशरीरे आश्रयतैवानिवेशनीयेत्याशयेनश
ङ्कते· अर्थेति। प्रकृतित्वाश्रये। प्रकृतित्वाश्रयार्थे। असन्निहितप्रकृत्यर्थे दूषणमुद्भाव्य समभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. इति पितदाह॰। अघटमिति॰। पूर्वं पदार्थप्राधान्यमते त्वाश्रयेन दूषणे न्द्राविनं तत्त्वं चाग्रेवक्ष्यते॰। कि
१६८ शेषणतयेति॰। एकत्रविशेषणतयावच्छिन्नस्यापरत्र तदन्वये नैराकाङ्क्षादिति भावः। यत्र क्वापि॰
विशेषणे नापरान्वय इति यथाश्रुतं दूषयति॰। पाकान्नीलघटस्यादि॰। नीलत्वसुरवयोः स्वाश्रयविशे
षणतयान्वितयोः पाकादित्याद्यन्तर्गतेपञ्चम्यर्थहेतुत्वस्यानन्वयापत्तेरित्यर्थः। त्यज्जन्यज्ञान
विषयत्वमिति॰। तत्पदार्थः प्रकृतिः। मात्रपदेन हेतिप्रतिपाद्यत्वस्य व्यवच्छेदः। अत्र चित्रगवादि॰ 168
समासान्तर्गतगवादिपदार्थे इत्यर्थः॰। अक्लिष्टमिति॰। अबाधितमित्यर्थः। घटं पश्येत्यत्र दशिज्ञानसा राम:
मान्यार्थः। आकाशवारणायेति समवायेनोपस्थिताकाशे हश्यर्थकर्मत्वाद्यन्वयवारणायेत्यर्थः। तस्या॰ १६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृत्यर्थत्वस्येति वृत्तिजन्योपस्थिति विषयत्वस्येत्यर्थः। वादिवाक्ये पावनोर्थाः सम्भवैन्तीति न्यायेनैक
वृत्त्यन्तिसर्थाजपतयाव्याचष्टे। अथेति। एवं तु प्रत्ययसन्निहितपदार्थत्वमन्नतु प्राग्वर्त्तिपदजन्योपस्थितिवि
षयतायाः कृत्स्नेसत्त्वादिति भावः। प्रत्ययानामिति वृत्त्यन्तरैकार्थीभाववादिमतेसत्त्वेपिनास्मन्मते मा
सार्वत्रिकी समासस्य वा सम्भवा किन्तु प्रकृते वृत्त्यन्यतरमेव कल्प्यते इत्यामिप्रेत्याहार्थेति। अकृतेर
कल्पनामिति समस्य नामपदार्थविषयतानिरूपित विषयतासम्बन्धेन शाब्दप्रतिविशेष्यतासम्बन्धे
न प्रत्ययजन्योपस्थितेः कारणत्वान्तरकल्पनामित्यर्थः। ननु प्रत्ययानां सन्निहितपदार्थगतस्वार्थ
बोधकत्वरूपाव्याससमासाधारणपकैव वृत्त्यास्तिः सन्निहितत्वं चप्रकृतिवटकत्वे सति प्राग्वर्त्तित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. स्त्ययमिति नोक्तदूषणमत आह दर्शितेति॥ तथा कल्प्यते चोक्तव्युत्पत्त्यपेक्षयोपदत्वस्य प्रकृतित्वघटितस्य
१६९ व्युत्पत्तौ निवेशे गौरवमित्यादिर्दिगर्थः॥ ननु प्रत्ययानामिति व्युत्पत्तेः प्रकृतिप्रत्ययघटितत्तयात्तत्रप्रकृति
त्वप्रत्ययत्वयोर्नञ्गतयोर्दुर्वचत्वेनतत्तद्व्यक्तिभेदेनकार्य्यकारणभावो वाच्यस्तथा च समासस्थले स
मस्यमानपदार्थस्य प्रत्ययार्थान्वयाभ्युपगमे बाधकाभावोऽत आह॥ पापि चेति॥ यद्वा नेकसमासेषु विशि
ष्टशक्तिकल्पनापेक्षया क्लृप्तव्युत्पत्त्यागमस्य हेतुतान्युत्पत्तेः कल्पनास्वलघीयस्त्वात् आह॥ अपि चे 169
ति॥ अनन्वयप्रसङ्ग इति॥ नामार्थयोरितिव्युत्पत्तेरितिभावः॥ अनन्वयमेवाह राजपदादेरिति॥ लक्षणा रामः
मासपीत्यपि नासंबन्धलक्षणायोनिताराभन्वयाभावः स्यादिति॥ ननुक्तव्युत्पत्तेस्तण्डुलः शुभ्रस्त्यादौ १६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यभिचारोऽत आह तत्पुरुषः। वुभ्र इति। अभेदेनैवान्वय इति। तथा च तत्पुरुषेऽपि प्रातिपदिकार्थे विभक्तिजन्यो-
पस्थितेः सत्त्वान्न तत्र व्यभिचार इति भावः। पुभ्रेण तत्पुरुषे नन्वादौ व्यभिचारमाशङ्क्य निराचष्टे। अभेदा-
र्थिके ति। अथवा कर्त्रेकत्वसमानाधिकरणाभ्यां द्विस्यो द्वितीभविष्यतीति द्वितीयादिविभक्तेरनावि-
त इति सूत्रे भाष्यकृताभिधानात्समानाधिकरणपस्याविशेष्यविशेषणयोर्भावस्याभेदस्य विशेषणपदो-
त्तरविभक्त्यर्थत्वलाभात्तत्रापि पुष्पेणेति तृतीयाजन्याभेदोपस्थितिसत्त्वान्न व्यभिचार इति भावः। नन्व-
त्र यदि भेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिः भेदस्य केवलान्वयित्वात्। यदि भेदप्रतियोगिकाभावस्तदा
लो वह्निरिति वाक्यस्य प्रामाण्यापत्तिर्हृदत्वादिनीलभेदाभावस्य वह्नौ सत्त्वात्। विशेषणविभक्त्यर्थैक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ देशेप्रकृत्यर्थस्यान्वयापत्तेश्च॰ नचभेदेऽभावेचद्वितीयाविशक्तिः भेदत्वेन् प्रकृत्यर्थस्यप्रकृत्यर्थताव॰
११० छेदकावच्छिन्नप्रतियोगिताकत्वेनान्वयः। उक्तसंबन्धेनप्रकृत्यर्थविशिष्टभेदस्यानुगतत्वा॰। वच्छि
न्नभेदाप्रसिद्ध्योक्तप्रकारासंभवात्। नीलपदाद्द्वितीयापरनीलपदघटितनीलोघटइत्यस्यवाक्यस्यप्रामा॰
ण्यापत्तेश्च॰। नीलत्वादिनानीलभेदाभावस्यघटेऽबाधात्॰ नचतद्व्यक्तित्वावच्छिन्नभेदाभावस्यवि
भक्त्यर्थः। तथासत्यपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्याभानासंभेनतदवच्छिन्नप्रतियोगिताकाभावेशक्ति
ग्रहासम्भवेनापूर्वव्यक्तिभेदान्वयानुपपत्तेः। अभावत्वंविशिष्टवैशिष्ट्यावगाहित्वानुपपत्त्येकधर्मा राम:
वच्छिन्नप्रतियोगिताकाभावेऽपरधर्मावच्छिन्नप्रतियोगितायाःसंबन्धतयाभानासंभवाच्चेतिचेन्न॰ ११०

उभेदस्तादात्म्यम्। तच्चस्वघटन्यसाधारणोधर्मः। असाधारण्यं त्वत्रप्रतियोगिवृत्तित्वस्वसामानाधिकर॰
ण्योभयसंबन्धेनभेदविशिष्टं यत्तदन्यत्वमित्येकमात्रवृत्तिधर्मस्य तस्मिन्नाधेयतया प्रकृत्यर्थान्वयः। अ
पूर्वव्यक्तिनिष्ठत्वव्यक्तित्वस्य विशिष्यज्ञातुमशक्यत्वेप्येकमात्रधर्मत्वेन सामान्यप्रत्यासत्त्या सुग्रह॰
त्वं वस्तुस्थितिः। पाष्टिकेइति। शाब्दबोधेतरकालिकइत्यर्थः। अन्वयइति। तच्छ्रोधइत्यर्थः। अपुराण॰
धिकरणरीत्यासर्वेषांविभक्त्यर्थानांप्रथमं क्रियायामेवान्वयेनेतत्रस्तुभ्रादिपदार्थान्वयेविभक्तिज॰
न्योपस्थितिसत्त्वात्तत्पलेपिनोक्तव्युत्पत्तेर्व्यभिचारइतिभावः। ननुनामार्थयोरितिव्युत्पत्ते राजपुरु॰
षमत्तराडुलः। पचतीत्यादौराज्ञःस्वस्वामिभावसंबन्धेनपुरुषेतण्डुलस्यकर्मतासंबन्धेनधात्वर्थपाकेन्व

ल.दं. पवारणायावश्यकत्वे पितृत्वराजपुरुषस्तोकं पचतीत्यत्राच्छेदसंबन्धेनान्वयादतिप्रशक्तिवारणायाभे
१७१ दातिरिक्तसंबन्धावच्छिन्नत्वं नामार्थनिष्ठप्रकारतायां निवेशनीयम्। नचविशेषणविभक्तेर्नभेदार्थ॰
कतयानिर्वाहः कर्मत्वकर्मीभूतभारस्यैव्याख्यावसरे भीष्मादीनां स्वरूपमेकमेकत्वेपि विशेष्यसंबन्धि॰
विभक्त्यैकरूप्यम्। तदेकयोगक्षेमत्वात्। केवलानां च प्रातिपदिकानां प्रत्ययः परश्चेतिति नियमेन प्र
योगानर्हत्वात्। यथैश्वरसुहृदः स्वयं निर्धना अपि तदीयधनेनैव तत्फलभाजस्तद्वद्गुणा अपीत्य
नभिहितसत्त्वेवद्गताकैयटेनविशेषणविभक्तेः साधुत्वमात्रार्थकत्वस्य स्पष्टमेवाभिधानाद्विभक्त्य रामः
र्थं प्रातिपदिकार्थविशेष्यकनामादिप्रकारकबोधस्य समानाधिकरणविशेष्यविशेषणभावस्थले १७१

अननुभवाच्च । अतएव बहुव्रीहौ भेदेनेति पश्यते । तथा च तत्पक्षे तस्यार्थराजसंबन्धिनः पुरुषादावन्वयो नानु
पपन्नोऽत आह । किं चेति । विग्रहत्वादिति । अत्र वदन्ति विग्रहस्येति गृह्यमाणसमानार्थकत्वं न विगृह्य
माणसमानार्थकत्वं च व्यक्तिविशेष्यकत्वे सति यत्प्रकारकबोधजनकत्वं तद्विशेष्यकतत्प्रकारकबोधजन
कत्वम् । प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासविग्रहत्वोपपत्तेः एवं ति व्याकरणमधीते इत्यादौ नाप
त्को वैयाकरण इत्यादितद्धितानां तद्विग्रहत्वानापत्तेः । तत्र विग्रहविगृह्यमाणजबोधविषयपदार्था
नां विशेष्यविशेषणभाववैपरीत्यस्य स्पष्टत्वात् । नापि तज्जन्यबोधीययावद्विषयविषयकबोधजनक
त्वम् । पुरुषस्य राजेत्यस्यापि राजपुरुषविग्रहत्वापत्तेः किन्तु विगृह्यमाणवाक्यीयपदघटितत्वे सति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल०६० ज्जन्यबोधनिवर्त्यं यावत्संशयानिवर्त्तबोधजनकत्वं तद्वाच्यम्। प्राप्तमुदकं यमित्यादेर्जन्यबोधस्य
७२ प्राप्तोदकादिजन्यबोधनिवर्त्त्याया यावत्तदुदकं प्राप्तिकर्तृ नवा ग्रामः प्राप्तिकर्म न वेत्यादयः संशयास्तन्नि
वर्त्तकत्वस्य भूतले घट इति वाक्यजबोधस्य भूतले घटो न वा भूतलं घटवन्न वा इत्यादि संशयनिवर्त्तक
त्वपत्तत्वान्नानुपपत्तिः। द्वितीयाकर्मनेत्ये तावन्मात्रस्य घटकर्मानयनकृतिरित्येतद्विग्रहत्वार
णाय पावदिति। तस्मात् नयनं घटकर्मकं न वा कृतिर्नानयनानुकूला न वेत्यादि यावन्तः यातिवर्त्तस
यानिकत्वात्। राज्ञः पुरुषः सुन्दर इत्यादिकावगाहिनक्तविग्रहत्वमिष्टमेव। वस्तुतस्तु शक्तिग्रहा राम:
र्थं प्रयुज्यमाने विग्रहे तात्पर्यविषयपदप्रयोगासंभव एव। पार्थिवस्य परमाणुनित्यादेरोज परस्य ७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादिविग्रहेन्नवारणाय सत्यन्तम्।तच्छिरतत्वंचतदादिविषयकप्रतीत्याविषयत्वं यदितुतस्यविग्रहत्वत
त्वमिष्टंतदा सत्यन्तंनदेयमेवपुरुषस्यराज्ञेत्यादिजन्यवोधस्यपुरुषोराजस्तत्त्ववान्नवापुरुषेराज
स्वत्वंनवाइत्यादिसंशयानांराजपुरुषइत्यादिजन्यवोधनिवर्त्यानामनिवर्त्तकत्वान्नतत्वम्।स्वंव
टःकर्मत्वमानयनंकरोतिरित्यादेरपिघटकर्मकानयनेत्यादिविग्रहत्वम्।कुम्भंकरोतीत्यादीनांउ
कर्त्तलाक्षणिकानामेवन्यायनस्यकुम्भकानादिविग्रहत्वम्।प्रकृतेचराजपुरुषइत्यादिसमासज
जन्यवोधनिवर्त्योवावन्तं उक्तसंशयाभतन्निवर्त्तकवोधजनकस्यराज्ञःपुरुषइत्यादिवाक्यजन्य
वोधेसत्त्वान्नविग्रहत्वानुपपत्तिरिति।अन्यथेत्ति।समासार्थकत्वाभावेइत्यर्थः।तस्माद्विग्रहवाक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· न्यात्। तस्मादिति। तत्समानार्थकवाक्यस्यैव तच्छक्तिनिर्णायकत्वादिति भावः। संबन्धलक्षणाक
७३ ल्पं दूषयति। नान्य इति। नीलोत्पलादिसमासमग्राह्य समासविभक्तिकेत्ययहायोक्तां विशुद्धविभ
क्तिकधातुप्रातिपदिकयार्थयोः स्तोकं पचतीत्यादावभेदान्वयदर्शनादाह प्रातिपदिकार्थयोरिति।
तथा च भेदसंसर्गावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धिं प्र
ति विशुद्धविभक्तिरहितपदजन्योपस्थितेर्हेतुतया तस्या राजपुरुष इत्यादिसमासोत्तरपदार्थे पुरुषा
दौ सत्त्वादभेदान्वयो दुर्वार इति भावः। ननु विशुद्धविभक्तिराहित्यं व्याससमाससाधारणं न विशेष्य रम:
वाचकपदस्य विशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वम्। विशेष्यपदाप्रकृतिकत्वस्य ७३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नदुत्तरत्वस्य तदुत्तरत्वेनाप्रतीतेः समन्वीयमानत्वस्य वा नीलो घट इत्यादौ नीलपदोत्तरविभक्तौ घटपद
दोत्तरविभक्तिभिन्नायां सत्त्वेन तत्राभेदान्वयानुपपत्तेरिति चेत् । अत्र केचित् । विशेषणपदे विशेष्य
वाचकपदप्रकृतिकविभक्तिसजातीयभिन्नविभक्त्यप्रकृतित्वमेव विवक्षितं विभक्तिराहित्यम् । सजा
त्यं च प्रथमात्वादिना सुत्वादिना वा । नीलो घट इत्यादौ विशेषणविभक्तेर्विशेष्यविभक्तिभिन्नत्वे
पि सजातीयभिन्नत्वाभावेनोक्तविवक्षितविभक्तिराहित्यस्य तत्राक्षतत्वादिति वस्तुतस्तु विशेषणवि
भक्तेः साधुत्वार्थमिति मते विशेष्यवाचकपदोत्तरविभक्तिविवक्षितं त्वं स्वार्थाभिन्नार्थकत्वम् । नीलो घट इ
त्यादौ विशेषणविभक्तेर्निरर्थकतया तत्र विशेष्यविभक्तिविवक्षितविभक्तिर्द्वितीयादिरूपैव तद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ प्रकृतित्वस्य विशेषणवाचकपदे सत्त्वान्न तदसङ्ग्रहः। स्वं नीलघटमानयेत्यादि समस्तस्थले स्वविशे॰
१७४ षणविभक्तेरेवाभावेन तादृशविभक्त्यप्रकृतित्वं विशेषणवाचकपदस्याव्याहतम्। अतएव चै
त्रस्य जनस्य धनमित्यादौ नाभेदान्वयाकाङ्क्षा। तन्न विशेषणविशेष्यविभक्त्योर्विभिन्नसंख्या॰
र्थकत्वात्। नापि स्तोकं पचतीत्याद्यसङ्ग्रहः। पूर्वकल्पे तु विशेषणवाचकविभक्तेस्तिङ्विजाती॰
यत्वे। नीलाकाङ्क्षायास्तत्रासत्त्वेन तदसङ्ग्रहः स्यादेव। सोऽप्रातिपदिकार्थयोरिति प्रकृता॰ 174
भिप्रायेणैव तथा चोक्तविरुद्धविभक्त्यप्रकृतिप्रातिपदिकार्थनिष्ठाभेदसंसर्गा। वच्छिन्नप्रका स्मः
रतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे प्रातिपदिकान्यतरजन्योपस्थितिः। कारणमि १७४

त्यर्थाल्लवं सुस्थमिति । ननु तथाश्रुतिविरुद्ध विभक्तिराहित्यरूपया भेदान्वयबोधाकाङ्क्षान्वैवेत्तत्रस्य सतस्यध
नमित्यादौ नदापत्तिरित आह । प्रपञ्चितमिति · विभक्त्यर्थमन्तर्भाव्य नामार्थान्वयस्वोकृतस्यापत्तिरिति
तत्रोक्तम् । तस्यापि सार्थक विभक्त्यप्रकृतित्वमपि विशेषणवाचकपदे निवेशनीयमत्र तात्पर्यम् । मीमां
सकैरपि विशिष्टशक्तिपक्षोऽभ्युपेय इत्याह · अतएवेति · समासे एकार्थीभावस्य सर्वसम्मतत्वादेवेत्यर्थ
ः भक्षणमुद्दिश्येति । क्वचित् जोहविःशेषान् भक्षयन्तीति विहितभक्षणमनूद्येत्यर्थः । एकप्रसरताभ
ङ्गापत्तेरिति · उद्देश्यविधेयभावेनान्वये पृथगुपस्थितेर्नियामकत्वे ननु तत्स्वरोधेन तत्सम्पुपगमे विशिष्टो
र्थोपस्थितिजनकत्वरूपैकप्रसरताभङ्गापत्तेरित्यर्थः । तैर्विशिष्टशक्त्यनभ्युपगमेऽपि विशिष्टलक्ष

ल०द० क्षणायाअभ्युपगमेनैकप्रसरतायास्तन्मतासिद्धत्वात्।नचोद्देश्यतयान्वयेयद्वृत्तयोगप्राथम्यादीनां
७७५ वि।ध्येयतान्वयेचतत्तद्योगादीनांतन्त्रतयाऽत्रतदभावात्कथंतदायादनमितिवाच्यम्।स्मातिता॰
त्पर्येप्रथमोभङ्गः परिणतोब्राह्मणइत्यादावुद्देश्यविधेयभावेनअङ्कुरानुभविकत्वयापकत्वयोगा
दीनांप्रामिकत्वात् तादृशशाब्दबोधेअसमस्तपदजन्योपस्थितेर्हेतुतातुनदासोदरः पुरुषोरा
जपुरुषः सुन्दरइत्यादिनस्तथाबोधउपपत्तेः तत्रच प्राथम्यविशिष्टंभक्षणानन्तरमेवविधीयतेशद्द॰ 175
न्यानतनश्चप्राप्ताप्राप्तविवेकेनप्राथम्यविधिः यर्थवस्यतीतिसिद्धान्तादितिभावः।मङ्गैरिति।तत्रहीं रम:
ज्याशेषभक्षणत्वित्वविशिष्टयत्किञ्चिद्दृष्टविधानेकिम्वानित्वविशिष्टाशेयाऽविधामितिसंशयेप्र ७७५

कृतादिजन्याशेषगाण्डोऽशेनस्विष्टकृतोऽकृतत्वादन्यापिशेषभूतात्रित्वविशिष्टाङ्गैरेवाक्षिष्टकृद्भवनंप्र
कमिति पूर्वं। पक्षे शेषभूतानि कानि चिदङ्गान्यन्यत्र घात्रित्वविधानेऽपि कप्रस्तरताभङ्गापत्तिस्तस्मात्कल्प
सूत्रोक्तात्रित्वविशिष्टाङ्गानां विधानमिति निष्कर्षितं दशमाध्यायस्य पञ्चमे तृतीये पादे इत्यर्थः। कल्पसूत्रोक्ता
नि हयाद्येकादशाङ्गानि तु हृदयं १ जिह्वा २ वक्षो ३ यकृत् ४ वृक्कौ ६ सव्यं दो ७ उभये पार्श्वे ९ दक्षि
णा श्रोणि १० गुदमिति तत्र श्रोणिर्दक्षिणांसः सव्यो वा गुदं तृतीयमिति। ननु एकप्रस्तरत्वं न विशिष्टार्थो
पस्थितिजनकत्वं किन्तु समासघटकपदयोरुद्देश्यविधेयभावेनान्वयबोधकत्वमिति व्युत्पत्तिसङ्ग्राय
नोरिति तदर्थः। ननु विशिष्टार्थोपस्थितिजनकत्वभङ्गापत्तौ रीति तादृशव्युत्पत्तिशरीरं तु समासघट

ल·द· पदार्थनिष्ठविधेयताभिन्नरूपितोद्देश्यतासम्बन्धेन शाब्दबुद्धिं प्रति समासघटकपदजन्योपस्थितिः प्रति
१७६ बन्धिकेति। न च ताद्दृशप्रतिबंध्यप्रतिबन्धकभावकल्पने गौरवमिति वाच्यम्। सर्वत्र विशिष्टकल्प
नापेक्षया केवलप्रतिबध्यप्रतिबन्धकभावकल्पने एव लाघवात्। वस्तुतस्तु पञ्चोद्देश्यविधेयंभा
वेनान्वयबोधस्तत्पदार्थोपस्थितिसमवहितं तदानुपूर्वीविरहादेव तथान्वयासम्भवान्नोक्तप्रति
बध्यप्रतिबन्धकल्पनापि। एवं प्रसरतातु प्रथमपदार्थान्वितभक्षाविशेषकबोधानुभव एवेति नोक्त
यत्प्रासीमांसके विशिष्टशक्तिरप्युपपेत्व नत्वाह। सङ्गच्छते चेति। अमूर्त्तत्वेन क्रियाभिः कारक एमः
त्वेन द्रव्यैः सममपि संबन्धासंभवात्। न च तन्त्रौ यया ज्योतिष्टोमकरणीभूतप्राकरणिकद्रव्याणां १७६

176

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ यत्कर्तृयंताऽऽख्यातप्रयोगकेनेति प्रतिरुद्रकत्वेन तदन्वयो नासंभावित इति वाच्यम्। तथा सति शक्तिः
कारकमिति निधानभङ्गापत्ते रित्यपि वाच्यम्। तदेवाह प्रयन्त्वितमिति। आदाविति। आख्यातार्थनि
रूपणावसर इत्यर्थः। उपसंहरति तस्मादिति। जैमिनीयैरपि वदतां नैयायिकमतस्य युक्तिकत्वं ध्व
न्यते। समानार्थत्वात्तद्बोधादिति। समानार्थत्वं च व्याससमासयोः समानविशेष्यप्रकारकबोधजनक
त्वं तद्बोधादित्यर्थः। उक्तविग्रहवाक्यतर्गतराजशब्दस्य सर्वान्विलाक्षणिकत्वोक्तविग्रहत्वभ्रान्तिः।
संबन्धार्थकस्य षष्ठ्यन्तस्य तु संबन्धप्रकारकबोधजनकत्वान्न विग्रहत्वमेवं चित्रगावोपस्येत्यादेरपि इ
त्याशयं प्रकाशयति यद्यपीत्यादि मीमांसकाऽऽस्यनेन। स्वत्रा ह्यभ्युपगत इति। नेनाहि शेषो बहुव्रीहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· रित्यधिकारेप्रथमान्तिकस्यद्वितीयाश्रितेत्यादिनाउक्तस्यसमासाविधीयते· यद्यपिविशेषणंविशेष्ये
१७७ णेत्यादिनातस्यापिसमासउक्तएवतथापिनासौप्रथमाशब्देनोद्दिष्टइतितन्निकस्यशेषत्वमवि
कल्पमितिभावः॥उक्तस्यैवेति· चित्राणांगवामयमित्यादेरेवेत्यर्थः॥एवकारेणप्रथमान्तचित्रादिपद
घटितस्यव्यवच्छेदः॥उपदर्शकपदस्याविवरणमर्थबोधकमिति॥आख्यातंतिङन्तम्·॥तत्रतिङन्तघ·
टितेविवरणेइत्यर्थः॥व्यत्यासमेवाहतथाहीत्यादि·॥ननुत्तत्वापितिपःकर्तृलक्षकतयाश्रकरण
रूपव्यापाराश्रयइतिबोधात्समानार्थत्वमङ्के॥नञाह॥क्तप्रत्ययइति·॥कारकाणांकर्त्रादीना णमः
म्·प्राधान्येनसुबन्तविशेष्यत्वम्·कारकाणांभावनायाश्चप्राधान्यंप्रकृतिप्रत्ययार्थयोरितिन्याये १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेतिभावः। शक्तिमत्त्वाद्विशेषादिति। शक्तिमत्त्वमेकार्थीभावः। सिद्धान्तासिद्धेरिति। सिद्धान्तिनस्स्वामी
मांसितार्थस्यासिद्धिरज्ञस्य नोपयोगित्वमित्यर्थः। तथाहि निषादस्थपतिं याजयेदिति श्रूयते। तत्र निषा
दस्थपतिशब्दः किं षष्ठीतत्पुरुषो बहुव्रीहिर्वा न कर्मधारय इति संशये कर्मधारये पूर्वविद्याध्ययनक
ल्पनागौरवाद्बहुव्रीहौ वाक्यलक्षणायां गौरवाच्छायघात्षष्ठी तत्पुरुषस्येति पूर्वपक्षे तत्पुरुषस्यापि
पूर्वपदलाक्षणिकत्वया कर्मधारयापेक्षया गौरवाद्वाध्ववात्कर्मधारय एव। पूर्वं विद्याध्ययनस्योनस्काल
कल्पत्वेन तादृशगौरवस्य फलमुखत्वया दोषत्वादिति सिद्धान्तितम्। तद्विरुध्येत भवन्मते तत्पुरुष
स्वीकारेपि गौरवानवकाशादिति भावः। तदानीं तेनेति। नाहत्य कुरुजत्यशाद्बोधाव्यवहितप्राक्क्षण

ल.द. त्तिशक्तिग्रहनिरासात्तनञ्त्वाहिरङ्गभावचिन्तनप्रयुक्तलाघवमादायेत्यर्थः तदेव विशदयति । अयं भाव इति
१७८ निषादस्थपतीतिस्थपतावित्यनेनान्वितम् । निषादानामिति । निषादसंबन्धिस्थपतावित्यर्थः तत्र षष्ठ्यर्थसंब
न्धान्तर्भावेणैकार्थीभावाभ्युपगमात् निषादस्वामिकइति । स्थपतिशब्दस्वामित्वार्थकतया निषादाभिन्नस्वा
मिके पर्यवसितेत्यर्थः तत्रान्यपदार्थान्तर्भावेण समुदायशक्तिस्वीकारात् । नानार्थ इत्यस्यार्थः त्त्यानेकार्थोपस्थ
स्थितौ ज्ञातायामिति शेषः न्यायेनैतस्य कतात्पर्य्यमिति सन्देहे सतीति । तत्कल्पनायाम् । तात्पर्य्यक 178
ल्पनायाम् । पूर्वोपस्थितत्त्वेति । समासघटक प्रत्येकपदशक्त्युपस्थापितार्थमात्रविषयककर्मधारयी राम:
यशक्तिग्रहस्यान्तरङ्गत्वेन प्रथमोपस्थितार्थस्योपस्थितिलाघवान्निषादस्थपतिशब्दस्य तात्पर्य्यमवसी १७८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यते तेन विशेषावगतिः। ननु बहिर्भूतपदार्थविषयकशक्तिग्रहो ऽप्यस्यापि तेन तदुपस्थिते विलम्बिनत्वादित्याः
रववाडलार्थः। निराकाङ्क्षव्यपेक्षे वसामर्थ्यम् मूलकृदभिप्रेतमित्यर्थ इदमपि प्रमाणम्। अन्यथा जहत्स्वार्थवृत्ति
पक्षे पदानामानर्थक्यात्प्रत्येकपदवृत्त्यार्थोपस्थिर संभवेन क्लृप्तन्मूलकशक्तिग्रह इति तस्य स्तरऽ [illegible]
थनमसङ्गतमेवस्यादिति वोध्यम्। ननु नान्यर्थस्य कल्प्यते। अवधार्यते। ननु संयोगो विप्रयोगश्चेत्यादि
नाहरिणा संयोगादीनां विशेषावगतिहेतुत्वं वोध्यते तत्कथं तात्पर्यस्य विशेषावगतिहेतुत्वमिति चेन्न नाः
नाशक्तुपस्थितानेकसंयोगादिनाराकस्मिन्नवधारिते नान्यर्थे विशेषावगतिरिति शब्दार्थस्यानवच्छेद इति
भावार्थस्य वक्ष्यमाणत्वात्संयोगादीनां तात्पर्यग्राहकतायामेवोपयोगेन तात्पर्यस्य विशेषावगतिहेतुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. तं सर्वं सम्मतमेवेति भावः। ननु प्रत्येकपदवृत्तिपक्षे नायासेनैवाधिकरणसिद्धान्तोपपत्तौ विशिष्टशक्तिपक्षेता
१७९ दृशसिद्धान्तसमर्थने क्लेशो दुष्परिहर एवेत्यत आह। परेषामपीति। प्रवेशयेति वदतीति। तात्पर्यस्यैव लक्षणा
नियामकतया तत्त्वे वाक्यलक्षणया समासान्तर्बोधस्य दुर्वारतया तात्पर्याभावे नैव तदवगतेर्वारणीयत्वा
दित्यर्थः। ननु निषादस्थपतिं याजयेदित्यत्र स्थपतिशब्दः स्वामिपर्यायः श्रेष्ठपर्यायो वा। उभयथाप्यसौ
गुणवचनः। तस्य च जातिवचनन्निषादपदेन कर्मधारये तत्र गुणवचनस्यैव पूर्वनिपातनियमेन स्थपतिनि 179
षादमिति प्रसज्येत। ननु निषादस्थपतिमिति स्यात्। किं चोभयथापि स्थपतिशब्दार्थस्य नित्यसंबन्धिसापेक्ष राम:
त्वेन षष्ठीसमास एव न्याय्यो न तु कर्मधारय इति कथमुक्तसिद्धान्तसङ्गतिः पक्षद्वयेपीत्यत आह। द्विगीति। १७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदर्थस्त्वितरावास्तव्यस्ताद्धितेऽङ्गदर्शनाच्चेति सूत्रं इत्यन्तरोपसंग्राहकं प्रणीतं महर्षिणा तच्चाशबरस्वामिनाकू
टं स्थितिनिषादानामेवोपकारकं भार्य्याणामेवं च तन्निषादानामेव स्वामितिभाष्ये व्याख्यातं तथा च कूटदक्षि
णाल्लिङ्गित्कर्मधारयत्वे निर्णीते स्थपतिशब्दस्य राजदन्तादित्वात्परनिपातो वोध्यः। संवन्धाकाङ्क्षानिवृत्ति
रप्यर्थतो निषादानां। सत्वत्वाभाद् पपद्यतावलाघवादिति विचारस्तु कथंचित्संभवमात्रेणेति सर्वमनवद्य
म्। इति श्रुवरामारद्वराः समाशक्तिनिरूपणम्॥ ॥प्रसक्तादिति। समासे खलु भिन्नैव शक्तिरिति ग्रन्थे
नस्यतायाः शक्तेनिरूपेक्षणीयत्वादिति भावः। अग्रहीते इति कान्पदार्थोपस्थितेः शाब्दबोधस्य चादर्शनात्त
द्धर्मावच्छिन्नविषयकशाब्दबुद्धिं प्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविषयकं तद्ज्ञानं कारणम्। वृत्त्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ यदज्ञान्यपदार्थोपस्थितिर्व्यापारः। तांविदानन्दनुपपत्तेः। ननुशक्तिमत्त्वेनज्ञातंपदम्। अतीतानागतशब्दानुसंधा
९८० नाच्छाब्दबोधानुदयप्रसङ्गात्। इतिचशक्तिलक्षणाभेदाद्द्विधा। तत्रार्थेपदसंकेतःशक्तिःअस्मादंपदमिम
मर्थंबोधयत्वितियद्विशेष्यकेश्वरेच्छात्मकः। अस्मात्पदादयमर्थोबोध्यइत्याकारकपदार्थविशेष्य
केश्वरेच्छारूपोवाविनिगमकाभावात्। तयावार्थबोधकंयत्पदंवाचकमितिव्यवह्रियते। आधुनिकेनसंके
तःपरिभाषातयार्थबोधकंपदंपारिभाषिकम्। यथानदीवृद्ध्यादिपदम्। लक्षणातुशक्यसंबन्धः 180
तत्कल्पिकाचमुख्यार्थबाधोऽन्विततात्पर्यानुपपत्तिः। तथाहिगङ्गायांघोषइत्यत्रगङ्गापदस्यघोषाधा रामः
रत्वंस्वार्थकत्वेनतीरतात्पर्यकत्वऽन्वीतेतात्पर्यविषयतीरस्यप्रतीतिंविनाऽनुपपद्यमानेनतीरशाह ९८०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोधेन तत्स्मृतिराक्षिप्यते सा च गङ्गा यद्वृत्तिं विनानुपपद्यमाना तज्ज्ञानमाक्षिपति तद्विषयगङ्गापदनिरूपि
ता वृत्तिर्न शक्तिस्तस्या ज्ञानाभावादतस्तीरस्मारिकाकाचिदन्यैव वृत्तिः कल्प्यते सा च गङ्गापदशक्यसामी
प्यरूपैव तेन रूपेण गृह्यमाणा तीरं स्मारयत्यनुभावयति च शक्यादशक्योपस्थितिस्तु न लक्षणा। उपस्थिति
हेतोस्तस्यास्तत्त्वासम्भवात्। नापि स्वबोधसंबन्धः समाश्रयशक्तिनिरूपिणी कत्युक्तेः। नन्वीश्वरेच्छायाः श
क्तित्वासंभवः। घटपदस्यापि पटे शक्तत्वप्रसङ्गात्। घटपदाद्घटो बोद्धव्य इतीच्छाया विषयतया घटेपि सत्
त्वात्। यदि चेच्छारूपापि घटपदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं शक्तिरिति न घटपदे ति
प्रसङ्गः। तद्विषयत्वेपि तादृशविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वस्य तत्रानभ्युपगमादिति चेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल०द० तदापि गङ्गायदात्तीरवोधस्यापि जायमानत्वे न सम्भाव्यविषयकेश्वरेच्छीयगङ्गापदजन्यवोधविषयत्वप्रकार
१८० तानिरूपितविशेष्यत्वस्य तीरसत्वाच्छक्त्यैवनिर्वाहे कृतं लक्षणयेति चेन्न· गङ्गापदघटितत्वव्यवहारस्य तीरएवाव
सत्वेन गङ्गापदजन्यवोधविषयतावच्छिन्नप्रकारतानिरूपितविशेष्यतासंवन्धेनेश्वरेच्छेन गङ्गादिपदानांप्र
वाहादौ शक्तिस्तीरादिनिष्ठविशेष्यतायाश्च गङ्गादिपदजन्यवोधविषयत्वप्रकारतानिरूप्यत्वेपि न तस्या
स्ताद्दृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वमपि शुद्धविषयतात्वेनैवेत्यभ्युपगमान्न तया लक्षणा 161
न्यथासिद्धिर्नापि विषयत्वलक्षणसंवन्धस्य पदजन्यजनकभावेवसत्वेपि तत्रातिप्रसङ्गः। तत्र लक्ष्यो शम:
पस्थितिनियामकः साहस्मकः संवन्धो गौणी तदतीरत्वशुद्ध लक्षणेति व्यवह्रियते। शुद्धापि यादान १८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणाभेदेन द्विविधा । तत्र मुख्यसंसृष्टान्यार्थोपस्थापकत्वमुपादानत्वम् · शक्याविषयकलक्ष्यार्थोपस्थि
तिजनकत्वं लक्षणत्वम् · । यष्टीः प्रवेशय गङ्गायां घोष इत्यादिके यथायथमुदाहरणे · । तत्राद्यायाजहत्स्वा
र्थेत्युच्यते · । तद्भेदान्तराणि त्वन्यतोवधार्याणि इति नैयायिका आहुः । मीमांसकास्तु अकृयुक्त्या लाक्ष
णिकपदस्य वाचकत्व · । परिहानेपि नेच्छायाः शक्तित्वम् । ईश्वरस्यैवानभ्युपगमात् · । नन्विच्छाया मोभूरी
यत्वमनुपादेयमेवं चाधुनिकसंकेतज्ञानादपि शाब्दबोधोदयेन तादृशसंकेतस्य वृत्तितो निर्वाहः । आधुनि
कसंकेतत्वेन तात्पर्यस्यापि वृत्तित्वप्रसङ्गस्तु न ।। यदार्थोपस्थितिनियामकसंकेतस्यैव वृत्तित्वेन तस्यात
त्वात् · । तज्ज्ञानस्य साक्षादेव शाब्दबोधजनकतया पदार्थोपस्थित्यात्मकव्यापारानपेक्षणात् · ननु ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या.र. पस्मापितार्थस्यप्रकारतयादिनानवधारणात्॥आधुनिकसंकेतेति॥प्रियादिपदेषुतु आधुनिकसंकेतस्य
१८२ प्रागभावरि तस्याडित्यादिव्यक्तिशाब्दधीजनकपदार्थोपस्थितौनियामकत्वेनतद्वृत्तित्वस्यसोलभ्यादि
तिचेदेवमपिसंकेतस्यनिरूपयोगितद्वीयोक्तविषयत्वस्याप्यात्तसमवायितया संबन्धत्वासंभवेनपदार्था
नुपस्थापकत्वाद्वृत्तित्वानिर्वाहात्॥तस्मात्पदपदार्थयोर्वाच्यवाचकभावनियामकःसंबन्धःपदार्थान्तरमेव २४
नाप्यसौसमवेतोऽभावादावपिसत्त्वात्॥किंतुवैशिष्ट्याख्योनसंबन्धान्तरेणवर्तत इत्याहुः॥वाच्यत्वंयथान 182
समवायितथावक्ष्यतइतिवदताविंधितिकृतापितन्मतमेवानुसृतम्॥तदेतत्तत्त्वानामसत्तानिनिराकर्तुमाः रामः
दौतत्स्वरूपप्रदर्शनमित्याशयेनमूलमवतारयतिः तस्याःस्वरूपमिति॥तस्याःशक्तेः॥निर्विषयाणांतेषां १८२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कथं घटादिर्विषयः तत्राह । चाक्षुषेति । तथा चौपचारिकविषयत्वं न विषयत्वं न विरुद्धमिति भावः । चा
क्षुषपदं त्वाचादिप्रत्यक्षस्याप्युपलक्षणम् । इन्द्रियचाक्षुषादिकरणतायामनादित्वमिन्द्रियजन्यपूर्व
बोधध्वंसकालिकत्वम् । चक्षुरादिव्यापकत्वं पुरःस्थप्रयत्नानपेक्षत्वं वानन्तजन्यत्वमव्यावर्तकत्वात् । श
ब्दबोधकारणतायां तु स्वजन्यबोधसमानाकारपूर्वस्वबोधध्वंसवत्त्वम् । तत्र बोधकारणता । अर्थबोधकत्वं
म् । ज्ञायमानं पदं कारणमभिप्रेत्येदम् । अन्यथा विषयतयान्वयानात्मसंहेतुतावच्छेदकतेत्यर्थो बोध्यः । संके
तज्ञानं विनोक्तशक्तिग्रहासंभवेनावश्यापेक्षणीयत्वस्यैव शक्तित्वमस्तु तद्धेतोरेवेति न्यायादित्याशङ्क्य ते न लि
ति । तस्या शक्तित्वे हेतुराधुनिकेत्यादि आधुनिके । एतत्कालसंकेतविशिष्टे । तदभावात् । निरूढानादित्व ·

ल.द. विशेषणाविशिष्टबोधकारणाभावादित्यर्थः। विशिष्यसत्वेऽपि प्रकृते विशेषणाभावप्रयुक्तविशिष्टाभाव
१८३ सत्वेन तदप्रतियोगित्वरूपकारणत्वं न संभवतीत्यर्थः। नन्वनादिभूतेति प्रसिद्धिप्रदर्शनमात्रार्थकम्। ननु त॰
च्छक्तिशरीरे प्रविष्टं पेन तद्रूपेण तस्य हेतुतासंभाव्येत किन्तु बोधकारणत्वेनैव। प्रकृते तेन रूपेण तज्ज्ञाने॰
वाधकाभाव इति चेत्स्यादेवं यदि संकेतग्रहमन्तरेणैव तज्ज्ञानं भवेन्न तु तत्संभवतीत्याह अन्यथेति। संकेत
निरपेक्षस्यैव तस्य शाब्दबोधहेतुत्वे इत्यर्थः। लाक्षणिकेति। नचावयवनादिभूतस्यापि बोधजनकत्वस्य सत्वा॰ 183
दिति भावः। आवश्यकत्वादिति। अवश्यापेक्षणीयज्ञानविषयत्वादित्यर्थः। अस्य। संकेतस्य। प्रवका रामः
रेण बोधकत्वव्यवच्छेदः। संकेतस्य स्वरूपतः कारणत्वं ज्ञातस्य वा तस्यापि सामान्यतो विशेषरूपेण वा १८३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुत्वमभिमतमिति विकल्प्य दूषयति। उच्यत इति। स्वरूपेणेति। स्वस्य यद्रूपमिति। व्युत्पन्नस्य स्वसाधारणधर्मेणासंकेततत्त्वेनेत्यर्थः। दण्ड। त्वेन घटे दण्डइव ज्ञानाविषय एव संकेतः संकेतत्वेन हेतुरितियावत्। अगृहीतशक्तिकादिति। अज्ञातसंकेतादित्यर्थः। अर्थबोधप्रसङ्गादिति। संकेतस्य तत्र विद्यमानत्वादितिभावः। सामान्यत इति। जनकाजनकसाधारणधर्मेणेत्यर्थः। संकेतत्वेनेति। ईश्वरीयसंकेतत्वादिनाविशेषधर्मेणेत्यर्थः। तज्ज्ञानशून्यानामिति। संकेत ईश्वरीयत्वमविदुषामित्यर्थः। बोधोदयेनेति। अर्थधीजनकत्वज्ञानमात्रादेवार्थबोधोदयेनेत्यर्थः। यद्यपि संकेतत्वेन संकेतज्ञानकारणता वादिमते नेश्वरीयत्वादिना विशेषस्तथापि गयासार्वेश्वरस्येतितद्ग्रन्थालोचनपेश्वरीयत्वादेर्निवेशोस्तदभिमत इत्यभिप्रेत्य दूषि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लः दः तमिमित्येयम् ।लौकिकमीमांसकानामिति ।वैदिकानां चकथंचिदीश्वरबोधसंभवादुक्तं लौकिकेति ।अ
१८४ थवालौकिकानां व्यावहारिकपदार्थमात्रविषयकज्ञानवतां पामराणामित्ति यावत् ।मीमांसकानां चेत्य
र्थः ।तत्तदर्थधीजनकत्वग्रहवतामेवेत्येवकारेणाभिरूढसंकेतज्ञानवत्त्वव्यवच्छेदः ।सत्वतज्ज्ञानस्याना
मित्यस्यैवानुवादः ।स्वरसत्य पाटस्तु सुगमः ।इदं च शक्तिस्वरूपप्रकारणाप्रदर्शकम् ।तज्ज्ञानम् ।संकेत
प्रकारकज्ञानम् ।तथा ।हेतुः संकेतितत्पदस्यैवार्थधीजनकत्वेन पदनिष्ठतत्तत्कार्यांसकेतस्यावच्छे
दकत्वादिति भावः ।ततोपीति ।अर्थधीजन ।कतावच्छेदकत्वस्य हेतुतावच्छेदकत्वकल्पनायस्तथा राम॰
ऽर्थधीजनकतात्वेन हेतुताकल्पनायाश्चौचित्येन वैयाकरणोक्तसिद्धेरित्यर्थः ।इदं पदमेतदर्थमभिनीतं पि १८४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तसंकेतवदित्याकारकपदविशेष्यकज्ञानस्यार्थधीजनकतावच्छेदकत्वावच्छिन्नसंकेतप्रकारताकज्ञानत्वे
न हेतुत्वकल्पनापेक्षया ऽदंपदमेतदर्थधीजनकमितिज्ञानस्यैवार्थधीजनकतातावच्छिन्नप्रकारकज्ञानत्वेन हेतु
त्वकल्पनालघीयसीतिभावः। संकेतज्ञानादेवेत्येवेनार्थधीजनकत्वग्रहरूपदासः। अस्य। बोधकत्वग्रहस्य।
व्यभिचारः। व्यतिरेकः। तत्रापिसंकेतमात्रादर्थबोधस्थलेपीत्यर्थः। इच्छाग्रह इति। इदंपदविशेष्यके तदर्थबो
धकत्वप्रकारकेच्छाग्रह इत्यर्थः। अवगाहनेनेति। विषयीकरणेनेत्यर्थः। ज्ञानेच्छादिविषयकज्ञानस्यतद्विष
यविषयकत्वमितिनियमादितिभावः। स्वातन्त्र्येणेति। इतराविशेषणत्वेनेत्यर्थः। प्रकृते चेच्छांशे विषयि
तयाविशेषणीभूतबोधकत्वस्येनतज्ज्ञानेनविषयीकरणादितिभावः। अभ्युपेत्येति। पारतन्त्र्येणापिबोध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. कता ज्ञानस्य शाब्दधीहेतुत्वे इत्यर्थः। इष्टापत्तिनिराकरणायाह। नेदं तावदिति जनकमितीति। अस्मात्पदा
१८५ दिति। एतत्पदजन्यैतदाश्रयकबोधविषयोऽयमर्थ इत्याकारकवर्तमानग्रहवत इत्यर्थः। पदविशेष्यका
र्थधीजनकत्ववाच्यग्रहे विषयमेतदंशेऽर्थधीजनकत्वावगाहन इदम्। पदमेतदर्थधीजनकत्वेन वुद्धजनेनेति
ग्रहासम्भवात्तदपहायास्मादित्याकारकबोधग्रह उक्तस्तस्मिंस्तु न तस्य प्रतिबन्धकतायाश्चाभावानवगा
हित्वादिति भावः। अतत्रह्यापत्तेरिति। घटादिशाब्दबोधापत्तेरित्यर्थः। उक्तज्ञानस्य विषयविषयकत्वेपि नेति 185
न पदांशेऽर्थबोधकत्वं विषयीक्रियते येन शक्तिग्रहत्वं तस्य स्यात्। किन्तु बोधांशे तत्पदजन्यत्वस्यार्थांशे एम:
तादृशबोधविषयत्वमेव तथा। तेन तुल्यवित्तिवेद्यतया पदांशेऽर्थबोधकत्वमप्यवगाह्यत इति तु दुर्वचम् १८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुल्यवित्तिवेद्यत्वे मानाभावात् तत्प्रतिबन्धकस्य ग्राह्याभावावगाहित्वेनेदं तद्धीजनकमिति ज्ञानस्य जागरूकत्वा
त्। न च पदनिष्ठार्थधीजनकत्ववदर्थनिष्ठपदजन्यत्वधीविषयत्वाभिमतशक्तेर्विनिगमनाविरहाभयविधज्ञाना
द्वीधं बोधस्य सर्वानुभवसिद्धत्वाच्च। कार्य्यतावच्छेदककोटौ व्यवहितोत्तरत्वनिवेशाच्च न परजन्यशाब्दबोधे
व्यभिचारः। स्वं च द्वितीयशक्तिग्रहरूपा तस्मात् शाब्दबोधापत्तिः सुकरैवेति वाच्यम्। तथा सति नेदमर्थधीजनक॰
मिति ग्राह्याभावानवगाहिनो॰ प्रतिबन्धकग्रहस्योपन्यासवैयर्थ्यात्। ग्राह्याभावानवगाहित्वेऽप्युभयविध॰
शक्तिग्रहप्रत्यन्वयव्यतिरेकाभ्यामापत्तिः। बन्धकत्वोपगमेन तदुपन्यासस्य सार्थक्यसंपादने तु तज्ज्ञानस्यासम्भ
वरूपत्वाशयेन दूषयति नेदं तद्धीजनकमिति। बाधेन अप्रामाण्यज्ञानानास्कन्दितमनिरुक्तनिरासायात्मकप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰द॰ तिबन्धकसम्भावेनेत्यर्थः। न तु रागद्वेषासंभवात्। अर्थविशेष्यकयदजन्यबोधविषयत्वग्रहासम्भवादित्यर्थः
१८६ अन्यथेति। बाधग्रहेऽपि जायमानस्य रजतं शुक्तमनेनेतिग्रहस्य इदंविशेष्यकरजतप्रकारकग्रहत्वे भ्रान्तित्वस्ये
त्यनेन दोषाभाववत्त्वमपि सूच्यते। भ्रान्तत्वापत्तेरिति। तदभाववति तदवगाहिज्ञानत्वस्यैव तत्त्वादिति भावः।
अत्रेदं चिन्त्यम्। एवेदं पदमेतदर्थं बोधयत्विति संकेतज्ञानं· मै[illegible]स्वाच्छाब्दबोधस्तत्र बोधकता शक्तिज्ञानस्य हेतुता
वादिमते व्यभिचारो दुरुद्धरस्तव। न चात्र संकेतज्ञानमेव बोधकतानाज्ञानमित्युक्तमेवेति वाच्यम्। सविषयके
ज्ञानस्य तद्विषयाविषयकत्वेऽपि तद्विशेष्यांशे तत्प्रकारेण तेन विषयीक्रियते घटमहं जानामीत्यनुव्यवसाये रामः
न घटत्वप्रकारकत्वघटविशेष्यकत्वयोरेव विषयीकरणात्। अन्यथा भ्रान्तिज्ञानस्य भ्रान्तत्वापत्तिरिति वा १८६

186

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येर्वस्यात्॥ अतएव शब्दं विनापरोक्षतान्ययो विषयसंसर्गज्ञानपूर्वकत्वस्यपदपक्षकानुमानेन सिद्धावपि नेत
रपदार्थे भिमतं पदपदं संसर्गसिद्धिस्ताद्दशसंसर्गज्ञानपूर्वकत्वानुमानेन तत्पदार्थे इतरपदार्थतात्पर्यावि
षयसंसर्गस्याविषयीकरणादित्यस्यरसात्पदार्थपक्षकानुमानमवतारितम्॥ पक्षवरमित्रेणेति॥ व्युत्पत्तिया
रुकमाह॥ इदं चेति॥ शक्तिरेवे नाभ्युपेयेनं वोधकत्वं चेत्यर्थः॥ पित्रादीत्यादि नामपरिग्रहः॥ गृह्यतइति॥ कार्यता
वच्छेदककोटौ स्वातन्त्र्यनिवेशात्संकेत ज्ञानाजन्यसंकेतज्ञानात्मकवोधकताज्ञानेव्यभिचारइतिभावः॥
पूर्वोक्तां लाक्षणिकोच्छेदापत्तिमिष्टत्वेन परिहरति॥ नापीति॥ शक्तिग्राहकेति॥ शक्येइव शक्तिग्राहकव्यव
हारादेर्लक्ष्येपितुल्यत्वादित्यर्थः॥ ननु शक्यलक्ष्यव्यवहारानुपपत्त्या लक्ष्यव्यावृत्त्यैवसावाच्या॥ तथाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰६॰ लक्ष्योपस्थितये लक्षणा इति स्वरूप्यकत्वेन कथमुक्तापत्तेरिष्टत्वमत आह किन्त्वेति शाब्दबोधानङ्गत्वादिति ।
१८७ घटादिपदे ऽर्थहि न शक्तिकस्य प्रत्यक्षाद्युपस्थितघटादेर्घटादिपदाच्छाब्दबोधानुत्पादन्यथ व्यभिचारेण॰
मत्यक्षाद्युपस्थितेः शाब्दबोधाजनकत्वादित्यर्थः । नन्वनापत्त्या तादृशगौरवं स्यादत्व्यमत आह अपि त्वेति ।
व्यभिचारो व्यतिरेके बोध्यः । तस्यैवोपपादयति । शक्तिजन्योपस्थितिमिति । अव्यवहितोत्तरत्वेति । तत्त्वत्वं
ध्वंसाधिकरणक्षणानुत्पत्तिकत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वम् । अत्र स्व
पदं शक्तिज्ञानजन्योपस्थितिपरम् । लक्षणाज्ञानजन्यपदार्थोपस्थितिप्रागवर्त्तिशक्तिज्ञानजोपस्थि राम:
तिजन्यशाब्दबोधे व्यभिचारवारणाय परिष्कृतम् । शक्यशाब्दबोधानन्तरभाविलक्षणाज्ञानजोप १८७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थितिजन्यशाब्दबोधेउक्तसंबन्धे व्यभिचारवारणाय सत्यन्तम्। प्रकृते लक्षणाज्ञानजोपस्थितिजन्यशा
ब्दबोधेउक्तसंबन्धेन शक्तिज्ञानजोपस्थितिवैशिष्ट्याभावेन तत्कार्यतावच्छेदकानाक्रान्तत्वान्न व्यभि
चार इति भावः। अनन्तेति। तत्तत्व्यक्तिविश्रान्तत्वेनाननुगततया तद्घटिताव्यवहितोत्तरत्वसंबन्धे
नोपस्थितिमत्त्वस्य कार्यतावच्छेदककोटौ निवेशे कार्यकारणभावानन्त्यमिति भावः। न्यायसाम्यादा
दर्कं चेति। प्रागवदेवेति। शक्तिज्ञानं विनापि लक्षणाज्ञानात्पदार्थोपस्थितेरेवं लक्षणाज्ञानं विनापि शक्ति
ज्ञानात्पदार्थोपस्थितेस्तयोरुपस्थितिहेतुतायां परस्परं व्यभिचारः। अव्यवहितोत्तरत्वसंबन्धेन तत्तत्का
रणवैशिष्ट्यस्य कार्यतावच्छेदककोटौ निवेशे च गौरवं तद्वदेवेत्यर्थः। ननु बोधकत्वशक्तिवादिनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· पि गङ्गापदं प्रवाहबोधकमिति। शक्तिग्रहात्तु लक्ष्यार्थोपस्थितिशाब्दबोधयोरपत्तिवारणाय कारणतावच्छेदक
१९८ कुक्षौ तत्तदर्थनिवेश आवश्यकस्तथा च लक्षणावादिमते तद्गौरवमित्याशयमभिनिराचष्टे। परस्परेति। गङ्गाप
दनिष्ठतीरबोधकत्वग्रहं विनापीति शक्यदर्शितादृशशक्तिग्रहे सति तीरबोधात्तयोः परस्परजन्यबो
धे व्यभिचारप्रतिरोधायेत्यर्थः। शक्तिभ्रमानुरोधेनेति। गङ्गापदस्य तीरे शक्तिभ्रमदशायां तीरोपस्थित्या
देः सर्वमतसिद्धत्वमपास्तं वा पितत्कारणतावच्छेदककोटौ तत्तदर्थनिवेशस्यावश्यकत्वादित्यर्थः। नवेति
लक्षणास्वीकर्तृभिरित्यर्थः। शक्तिज्ञानकारणतायां शक्तेः शक्तित्वेन निवेशे स्यादेवोक्तदोषः। किन्तु शक्ति एम:
त्वेनेति तत्त्वसंभावनेत्याशङ्कते। अथेति। वाच्यमितीति। शक्तिजन्योपस्थितावित्र लक्षणाजन्योपस्थि १९८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तावपि शक्तिलक्षणासाधारणवृत्तित्वावच्छिन्नजन्यत्वसत्त्वादिति भावः। शक्तिलक्षणेति। शक्तिभिन्नत्वे सति
लक्षणाभिन्नं यत्संबन्धि तत्त्वस्येत्यर्थः। शाब्दबोधानुकूले इत्यादि। शाब्दबोधजनिकाया पदार्थोपस्थितेः। पदवृत्तिः
ज्ञानजन्योपस्थितित्वादनुकूलेत्यर्थः। कारणतावच्छेदकत्वेऽभयस्य साधारणं दूषणमाह। गुरुत्वादिति। ज्ञास्य
दभिमतशक्तित्वमपेक्ष्य निरुक्तान्यतरादेर्गुरुत्वादित्यर्थः। द्वितीयदूषणान्तरमप्याह। शाब्दबोधहेत्विति शाब्द
बोधजनकत्वज्ञानस्य कारणतावच्छेदकोपस्थित्यधीनत्वेन तस्य च पदवृत्तिज्ञानजन्योपस्थित्यात्मकतया तज्ज्ञा
नस्य घटकवृत्तित्वज्ञानं विनाऽसम्भवेन कार्यकारणभावग्रह एव दुर्घट इत्यर्थः। तथा च वृत्तित्वग्रहे शाब्दबोध
पदार्थोपस्थित्योः कार्यकारणभावग्रहस्तद्ग्रहे च निरुक्तपदार्थसंबन्धत्वरूपवृत्तित्वग्रह इत्यन्योन्याश्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्व.द. गोक्तस्य वृत्तित्वासम्भव इति भावः। वस्तुतस्तु विजातीयपदार्थोपस्थितिजनकः पदपदार्थयोः संबन्धो वृत्तिर्वै
१८९ जात्यनिवेशाच्च। नाकाशोपस्थितिजनकस्यप्रवायां दाववति व्याप्तिः। तादृशवैजात्यपरिचायकं चन्द्रादवोधात्तु
कूलेति। ननु तेन रूपेणोपस्थितेर्निवेश इत्यन्तिमलक्षणस्यादुष्टत्वमिति। समाप्तीति। लक्षणाङ्गीकर्तुर
यीत्यर्थः। प्रवेशादिति। तथा च लक्षणाज्ञानस्यापि शक्तिज्ञानस्य शक्तिज्ञानत्वेनैव हेतुत्वेन न लक्षणाज्ञा
नजन्यलक्ष्यार्थोपस्थित्यादौ शक्तिज्ञानस्य हेतुतायां व्यभिचार इत्यर्थः। विषयमनिवेश्यैव यदि शक्तिज्ञान 189
पदार्थोपस्थित्योः कार्यकारणभावः केः सम्भवेत् तदा स्यादप्युक्तप्रकारः सम्भवतीत्याह। शक्तिज्ञाने राम:
ति। आवश्यकत्वादिति तदर्थविषयकोपस्थितिं प्रति तदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेन हेतुता १८९

याज्ञवद्दृश्यकल्पनत्वादित्यर्थः। आवश्यकत्वमेवाह। अन्यथेति। शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावेस॰
मानविषयकत्वानिवेशे इत्यर्थः। संबन्धाग्रहदशत इत्युत्मा लक्षणाज्ञानासन्न्यं बोधितम्। गङ्गापद इति। एवाक्तपार्थ
न्वितपिनबोधकत्व शक्तिगङ्गापदे ज्ञातत इत्यर्थः। तीरं बोधप्रसङ्ग इति। तीरोपस्थितेरतद्वारकशाब्दबोधस्यवापत्तिः
रित्यर्थः। नन्वक्तापत्तिवारणाय शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानां कार्य्यकारणभावे समानविषयकत्वनि
वेशोपि प्रकृते गङ्गापदं तीरलक्षकमिति लक्षणाज्ञानस्य शक्यवगाहिनः तीरविषयकत्वस्याप्रसत्त्वात्। तत॰
स्तीनोपस्थितेः शाब्दबोधे वा किं बाधकमत आह। अपि चेति। हस्तिपकस्मृतेरिति ज्ञानजन्यत्वसंयत्तये हस्तिनो॰
पि वाक्योपस्मृतिविषयता बोधिता। समूहालम्बनेऽन्यत्रालम्बनपदं विषयपरम्। इति निजत्वोपस्थितिरिति। तद्विष

ल॰द॰ पत्त्वावच्छिन्नवृत्तिज्ञाननिष्ठकारणतानिरूपितकार्य्यतावच्छेदकधर्मावच्छिन्नोपस्थितिरित्यर्थः। उक्तस्थले हस्ति॰
१९० पकोपस्थितेर्वृत्तिज्ञानजन्यत्वेपि न तन्निष्ठजन्यता हस्तिपकविषयकत्वेनावच्छिद्यते। नापि वृत्तिज्ञाननिष्ठज
नकतायां हस्तिविषयत्वेनावच्छेदकोक्तवृत्तिज्ञाने धर्मित्वे मानाभावादिति नोक्तापत्तिरिति भावः। प्रकृतोपयोगित
मर्थमाह। एवं चेति। तदंशविषयकत्वेन शक्तिज्ञानस्य तदुपस्थितौ कारणत्वाद् हेतुत्वे चेत्यर्थः। अस्मदुक्तिकमिति।
लक्षणाज्ञानस्य शक्तिविषयकत्वेपि तीरविषयकशक्तिग्रहात्मकत्वाभावादिति भावः। एतेनेति। द्विविधवृत्तिज्ञा 190
नस्यैकरूपेण हेतुत्वासम्भवप्रतिपादनेनेत्यर्थः। शक्तिप्रयोज्येति। लक्षणाज्ञानस्य शक्तिज्ञानाधीनत्वेन त॰ रामः
ज्जन्योपस्थितौ शक्तिप्रयोज्यत्वसत्त्वान्न लक्षणावादिमते हेतुत्वन्तरकल्पनेत्यर्थः। अनतीति। प्रसक्तस्येति। जन्य १९०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्यत्वस्य लक्षणाज्ञानाऽजन्योपस्थित्या विवक्षितविशेषणतावच्छेदकप्रकारकनिर्णयविषयाशक्तिज्ञानजन्यघटपद
शक्यवन्देश इत्याकारकविशिष्टवैशिष्ट्यावगाहिज्ञानानुव्यवसायात्मकबोधेपि सत्त्वात्तत्तोपि घटज्ञाद्वबोधाप
त्तिः। साक्षाज्जन्योपस्थितेरसङ्ग्रहश्च साक्षाऽजन्यत्वस्य तत्त्वेन लक्षणाज्ञानजन्योपस्थित्यसङ्ग्रहः इत्युभयसाधा
रणपम्। तस्य वक्तुमशक्यम्। स्वरूपसंबन्धरूपस्य तस्याननुगतस्योभयसाधारणपमनुत्तरमसंभावितमिति
भावः। अन्यथासिद्धिनिरूपकतानवच्छेदकशक्तिज्ञाननियतोत्तरवर्तितावच्छेदकधर्मवत्त्वरूपं। शक्तिप्र
योज्यत्वमुभयसाधारणमेव चमित्यपि केचित्। अधिकमग्रे वक्ष्यते। अनवदन्ति। अर्थबोधजनकत्वस्य
वस्तुतः। यदनिष्टस्य वाच्यवाचकव्यवहारनियामकशक्तित्वसम्भवदावोक्तकार्यकारणभावे गौरवत्वा·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰र॰ बाधवादिवर्त्तानन्तु तस्य न दूषणत्वसम्भवः। तथाहि शाब्दबोधस्प्रतिहि निज्ञानस्य हेतुतेति निर्विवादम्। सावच्छ
१९१ बद्धकार्य्यधीजनकत्वस्य रतिन्त्वेन सम्भवतीति तद्रूपापात्तस्याज्ञानविशिष्टशाब्दधीजनकतायामवच्छेदकत्वाः
सम्भवात्॰ स्वस्यैवस्वावच्छेदकत्व आत्माश्रयत्वात्। किञ्च प्रयोज्यप्रयोजकव्यवहारदृष्ट्या प्रयोज्यप्र
वृत्त्यनुमिति॰ प्रयोज्ये निष्ठघटानयनात्मद्ज्ञानस्य उपस्थितत्वाच्छब्दस्यैव हेतुता भासमवधार्य्य मारणायामसं
बद्धस्य कारणत्वात्तु पपत्त्या कल्प्यमानसम्बन्धस्य जनकात्मकत्वासम्भवः। स्वयमुपपद्यमानत्वेन तथैतः 191
स्य गृहीतमशक्यत्वात्। तस्माद्बोधकत्वे शक्तिः। एवं न्यायमतानुयायिनस्सा॥ स्मात्पदादेतदर्थबोधोभव रामः
तु इत्याकारके इच्छाविषयत्वस्यापि संकेतीय गङ्गापदजन्यत्वप्रकारतानिरूपितबोधत्वावच्छिन्नोद्दे ९०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपतानिरूपितविशेष्यत्वव्याप्त्यवच्छेदकतानिरूपिताधेयत्वसम्बन्धावच्छिन्नावच्छेदकत्वपर्य्यवसितस्य न श
क्तित्वम्। लक्षणोच्छेदापत्तेः। गङ्गापदात्तीरबोधोदयेन गङ्गापदात्तीरविशेष्यकबोधो भवत्विति इच्छाया
ऽपि भागवत्याः सम्भवात्। तादृशेच्छीयनिरूपितावच्छेदकताया लक्ष्ये तीरेऽपि सम्भवात्। तादृशावच्छे
दकतात्वेन शक्तिज्ञानस्य शाब्दबोधे कारणत्वकल्पने गौरवं च तीरादिनिष्ठावच्छेदकतायाः पूर्वोक्तविशेष्य
त्वव्याप्त्यवच्छेदकतानिरूपितत्वेऽपि न विशेष्यत्वव्याप्त्यवच्छेदकतात्वेन तन्निरूप्यत्वं किन्तु शुद्धावच्छेदके
नामान्तरेणेति न तादृशशक्तिस्तीर इति तु शिष्यप्रतारणामात्रम्। इच्छाविषयत्वं ज्ञानविषयत्वं वा शक्ति
रिति विनिगमनाविरहाद्द्वयाधिकमग्रे वक्ष्यते। तस्मात्पदपदार्थयोर्वाच्यवाचकभावव्यवहारनियामकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· संबन्धः पदार्थान्तरमेव। तस्य च लक्ष्यत्वं तस्यैव धर्मिग्राहकमानसिद्धत्वात्। तस्य बोधार्थं शक्यसंबन्धरूपलक्षणाङ्गी
१९२ कारेऽपि स्वीकार। आवश्यकः। तज्ज्ञानस्य शाब्दबोधे हेतुत्वात्तत्र कल्पनप्रयुक्तगौरवं तु फलमुखत्वान्न दोषावहम्॥
अन्यथानुपपत्तेश्च। अत एव शक्यलक्ष्यव्यवहारः स्वरसतः संगच्छते। अथवा शक्तिलक्षणाज्ञानयोः शाब्दबो
धं प्रत्येकरूपेणैव हेतुता। तथाहि। तत्काद्यं प्रति शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्र
कारतानिरूपिततदर्थविशेष्यताकज्ञानत्वेन हेतुता। शक्तिसंबन्धेन शक्यसंबन्धेन वा पदप्रकारकज्ञाने 192
शक्तेः संसर्गत्वात्। शक्तित्वनिष्ठावच्छेदकतायां पर्याप्तेरनिवेशेन शक्यसंबन्धप्रकारकज्ञानस्यापि तेन रू रामः
क्रोडीकारात्। परन्तु पदनिष्ठप्रकारतानिरूपितता दृशसांसर्गिकविषयतायामर्थविशेष्यतानिरूपितत्वा १९२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नभ्युपगमात्तच्छक्तिसंबन्धेन पदाभावप्रकारकबुद्धिप्रतिबध्यत्वं लक्षणाज्ञानस्येन्द्रियाणामित्यादिहरिपद्यस
त्वयमर्थः। इन्द्रियाणां चाक्षुषादिविषये घटादिषु पुरुषप्रयत्नानपेक्षा यथा योग्यता तदीयचाक्षुषादि
कारणतावच्छेदकरूपस्तितथार्थैः साकमपि पदानां संबन्धो योग्यता तच्छाब्दबोधजनकतावच्छेदकधर्मोऽनु
जनकत्वमेवोक्तयुक्तेरिति न तद्विरोधोऽपीति सर्वमनवद्यमिति। तत्राह कं च व्याकरणस्मृत्यादि। तदुक्तम्
शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सि
द्धपदस्य वृद्धाः इति। तत्र व्याकरणादिकं लाघवसहकृतमेव शक्तिग्राहकमिति नैयायिकमतम्। यतो लाघव
सहकृतेन लः कर्मणीतिसूत्रेण कृतावेव शक्तिः परिच्छिद्यते ननु कर्तरीति यथैव तथोक्तमेवंघणे शक्त्यादय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. इतिकोशेनापिलाघवसह कृतेन गुणास्य च शक्ति निर्धार्यते न तु गुणानि गौरवात्। गुणिनि बोधस्तु शुक्लादिप
१९३ देभ्यो निरूढलक्षणया वेति वतद्दुक्तेः। निरूढत्वं च प्राङ्निरुक्तम्। उपमानस्य तु सादृश्यज्ञानात्मकस्यातिदे
शवाक्यार्थस्मृतिद्वारा गवयपदादि गवयादिपदवाच्य इति शक्तिपरिच्छेदकम्। इदमेतद्वाचकमित्या
कारकात्वाक्यादपि तद्ग्रहः। आप्तत्वं च तदर्थविषयकयथार्थज्ञानवत्वम्। व्यवहारो यथा· प्रयोजक
वृद्धेन घटमानयेत्युक्ते प्रयोज्यवृद्धेनानीते घटे इत्वार्थयो घटकर्मकानयनादिकार्ययोर् घटकर्मकानयनादि [१]
ज्ञानसाध्यमित्यनुमिति व्यवहारे व्यवहर्तव्यज्ञानस्य हेतुत्वात्। अनन्तरं तद्धेतुजिज्ञासायामनुपस्थितं तत्वा रामः
क्यमेव तद्धेतुत्वेनावधारयति। तस्य चार्थासंबन्धस्य तद्धेतुत्वानुपपत्त्यार्थेन साकं पश्चाद्वाक्यस्य संबन्धक १९३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधारयतिसैवशक्तिरितिव्यवह्रियते।यद्यपि।प्रथमंतेनवाक्यस्यैववाक्यार्थेवधारितः स तथापिघटंनयगामानये·
न्यावापोद्वापाभ्यांपश्चाज्ज्ञातप्रत्येकपदशक्तिग्रहेणप्राग्ज्ञातवाक्यशक्तिग्रहेचन्द्रादेर्ज्योतिःशास्त्राध्यक्षजन्य·
ज्ञातयोजनादिपरिमाणापेक्षात्त्येनप्राथमिकाल्पपरिमाणग्रहइवाप्रामाण्यंपरिच्छद्यतेइतिनैयायिकाः।प्रत्येकपद
शक्तिग्रहेणैवाकाङ्क्षादिसहकृतेनवाक्यार्थबोधोपपत्तेरितिनदाक्षम्यः।अन्येतुवाक्यार्थशक्तिग्रहस्यप्रत्येक
पदशक्त्युपजीव्यत्वात्तेनतद्बाधासम्भवेनप्राग्ज्ञातशक्तिग्रहस्यैवबलवत्त्वमित्याहुः।वाक्यशेषात्तुयथावेदेर्दुहीतीत्यु
तयवपदस्यदीर्घशूकविशिष्टेआर्याणांप्रयोगात्कङ्गौम्लेच्छानांप्रयोगात्कशक्तिरितिसन्देहेयत्रान्या·ओष
धयोम्लायन्तेऽथैतेमोदमानाइवोत्तिष्ठन्तिइतिवाक्यशेषेणदीर्घशूकविशिष्टेतन्निर्णयः।विवरणस्ययथाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. क्रियाहेतुकत्वं तथा चान्वर्थं निरूपणाज्जकं मम्। इह सहकारतरौ मधुरं पिको रौति तीर्थ्याद्यौ प्रसिद्धसहकारादियदसन्नि
१९५ धानाच्चिकादिपदानां कोकिलादौ शक्तिपरिच्छित्तिरिति। ये या शक्तिर्नानार्थे संयोगादिना नियम्यते। तदु
क्तं काव्यप्रकाशे। संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। साम
र्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति। शब्दार्थस्यानवच्छेदे
सन्देहे सति। रामलक्ष्मणविशेषनिर्णयस्य जनकाः संयोगादय इति तदर्थः। शब्दोपस्थितानामनेकेषामेक
तरमात्रार्थतात्पर्यनिर्णयद्वारा तदर्थबोधजनकत्वं तेषामिति भावः। तत्र सवत्सा धेनुरवत्सा धेनुरिति च रामः
मेण संयोगविप्रयोगयोरुदाहरणे। साहचर्यं साहचर्यम्। सहस्थायोरेव प्रायशः सहप्रयोगादेव रामल १९५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मरणादित्यादावुभयोर्नानार्थयोरेकपदे वसाहचर्यग्रहणाधीनतात्पर्यग्रहेण विशेषावगतिरिति नान्योन्याश्र
यः।रामार्जुनगतिस्तयोरित्यादौ विरोधेनस्या।अञ्जलिना जुहोत्यञ्जलिनादित्यमुपतिष्ठते इत्यादौ धात्वर्थ
बलात्तदाकाराञ्जलिपरत्वं सैन्धवमानयेत्यादौ भोजनादिरूपप्रकरणेनस्या।अक्ताः शर्करा उपदधाती
त्यादौ तेजो वै घृतमित्यादि घृतादिगुणेन रूपाञ्चिह्नादक्तपदस्य घृतसाधनाञ्जनेन तात्पर्यावगतिः।रामोरा
जोभदग्न्य इत्यादौ जामदग्न्यपदसन्निधानेन रामपदस्य परशुरामपरता।स्वाभिरूपाय कन्यां देयेत्यत्राभिरूप
तरायेति सामर्थ्यादवगम्यते।पश्य निम्बं परशुनेत्यत्रौचित्यात्परशुपदस्य छेदनार्थत्वम्।भात्यत्र परमे
श्वर इत्यत्र राजधानीरूपदेशात्परमेश्वरपदस्य राजपरता।चित्रभानुर्भातीत्यत्र चित्रभानुपदं रात्रौ वह्निं दि

लो १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ वास्सूर्य्यस्य बोधकस्य। मित्रं भातीति मित्रो भातीत्यादौ व्यक्तेर्लिङ्गादाधेयस्य हृदोऽन्ते सूर्य्यस्य बोधकं मित्रपदम्
१९५ स्थलपद्मसती मनस्थाही मित्यत्र स्वारानात्परस्य वर्णस्यार्थनिर्णयः। आदित्यान्त्यत्वशात्वादिः यथा सुमित्र
मित्यत्र सुशब्दस्य कर्मप्रवचनीयस्य पूजाकत्वम्। सुषिक्त मित्यत्रोपसर्गस्यान्यार्थकत्वमेवं प्रणायक
इत्यत्र णत्वान्नग्रायनकर्त्तृबोधः। प्रनायक इत्यत्र तदभावान्नगतनायकबोध इत्याद्यूह्यम्। यत्तु पदपदा
र्थयोर्योऽर्थः सशब्दोऽयं शब्दः सोऽर्थ इतीतरेतराध्याससम्बन्धकं तादात्म्यं भेदव्याप्तृकमस्ति तस्य वाचकः
प्रणवः। ॐमित्येकाक्षरं ब्रह्मेति भेदाभेदयोर्दर्शनात्। आद्ये भेदस्योद्भूतत्वविवक्षया षष्ठी। अभेद॰ रामः
स्योद्भूतत्वविवक्षया त्वन्ये प्रातिपदिकार्थे प्रथमा। सम्बन्धः पदतदर्थयोर्वाच्यवाचकव्यवहारनि॰ १९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यामकः। शक्तिर्नतु संकेतः पदार्थान्तरं चेति भट्टानुयायिमतं तत्तु न साधीयः। अध्यासमूलकस्यासत्तत्तस्य संबन्ध
त्वासंभवात्। भेदाभेदयोः परस्पराभावरूपतया विरुद्धत्वेनैकत्रासम्भवाच्च। तस्यापि तस्याध्यासस्सम्भवेपि
सर्वेषां तयाध्यासे मानाभावात् घटपदनाशेपि घटस्योपलम्भमानतया तयोस्तादात्म्यस्यासम्भवदुक्ति
कत्वात् च। न च पाकरक्ते प्राक्तश्यामे पिपाकोत्तरमपमिदानीं तत्र्यामइति प्रतीतेर्भेदाभेदो न विरुद्धा
विति वाच्यम्। अव्याप्यवृत्तीनां तेषामेकावच्छेदेन वृत्तेरभावात्। अतएव तत्र देशकालावच्छेदक
भेदेनैवायमिदानीं तत्र्यामो वृक्षो मूलेन कपिसंयोगीति न तु तदवगाहिनी घटोयं न श्यामो वृक्षो न क
पिसंयोगीति प्रतीतिः। किन्त्वभेदवादे घटपदनाशे घटनाशापत्तिरेवं शब्दवदर्थस्यापि श्रोत्रेन्द्रियग्राह्यता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्र॰द॰ याः शब्दस्य चक्षुरादीन्द्रियग्राह्यतायाश्चापत्तिरिति वक्तव्याकोयः। शब्दस्य यथा न नित्यत्वं तथा वक्ष्यते। नचात्य
१९६ न्तभेदे घटो घटोऽन्यन्ताभेदे घटः घट इति सामानाधिकरण्यादर्शनाद्भेदाभेदवादोपपत्तिरिति शक्त। शब्देघ
ट इत्याद्यनुभवाद्घटेन शब्दश्च घटेन घट इत्याद्यनुभवाच्चाभेदस्यैवासिद्धेः। ॐ मित्येकाक्षरमित्यादौ त्वक्षरप
दस्य तत्प्रतिपाद्ये निरूढलक्षणया सामानाधिकरण्योपपत्तेर्न चाक्षरस्योङ्कारसमानाकारत्वस्य तयाभेदोपादा
न परतयोपपत्तेश्चेत्यन्यत्र विस्तरः। सा च शक्तिस्त्रिधा योगो रूढिर्योगरूढिश्चेति। प्रकृतिप्रत्ययात्तिरूपि 196
तार्थे या शक्तिः स योगः। तन्मात्रेणार्थबोधकपदं यौगिकमिति व्यवह्रियते। यथा पाचकादि पदं तद्धि प्र रामः
त्ययोः पाकादौ कर्त्रादिकारके च व्युत्पन्नत्वात्। अवयवार्थाप्रतीतौ केवलसमुदायस्य तत्तदर्थे या शक्तिः १९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सारूढिस्तयार्थबोधकं पदं रूढम् । यथा मणिनूपुरादिः । अश्वगन्धादिपदन्तु कदाचिदोषधिविशेषसमुदायश
निरूपितशक्त्यौषधिबोधकः कदाचित्तु अश्वस्य गन्धोऽस्यामिति व्युत्पत्त्या वाजिशालादिबोधोऽवयवशक्त्येति योगि
करूढिः पृथङ्नोक्तौ तयोरेवान्तर्भावात् । रूढिर्योगापहारिणीति तु प्रकरणाद्यभावे लाक्षणिके तद्वाजि
शालादिरपरे । तत्रावयवार्थसंवलितसमुदायशक्तिरर्थबोधिका सा योगरूढिस्तयार्थबोधकं पदं योगरू
ढं यथा पङ्कजादिपदम् । तत्र पङ्काधिकरणकोत्पत्त्याश्रयपद्मत्वविशिष्टबोधात् । अनुपपत्तिप्रतिसन्धा
नं विनापि पद्मबोधान्न तत्र लक्षणावसरः इत्यादि प्रपञ्चितं प्रागेव । गङ्गायां घोष इत्यादौ गङ्गापदस्य ती
रे शक्यसामीप्यरूपलक्षणाग्रहे तदादितसंस्कारजन्यतीरादिस्मृत्या तीराधिकरणकघोषशाब्दबुद्धिर्ले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. क्ष्यव्यवहारान्यथानुपपत्त्या लक्षणायामथवश्यमभ्युपेयत्वात् । अन्वयानुपपत्तिप्रतिसन्धानं च तत्कल्प
१९७ नेबीजम् । ययोक्तकविनिराकाङ्क्षत्वमपि तद्बीजम् । यथा वदनं तस्या वदनं मुखमकुरवं भातीत्यत्रान्यासा
क्तिपत्र तादात्म्यसंबन्धावच्छिन्नवदनत्वावच्छिन्नप्रकारतानिरूपितवदनत्वावच्छिन्नविशेष्यताको
बोधो न संभवति । तादात्म्यसंबन्धावच्छिन्न । तादृशप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्द
बुद्धौ विधेयतावच्छेदकभेदस्य तन्त्रत्वादिति वदत्वा । वच्छिन्नार्थकवदनपदनिरूपिताकाङ्क्षा न व
दनपदे । तस्मात्तत्र वदनपदं लक्षणयाह्लादकपरं तदुपस्थिताह्लादकत्वावच्छिन्नस्याभेदान्वयो वदनेऽअ रामः
नुशासने बोधितनैराकाङ्क्ष्यमपि क्वचित्तथा । यथा हतनसीतापरित्यागः । सरलाकारमेरवल्लाम । वभुजे । १९७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथिवीपालः पृथिवीमेव केवलाम् । इत्यत्र भुजिधातोरवनवाचकस्यात्मनेपदसमभिव्याहृतभुजित्वावच्छेदेना
ख्यातबोध्यकर्तृत्वं नितपालनभुक्तिस्वरूपायोग्यत्वरूपेनेराकाङ्क्षः स्यभुजो नवन इति सूत्रेणावबोधनात् । तच्चके
वलपदे न तत्कालिकरामाभिन्नपृथिवीपालनकर्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकक
त्वयोगिनि व्यक्तिरभिधीयते । एवकारेण पृथिव्यन्ययोगव्यवच्छेदः । एवं च तत्कालिकरामाभिन्नपृथिवीपा
लकर्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वविशिष्टाभिन्नपृथिवीकर्मकभोगकर्त्ता
: पृथिवीव्यन्यस्त्रीकर्मकभोगाकर्त्तारामाभिन्नः । पृथिवीपाल इति न्यायमतयेवाक्यार्थबोधः । द्विरेफो मधुरं
रौति द्विकः । कूजति कानने इत्यादौ तु स्वरूपार्थवाचस्य लक्षणाबीजम् । किन्तु मालक्षितलक्षणोच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ लस्यसमासार्थरेफद्वयविशिष्टघटितत्वात्तस्याः। तथाहि। येन पुरस्तो णाद्विरेफादिपदस्य प्राणिविशेषे रूढि
१९९ र्न गृहीता किन्तु द्वौ रेफौ यत्रेति व्युत्पत्त्या रेफद्वयसंबन्धि भ्रमरपदे शक्यसंबन्धरूपलक्षणा गृहीता तस्य प्रा
णिविशेषविशेष्यकमधुराराववकर्तृत्वशब्दबोधस्य तात्पर्यविषयस्यानुपपत्त्या द्विरेफपदात्तु लक्ष्यो रेफद्व
यघटितपदवाच्यत्वलक्षणयोपस्थिते प्राणिविशेषे मधुराराववकर्तृत्वान्वय इति द्विरेफलेन भ्रमरपदमु
पस्थाप्यते तेन च प्राणिविशेषे मधुरारववकर्तृत्वान्वय इति द्विरेफपदेन भ्रमरपदमुपस्थाप्यते तेन च प्राणिवि
शेषोपस्थितिरिति तु न सम्यक् प्रत्ययानाभिनिवृत्त्पत्तेस्तत्र प्रत्ययार्थान्वयासंभवात्। भ्रमरपदे लक्षणा राम॰
साम्यापन्नतेन तदुपस्थितिलुप्तारि तस्यैवार्थप्रत्यायकत्वादित्यप्याहुः। स्वंद्विकः। कूजति कानने इत्यादौ १९९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधितो ध्यम्।। एवं गङ्गा हरति वै पुंसां दृष्टा पीतावगाहितेत्यत्र पीताऽऽऽपापं हरतीति वाक्ये गङ्गापदान्त्वशक्य
प्रवाहावयवावयवविभावसंबन्धरूपलक्षणाग्रहाहितसंस्कारसहकृतादुपस्थितो ध्व तज्जलपानकर्मत्वान्वयः
तात्पर्यानुपपत्तिरेव वा सर्वत्र लक्षणाबीजम्।। तदुन्नायत्वेनैवोक्तनैरावाध्यादीनामुपयोगः। अत एव यष्टीः
प्रवेशयेत्यादौ यष्ट्यादिपदानां तद्धारकत्वे लक्षणा।। यष्टीः प्रवेशकर्मत्वान्वयानुपपत्त्यभावेऽपि भोजना
दिप्रकरणोन्नीततात्पर्यविषयभोजनप्रयोजनकप्रवेशकर्मत्वानुपपत्तेस्तत्र जागरूकत्वात्।। एवं कृताःश्र
विंशति छत्रिणो यान्तीत्यादावप्यूह्यम्।। ननु।। छत्रिशब्दस्य पदद्वयघटितत्वेन वाक्यतया न्यायनयकथं तस्य
लक्षणा। शक्त्याप्रसिद्धेः। किंचात्रानेकसाधारणत्वं लक्ष्यतावच्छेदकम्।। मानीत्यस्यानन्वयापत्तेः। गन्तृत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द·
१५५

नोपस्थितस्यास्य गमनाकाङ्क्षाविरहादिति चेन्नत्र्यम्। सर्वास्विशक्तस्मनुपस्थितेचैकत्वार्थसंबन्धिलक्षकत्वा-
भ्युपगमेनोक्तदोषद्वयस्याप्रसक्तेः। नचवस्तुत्वपदवैयर्थ्यं तस्य तात्पर्यग्राहकत्वेन सार्थक्यात्। लाक्षणिकं-
पदं नानुभावकमिति सम्प्रदायः। स्वशक्यानुभवं प्रत्येकपदानां कारणत्वम्। इतरपदार्थेन सह स्वशक्यानु-
भावकत्वेन क्लृप्त्या क्लृप्तायादियदादेव तीरानुभवोपपत्तेः। शक्याद् शक्योपस्थितिर्लक्षणेत्यभ्युपगच्छ- ८६९
तां मते स्वजन्योपस्थितिसंबन्धेनैव पदस्यानुभावकतया तस्याश्च तीरादावभावात्तस्याननुभावकत्वमि-
ति तन्मूलम्। नचतन्नसंभवति। शक्योपस्थिततीरादेरप्रकृत्यर्थतया तत्र प्रत्ययार्थान्वयासम्भवात्। वस्तु- एमः
तस्तु लाक्षणिकं पदमुद्देश्यविधेयभावेनान्वयाजनकमित्येव तदर्थः। उद्देश्यविधेयभावेनान्वये शक्तेः १९९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्वेस्यैषतत्त्वात् । अतस्तवनाविधेयपरः शाब्दार्थ इति संगच्छते ।। किंच नेतुसंयोगस्य परसंयोगहेतुत्वं तात्पर्य्य ।
केतत्तु ः पदं जनयतीति सर्वलाक्षणिकवाक्येऽनन्वयानुभवापलापापत्ते र्लाक्षणिकपदस्यानुभावकत्वेन
वन्वयम् ।। गङ्गापदात्तीरमनुभवामीति प्रतीतेश्च तादृशप्रवादेनाभिनिवेष्टव्यम् ।। ननु स्वापत्ते शब्दप्रयोगे मि
त्यवाचकं पदं प्रयोक्ष्याम इति न्यायानीरघवाचक गङ्गादिपदाभिधानमनुचितम् ।। प्रयोजनजिज्ञासायां
पावनत्वादिप्रतिपत्तये तदिति यदि तर्हि वृत्तिं विना तस्य शाब्दभानासम्भवात्तदर्थं व्यञ्जनावृत्तिरपि तृतीया
ङ्गीकरणीया ।। अतस्त्वावत्तानां श्रियं हृत्वा ।। वारिवाहैः सह ।। निशम् ।। तिष्ठति चपलायत्नस्तकालः समुपाग
त इत्यत्र वासक्तानां श्रियमपहृत्य पुंश्चल्यो जलवाहकैः साकं रमन्त इत्यत्र तात्पर्य्यं ।। विषयस्त्वर्थान्तरालि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ ङ्गितार्थान्तरस्यापि प्रतीतिः। नानार्थवारिकापि-भ्रमधार्मिकविस्रब्धं सोद्य श्वा मारितस्तेन। गोदानीरनिकु
२०० ञ्जप्रतिष्ठितनिसर्गदृप्तसिंहेनेत्यादौ प्रतिभाजुषां सहृदयानां वस्तुबोध्यवैशिष्ट्यस्फूर्तौ सिंहप्रतीत्यन
न्तरं गोदातीरे भीरुभ्रमणायोग्यत्वप्रत्ययादिति केचन तच्च न। नालिङ्गितार्थस्य केवलयोगेव प्रतीत्य
सम्भवेपि लक्षणायास्तस्याः स्वरूपादत्वात्। व्यावनत्वादिप्रतीतिविशिष्टलक्षणयापि। शुद्धलक्षणा
येवानुपपत्तिपरिहारे विशिष्टतदनुपगमे बीजाभावश्चेति तत्त्वम्। यष्टीः प्रवेशयेत्यत्रापि तदनापत्तेः।८ 200
वाच्यार्थवैशिष्ट्यज्ञानकवृत्तेरनुमानेनापि गतार्थत्वाच्च। वस्तुतस्तु गाविप्रदानादेरिवेतोपितया तात्पर्य रामः
मेवानापत्तेः। ननु अन्वयबोधोत्तरमिति चेत्। बाधे व्यभिचारपक्षधर्मतयोः सन्देहेवा तयोरसंभवात्तदैवेते २००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्व्यञ्जनोद्व्यासासुपगमात् । इत्यन्यत्रापि विस्तरः स्यादिप्वनराद्युभावि कोल्लोकानां स्वरसवाहिक स्याद्दसुमथं प्रसे
र्मातिप्रत्यलदाव्यञ्जनादृशिसप्रसङ्गेदेवेति । स्तोकनिष्कृष्टमतमयलभ्यमूलमवतारयतिनान्वेति । एवम् । बोध
कत्वस्यैव शक्तित्वे । तत्रापि । अपभ्रंशात्मकभाषायामपि स्यादिति । तस्याऽपि बोधकत्वात् । इत्थं स्वादी
कर्यार्थेष्टादिवाच्यः तदन्वयव्यतिरेकानुविधायिशाब्दधीविषयत्वात्॰ यो यदन्वयव्यतिरेकानुविधायि॰
शाब्दधीविषयः स तद्वाच्य इति सामान्यव्याप्तौ घटादि दृष्टान्तः। न चानन्यलभ्यत्वमुपाधिः। तस्य वाच्यत्वरूपसा
ध्याव्यापकत्वात्। कर्त्रादारव्यातान्वयव्यतिरेकानुविधायिशाब्दधीविषये साधनाव्यापकत्वादिति वाच्यम्।
उक्तहेतुघटकशाब्दबुद्धेराख्यातजन्यत्वेन विशेषणेनानन्यलभ्यत्वस्य साधनव्यापकत्वेनोपाधित्वायोगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या. द. न्नचरत्वनूपासिद्धिः। धातोरेव प्रकृष्टजयार्थकत्वेनोपसर्गस्य तात्पर्यग्राहकत्वादिति वाच्यम्। धा-
२३० तोः प्रकृष्टजयार्थकत्वस्य ग्रन्थकृतैव खण्डनात्। नापि लक्षणातात्पर्यग्राहकत्वादेर्लक्ष्यतावच्छेदकको-
टिप्रवेशे गौरवात्। तस्मात् जयत्वादि धातोः शक्यतावच्छेदकं प्रकर्षत्वादिकं तूपसर्गस्यैवेति वाच्यम्
तथा च कृत्त्वसिद्धिः। किञ्चार्थस्य धातुलक्ष्यतेऽपि सर्वप्रत्वे नापि विनिगमनाविरहात् लक्ष्यतावच्छेद-
ककोटौ निवेशापत्तिः नापि तदर्थस्य धात्वर्थे तत्प्रकारकमनन्वयप्रसङ्गः। निपातातिरिक्तत्वस्योक्त- 230
व्युत्पत्तौ विशेषणागात्। एवं च प्रणिषृणत इत्यादौ धातोर्गत्यभावबोधकोऽर्थः। तदभावश्चोपसर्गार्थः। त- एम:
थाच गतोगत्यभावाभाववानिति धीः। गमनत्वप्रकारकबोधस्तु उत्तरकालिको मानस एवेति चेन्न। २३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्ययानामिति कुत्र्यते जोगरुक्तमयागमनाभाववानिति बोधस्यापि गगनकुसुमायमानत्वात्। किंच तथा वो
धात्रिंकारे तादृशस्थले प्रादीनामुपसर्गत्वमपि दुर्घटम्। क्रियाया अविशेषकत्वात्। क्रियाद्वारोपसर्गार्था
भावविशेषिकानन्त्योपसर्गार्थो गत्यभावविशेषकः। स्वादीनां द्योतकता व्यवस्थापनोक्तरीत्याप्युपसर्गाणां
मावसेयेति। निपातानां तु केषांचिद्वाचकत्वम्। तत्र नञर्थो निरूपितः। चार्थश्च समुच्चयादिभेदेन चतुर्वि
ध इति चार्थे द्वन्द्व इत्यत्राकरेषु व्यक्तमेव। इवार्थस्तु सादृश्यम्। तच्च तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम्। यत्तु
सादृश्यमनभेद्यघटितमिति तन्न त्वावतापि नञिवयुक्तमिति परिभाषणेन तस्यैवार्थत्वानपायात्। एत
द्बोधे चानुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वं नियामकम्। नातश्चन्द्रमिव मुखमित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ थैवन्द्रे गोवमुख्यमिति साधा स्वकारस्य त्वन्ययोगव्यवच्छेदोऽयोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेद॰
२३१ श्चार्थः। तत्र विशेष्यसङ्गतैवकारस्य पार्थ एव धनुर्धर इत्यादावन्यतादात्म्यव्यवच्छेदोऽर्थः। अन्यत्वं च स
मभिव्याहृतपदार्थप्रतियोगिकम्। तथा च पार्थान्यतादात्म्याभाववद्धनुर्धराभिन्नः पार्थ इति बोधः। पृ
थिव्यामेव गन्ध इत्यत्र पृथिव्यन्यसमवेतत्वाभाववान् पृथिवीसमवेतश्च गन्ध इति बोधः अत्र भावान्
यबोधानुपपत्तेः पृथिव्यामेवाकाशमित्यादि प्रसज्येत। एतच्चैवकारेणान्ययोगव्यवच्छेदबोधे वि
शेष्यवाचकपदविशेषणवाचकपदयोरन्यतरसमभिव्याहारो नियामकः। विशेषणासङ्गतैवस्य एमः
त्वेऽयोगव्यवच्छेदः। शङ्खः पाण्डुर एवेत्यादौ शङ्खत्वावच्छेदे पाण्डुरत्वसमवायाभावव्यवच्छेद २३१

बोधात्। नीलं सरोजं भवत्येवेत्यादौ क्रियासङ्गतैवस्थले ऽन्यत्रायोगव्यवच्छेदोऽर्थः। अन्तकेचित्। अयोगेअ
न्यानिकत्वव्यवच्छिद्येतेन चान्वयितावच्छेदव्यापकत्वं खराऽशस्य तत्र शक्तिः। तथा चोक्तस्थले सरोजनि-
ष्टाभावप्रतियोगिनीलत्वभवनाभाव इति बोध इति। वदन्ति। वस्तुतस्तु। अन्ययोगव्यवच्छेदायोगव्यवच्छेदयो
रेवैवकारस्य शक्तिः। अन्वयितावच्छेदकावच्छेदेवायोगव्यवच्छेदबोधे ग्रहणाध्ययनार्थकधातुसमभि
व्याहारस्यापि नियामकत्वाज्ज्ञानमर्थं गृह्णात्येवेति तन्नज्ञानं रजतं गृह्णात्येवेत्यादिप्रयोगाः। क्रियान्वय
समभिव्याहारे तु प्रायः सामानाधिकरण्येन तज्ज्ञानमित्यर्थे चान्वयितावच्छेदकसामानाधिकरण्येनायोग-
नायोगव्यवच्छेदोऽन्वयितावच्छेदकावच्छेदकावच्छेदेनत्वयोगव्यवच्छेद इति व्यवह्रियते विस्तरस्त्वन्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ बोधयार्थः। केवलोऽस्पष्ट इत्याद्यसम्भवेनापि तदर्थः। वैयाकरणमते त्वेवकारस्यावधारणात्मकज्ञानविशे॰
२३२ षद्योतकत्वमेव। सत्वसमभिव्याहृतपदार्थानुरोधादनेकविधः। यथा ज्ञातमर्थं गृह्णात्येवेत्यत्रावच्छेदकाव॰
च्छेदेनार्थग्रहणाभावानधिकरणज्ञानत्वप्रकारकज्ञानविषयो ज्ञानकर्तृकमर्थकर्मकं ग्रहणमिति बोधा
द्युक्तपदार्थघटितः सः परं त्वनेकधात्वादीनां तत्तदर्थे शक्तिकल्पनापेक्षया एवकारस्यैवासौ वितेत्यने यद्य
प्युपसर्गप्रकृत्यस्य वाचकोविशेषाणां सम्भवाद्योतकोपि वेति हरिणा पक्षद्वयमविशेषेणोक्तम्। यथ
कृता च तदेवानुसृतम्। तथापि कविक्लृप्तं विनोभेदाः केवलैरनिदर्शिताः। उपसर्गाणां सम्बन्धे द्यञ्जन्ते॰ रामः
प्रयत्नादिनेति तदुक्तौ। पसंतनिपर्यालोचनयोपसर्गाणां द्योतकत्वमेवावसीयते। अत्रेदं बोध्यम्। उपसर्ग २३२ 232
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्गत्वाघनाज्जतोपि प्रज्ञपतिरित्यादौ प्रकृष्टज्ञत्वबोधात्स्वत्यादिनैव तेषां द्योतकत्वम्। निपातानामपिवत्त्वादित्थे
ववाचकता यत्र नतामन्तरेणानिर्वाहः। क्वचिद्द्योतकत्वमस्तु केवलमनभ्युपगमे यथा शरे उस्त्रैरित्यादौ। क्वचि
न्नोभयी यथा यादृ पूरणमात्रार्थकेत्यादौ। तदुक्तं निपाता द्योतकाः केचित्पृथगर्थाभिधायिनः। आगमा
इव केपिस्युः सम्भूयार्थस्य वाचका इति। केचित्तु उभयान्यपि। तन्नूपसर्गत्वेन प्रादीनां निपातत्वेन चा
दीनां द्योतकत्वा वाचकत्वे इति स्थिते उपसर्गत्वावच्छेदेन द्योतकतां ननिपातत्वावच्छेदेनेति विवादः
सिद्धान्तानालोचनमूलकः। एवं निकर्मप्रवचनीयानां तूपसर्गवत्क्रियाविशेषकत्वम्। किन्तु क्रिया
गतसंबन्धविशेषकत्वम्। कर्मक्रियां प्रोक्तवन्तः कर्मप्रवचनीया इत्यन्वर्थसंज्ञाविज्ञानात्। अधिप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· स्यौसुसत्त्वारम्भसामर्थ्यं। देवस्त्राः जयमनुप्रावर्षदित्यत्र हेतुभूतजपनिरूपितलक्ष्यलक्षणभावसंबन्धस्य
२३३ वर्षणक्रियाति प्रस्मानुना द्योतनादेवमन्यत्रापिक्षेयम्। अतएवनन्ते सांसुपसर्गत्वम्। क्रियागतविशेष
द्योतको ह्युपसर्गाः उक्तंच। हरिणा क्रियायाद्योतको नायं संबन्धस्य न वाचकः। नापिक्रियापदाक्षेपी सं
बन्धस्य तु भेदक इति। तदर्थस्तु कर्मप्रवचनीयसंज्ञको न्वादः प्रजपतीत्यादावुपसर्गवन्न क्रियागतविशेष
स्य द्योतकः। विभक्त्यैवोक्तत्वाच्च न संबन्धस्य वाचकः। नापि प्रादेशं विलिखतीत्यादौ विशब्दवत् क्रियाक्षेप 233
कः। तत्र विनामानं क्रियाक्षेपात्। तथा सति तत्क्रियानिबन्धनाकारकविभक्तिरेव स्यात्। किन्तु विशिष्ट राम:
क्रियाजनितोऽयं संबन्धो विभक्त्यर्थ इति द्योतकः। प्रादेशं विमाय लिखतीत्यर्थः। प्रतीतेरित्यधिकमन्यतोऽव २३३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धार्य्यम्॥ ॥इति भूषणसारदर्पणे उपसर्गानिपातानार्थनिरूपणम्॥ ॥प्रक्रान्ते नामार्थनिरूपणे नामसु
दकशक्तेर्द्विनानामर्थं सुयोद्धारसंगत्या निरूपयिष्यन्नादौ प्रकृत्यर्थः प्रकारत्वाद्भावप्रत्ययार्थनिरूपणमि
त्याशयेनाह भावे त्विति। ष्यञादेरपि संबन्धरूपभावबोधकत्वात् तत्संग्रहार्थमाह। त्वतलोरिति। भावप्र
त्ययान्ति। भावविहिततद्धितप्रत्ययस्येत्यर्थः। हरिवाक्यं विवृणोति। अयमर्थ इत्यादिना। इत्युक्तमित्यस्य स्वस्मा
त्शक्तिनिरूपणावसर इति शेषः। संबन्धमिति। उत्तरपदार्थे पूर्वपदार्थसंबन्धस्यैव धर्मत्वेन भासमानत्वादि
ति भावः। भेदयस्त इति। तत्पक्षे हि राजपुरुष इत्यत्र राजकीयभिन्नः पुरुष इति बोधेन पुरुषां। शे राजसंबन्धा
भानादिति भावः। उपगव्यपत्यसम्बन्ध इति। उपगवपत्ययोर्जन्यजनकभावात्मकः सम्बन्ध इत्यर्थः। अन्वय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ बोध इति। ततश्च दोत्तरभावप्रत्ययस्य तत्तत्संबन्धवाचकत्वादिति भावः। अव्यभिचरितसंबन्धेत्विति। अव्यभिच
२३४ रितसंबन्धरूपजात्यैव भानोपगमेत्वित्यर्थः। तु शब्दसूचितारुचिबीजन्तु तस्यापत्यमित्यनेन षष्ठीप्रकृत्यर्थो
पत्यादिसंबन्धेपत्ये ऽणादीनामभिधानेन पष्ठ्यर्थसंबन्धानन्तर्भावे गौवत्सैकार्थीभावस्योपगन्तव्यतया तत्रा
पत्याद्यंशेसंसर्गस्यैव प्रकारतया तस्यैव तदुत्तरभावप्रत्ययार्थत्वेनज्ञातेस्तद्वाच्यत्वासंभवादिति। अर्था
न्तरघटितेरिति। धात्वर्थघटितार्थवृत्तिसाक्षिकाद्यन्तर्गतष्यञादेरित्यर्थः। तदर्थैकवर्चादौदेक्यादिरूपक्रि 234
F याया: क्रियाकारकभावसंबन्धस्य प्रकारतया भानादित्याशयः। रूढेरिति। कथमप्यभानयोगादर्थविशेष राम:
प्रसिद्धादित्यर्थः। अभिन्नरूपादिति। प्रत्ययान्तत्वे यिप्रत्ययलुका प्रकृतिसमानाकाराच्छ्रूयमाणार्थी २३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिधायोऽतिन्यायेन प्रकृत्यर्थान्वितप्रत्ययार्थाभिधायिन इत्यर्थः।अव्यभिचरितसंबन्धेभ्य इति।अव्यभिचरि
तोव्याप्तिनिष्ठात्यन्ताभावाप्रतियोगी संबन्धः समवायात्मको यस्य जात्यादेस्तद्विशिष्टवाचकेभ्य इत्यर्थः।ना
नः पाकादिनानाशब्दाश्रयनिष्ठाभावप्रतियोगिनां तत्त्वम्।उक्तेति।दामोदरत्वमित्यादौ जातिविशेषेण
भानादितिग्रन्थेनेत्यर्थः।द्वितीये यथेति।अभिन्नरूपोदाहरणं यथेत्यर्थः।तद्भिन्नात्तत्त्वे।पीत्यपिनातद्
तरभावप्रत्ययेन सर्वस्याभिधानं प्राप्नोतीति सूचितम्।अभेदप्रत्ययादिति।इदे चयथार्थे विहितस्य मतुपः
संबन्धार्थकत्वशङ्कानिरासाय।तृतीयमित्यस्योदाहरणं यथेति शेषः।सन्न् इति।सरूपदजन्यबोधेश
न्वर्थकत्वेऽपि सत्तायाः प्रकारतयाभानात्तदुत्तरप्रत्ययेनापि स्मैवाभिधीयत इत्यर्थः।तथा चोक्तस्यत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·पृ· ष्ठभावप्रत्ययान्तात्संबन्धाभानादुक्तवाक्येऽन्वये त्वनुपपत्तमिति भावः। ननु शुक्लत्वं सत्त्वमित्यादौ सतोऽपि शौ
२३५ क्ल्यादिसंबन्धस्य भावप्रत्ययेनानभिधानमप्राजपुरुषस्य त्वयापि तदभिधानं स्यात्तथापि राजादिनोपु·
रुषादिपदार्थे स्वत्वादिसंबंधेन प्रकारतोऽन्यस्यापि वक्तुं शक्यत्वादित्यत आह। दिगिति। तदर्थस्तु नि
वक्ष्यमाणभावे तस्य भाव इति सूत्रेण त्वतलादयो विधीयन्ते। ननु जातित्वादिना ज्ञातावेव संबन्ध
एवेति नियमस्तथा च यत्र प्रकृतेर्धर्मप्रकारको बोधः शास्त्रकृत्तन्मतेः सत्त्वधर्मत्वादभिधेय इति
रूढ्यापि भिन्नप्रकृतेः छेदनादितो संबन्धप्रकारकबोधस्याभावात्तन्मतत्वात्तस्यैव भावप्रत्ययेना· राम:
भिधानमुचितमिति नोक्तेषु भावप्रत्ययस्य शक्त्याद्यभिधायकत्वमिति। प्रकृत्यर्थविशिष्टत्वमात्रवर २३५

235

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नतेतिपाठः मात्रपदेनसंबन्धव्यवच्छेदः। तद्धितस्येति। इत्यादेरित्यर्थः। संबन्धानभिधायकत्वेनेति। प्रकृतिजन्यबो
धेनस्याप्रकारत्वादितिभावः। तदभिधानम्। संबन्धाभिधानम्। नस्यादिति। किन्तु दण्डस्यैवाभिधानस्यात्तद्वत
दभिधानमिष्टमितिभावः। ननुप्रकृतिजन्यबोधविषयत्वे सतिप्रकृत्यर्थप्रतियोगित्वं भावत्वं तच्च दण्डसंबन्धस्याक्ष
तमितिभावप्रत्ययेन तदभिधानं भविष्यतीत्यत आह। प्रकृतिजन्यबोध इति। उक्तार्थस्य भावत्वे तु दामोदरत्व
मित्यादौ जातिगुणसंबन्धस्यापि भावार्थताप्रसज्ये। तेतिभावः। क्रमेणदलद्वयव्यावर्त्यमाहात्यथेति।
एकतरदलमात्रोपादाने इत्यर्थः। नदुत्तरेति। घटादिपदोत्तरेत्यर्थः। तथा च घटत्वमित्यादौ द्रव्यत्वस्येव
त्वस्मतेदण्डीत्यादौ दण्डसंबन्धस्यापदार्थतया प्रकारत्वाद भावनेन नतस्य प्रत्ययार्थत्वसम्भव इतिभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल०द० द्वः।वस्तुतस्तुनञ्दलोपादानंव्यर्थमनुवादीनांसंवन्धार्थकतयादण्डीत्यादिवाक्यजन्यबोधेसंवन्धस्यैव
२३६ प्रकारत्वेनदण्डादीनांप्रकृत्यर्थेऽप्रकारत्वादेवानतिप्रसङ्गात्।मीमांसकैकदेशिमतेमत्वर्थीयानांसं
वन्धवाचकत्वेऽपितदाक्षिप्ताश्रयविशेष्यकबोधस्यैवतैरभ्युपगमेनतन्मतेऽपिप्रकृतिजन्यबोधविशे
ष्यांशेदण्डीत्यादीनामप्रकारत्वेनप्रयोजनाविरहादिति विभावनीयम्।संवन्धः प्रकारइति।अ
स्यायेनतस्यत्वादिप्रत्ययवाच्यतास्यादितिशेषः।मीमांसकमतमुपन्यस्यति। यस्त्विति।अत्रदण्डि 236
त्वमित्यादौस्वसमवेतत्वादिप्रकृत्यर्थसमवेतः।नीलत्वमित्यादौ।नीलादिगुणवत्त्वसम्भवतीत्य रामः
तोऽत्रः संवन्धस्यैवभावप्रत्ययवाच्यत्वमावश्यकमित्यर्थः।दण्डादेः प्रकृत्यर्थांशेप्रकारत्वेऽपिप्रकृ २३६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वर्थो समवेतत्वेनाभासत्वादिति भावः। संबन्धे वा एकत्वे नेति। तदस्यास्त्यास्मिन्निति मतुपः संबन्धे विधानेऽपि
दण्डी पुरुष इति सामानाधिकरण्यानुरोधात् संबन्धिवाचकत्वस्यावश्यकत्वादिति भावः। अगत्वभावादि
ति। संबन्धरूपेण भावत्वसंभवादिति भावः। आदावेति। एवं चैत्र देवदत्तादि सामानाधिकरण्यस्योक्तरीत्येवो
पपत्तेरित्यन्तग्रन्थे न स्वरूपो इत्यर्थः। तवा यीति। वैयाकरणस्यापीत्यर्थः। इदम्। क्वचिज्ज्ञात्यादिकवक
त्वं क्वचित् संबन्धवाचकत्वमित्येवंरूपं वैषम्यमित्यर्थः। तज्जन्येत्यस्य विवरणं प्रकृतिजन्येति। ननु प्रकृ
तिजन्यबोधप्रकारः प्रकृत्यर्थ इति साधारणो धर्मः सत्त्वभावप्रत्ययार्थो वाच्यो यद्यपि तिसारकूट इति
रसाधारणो धर्म इति बोध्यदिशम्। तस्मात्साधारण्यं वत ईतरण्ह इति त्वे सति सकलतद्वृत्तित्वम्। सत्यन्तो या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· दानान्न घटत्वत्वादेर्घटासाधारणधर्मविशेष्योपादानाच्च न व्यक्तित्वादिनिरासः। तेन रूपेण धर्मो भावप्रत्यय
२३७ यवाच्यः। तत्र तत्पदार्थस्य घटादेस्त्वादिप्रकृत्यैव लाभादनन्यलभ्य इतरा इति त्वादौ भावप्रत्ययस्य शक्ति
ः। न चापि तु इतित्वमभावः। साकल्यं प्रतिमत्त्वावच्छिन्नकलितमर्थः। इतरइतित्व प्रतियोगिकाभावस्यापि
प्रसक्तत्वादितरइतित्वत्वावच्छिन्नप्रतियोगिकाभावस्याप्रसिद्धत्वाद्घटत्वादौ बाधाच्च विशिष्टस्य शक्य
त्वासंभवात्। अत्र प्रकृतिजन्यबोधे येन संबन्धेन प्रतियोगितावच्छेदकधर्मस्य प्रकारता तेन संबन्धेन तद इति
त्वं इतिमत्त्वं च बोध्यम्। नातः कालादौ कालिकादिसंबन्धेन घटत्वस्य सत्त्वादपि क्षतिः। न वा घटत्वमित्या राम:
दौ वस्तुग्रीवादिमत्त्वस्य मानम्। प्रमेयत्वमित्यादौ नितरा इतित्वांशानवभासे प्रसिद्धत्वात्। किन्तु सक २३७

238

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणेयद्वृत्तित्वमात्रम्। स्वमेकत्वमित्यत्रैसाकल्यांशोपि। नत्वविशिष्टस्यानतिरिक्तत्वमनेनुगतान्यत्व:। विष्टम
त्वमित्यादौ विशिष्टसत्त्वे विशिष्टमादितरएहत्तित्वस्यमहत्त्वमित्यादौ सकलमहद्वृत्तित्वस्यमहत्परिमाणा
दौ वासम्भव इति वाच्यम्। तद्भिन्नत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदकतद्भिन्नान्यत्वान्ताभावप्रतियो
गितानवच्छेदकधर्मवत्त्वे द्रव्यत्वान्यतरेण दोषात्। नत्वनसङ्ग। उक्ते धर्मस्यासाधारणधर्मत्वेन वाच्य
त्वेप्युक्तासाधारणपक्षपरिमाणोपिसत्त्वादेकत्वमित्यादौ परिमाणबोधापत्तेरत आह। मूलेप्रयोगोपाधि
मिति। घटत्वादेः प्रयोगधर्मत्वाभावात् प्रयोगोपाधिपदं व्याचष्टे। सोपप्रयोग इति। शब्दप्रवृत्ताविन्यर्थः। उपा
धिर्निमित्तमिति न तु प्रयोगधर्मम्। तथा च घटत्वादेर्न तत्त्वानुपपत्तिरिति भावः। प्रकृत्यर्थप्रकारतामित्यस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ पन्न इति शेषः इत्याशयेन व्याचष्टे। प्रकृत्यर्थे प्रकारतयेति। तथा च प्रकृत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारतायो
२३८ यः शक्यप्रवृत्तिहेतुधर्मस्तत्त्वमिति मूलार्थः। स्वरूपेण नात्मापत्तिः। परिमाणादेरेकपदार्थासाधारणधर्मत्वे(
थैकपदप्रवृत्तिनिमित्तत्वाभावादिति भावः। तत्रोभयोपादाने गौरवात्। इदंत्वविशिष्टधर्मत्वेन त्वप्रत्य
यान्तादोषाननुभवाच्च। पर्य्यवसितार्थमाह प्रकृतिजन्येत्यादि। ननु लघुगुर्वीति। वस्तुतस्तु। नन्वात्मासाधारणे
नधर्मस्य वाच्यत्वेपि नोक्तापत्तिः। प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसमवायादिना संबन्धेनात्मा
धारणघटकतादिनाहानित्वजन्यत्वयोर्विलक्षणत्वात् प्रकृतेत्तपरिमाणस्य तेन संबन्धेनाहानित्वादिति रामः
वेन्। तथा सत्यनन्तशक्तिकल्पनावश्यकत्वे तत्तद्धर्मत्वेनैव धर्मे शक्तिरस्तु किमनया हानित्वादिगौरव २३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्हिस्तुतत्पातडुक्तेरुगणादीधितौ। एतर्थंत्वमित्यादौ प्रकृत्यर्थतावच्छेदकगुणान्भावप्रत्ययः प्रतिपादयति।
प्रतिनिष्ठतारूप्येण धर्मत्वेन वेत्याभिप्रेत्याह मूले धर्ममात्रमिति। अस्य तत्तद्रूपेण धर्मत्वेनवेति शेषः। ततश्च
प्रवृत्तिनिमित्तभूतं धर्मसामान्यमित्यर्थः। इति रीत्या ग्रन्थावतारणं तरोपीनमनमाभाति। अन्यथा प्रकृति
जन्यबोधप्रकारस्य त्वाद्यर्थत्ववादिना कस्तुर्यावादिमत्यमित्यादाविव घटत्वात्वमित्यादावपि गुरुधर्म
स्यत्वादिवाच्यतायाः स्वहस्तितत्वात्तत्र तद्वाच्यतायातेरसम्भवामिति। गुरुधर्मस्य वाच्यत्वे युक्तिमाह। तत्त
द्व्यक्तीति। तत्तद्वस्तुपल्लक्षितेत्यर्थः। घटत्वघटत्वादिरूपत्वादिति। घटघटत्वप्रदोत्तरत्वप्रत्ययार्थत्वा
दित्यर्थः। जातेरुक्तमतोऽस्मकत्वेभाद्प्रत्ययार्थत्वे च मानमाह। संबन्धिभेदादिति। उपाधिभेदादित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· भिद्यमानेऽपि गवेतरासमवेतत्वे सतीति सकलगोव्यक्तिसमवेतत्वरूपतद्धर्मस्तु परागाद्भिद्यमानार्थकेन प्रतीय
२३९ मानागवादिनिष्ठा व्यासक्तैव जातिरिति कथ्यते। तस्यां सर्वे शब्दा वाचकत्वेन व्यवस्थिता इत्यर्थः। उक्तार्थ
मेव विशदीकरोति। तामिति। उक्तस्वरूपामित्यर्थः। धात्वर्थमिति। आकृत्यधिकरणन्यायेन जातिमव्यक्ति
यामाहुरिति। यद्वा। अभिप्रायेणाह महानित्यान्तमविशेषणम्। काचिज्जातिः। कश्चित्संबन्ध इति। उक्तार्थे
वाक्यं प्रमाणयति। उक्तं चेति। गुणशब्दस्यैव शेषिकारणत्वरूपादिष्वेव प्रसिद्धत्वादाह। विशेषणतयेति। २५९
तथा च प्रकृते गुणपदस्योपसर्जनीभूतार्थपरमिति न विवक्षितार्थासङ्ग्रह इति भावः। पर्यवसितमाह राम:
तथा चेति। रूपादीत्यादिना रक्तादिगुणपरस्य ?क्तादेश्च सङ्ग्रहः। बोधजनकत्व इति। बोधजनकत्वमतः २३९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यर्थः। व्यपेक्षावादे क्रियाकारककारकभावसंबन्धेन कर्त्रर्थकर्त्रादौ धात्वर्थस्यैव प्रकारतया भानोपगमादिति भा
वः। सिद्धान्तमनुसृत्याह। संसर्गप्रकारकेति। स्त्र्ययादेति भावप्रत्ययो जातावेवेत्याद्यनियमादितिमादिभाव
॥ तत्रेति। जात्याद्यवाचकभावप्रत्ययेषु मध्ये इत्यर्थः। जातिवाचकानामिति। अर्थनिष्ठशक्तेरिति शेषः। गुणा
द्यात्मकभाववाचकनामांशुक्लादिशब्दानां जातेः शक्यतावच्छेदकत्वसम्भवा। जातिवाचकेति। अवच्छेदिका
इति। उपस्थितत्वाद् घटत्वादिजातिनिष्ठशक्तेः स्वेतरावृत्तित्वावच्छिन्ननिखिलस्ववृत्तित्वरूपाधेयतासंबन्धे
नावच्छेदिका इत्यर्थः। तेन न द्रव्यत्वादिजातिनिष्ठशक्तेर्घटावच्छिन्नत्वम्। अवच्छेदकानुगमकं च घट
त्वादिकमेवेति भावः। पर्य्यवसितबोधमाह घट इति रिति। यत्नान्तरमिति। ततश्च ह एव भावप्रत्ययवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. च्यइति मतान्तरमित्यर्थः। अथ कस्माद्गौरित्युच्यते। गौरित्येव हि गोर्गो विवर्त्तने इत्यादौ विध्यका इति निरुक्त
२४० मप्येतत्कल्पेउपष्टम्भकं बोध्यम्। तत्स्वनको [illegible]ति। यद्वा शब्द घटितोक्त वार्त्तिक स्वचनप्रयोजको यो
त्यर्थः। अपिनाय पक्षान्तरसंग्रहः वार्त्तिके स्वनार्थे न भवतीत्यत्र स्वशब्दस्यात्मीयवचनतयात्मीयार्थेन जात्या
दिनाप्रवर्त्तते इत्यथात्कथं पक्षान्तरपरता कथं नार्थोद्गतेर्धर्मस्य शब्दस्वभावत्वमतजात्याद्यप्रकाशय
त्ययं भाव इति। जात्याद्यर्थस्य द्रव्यांशे विशेषणतायाः प्रसिद्धत्वात् दृष्टान्तेन शब्दस्यापि सांसाधयति 2.40
अर्थवदिति। जात्यादिवदित्यर्थः। शब्दस्यार्थविशेषणतायामसाधारणस्थलमाह। हरिहरेति। वष्टि रामः
दासी दित्यनेन जात्यादिप्रकारक बोधासम्भवोध्वन्यते। इत्यादौ सन्निकर्षाभावेनानुपस्थितहरित्वा २४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवच्छेदेन शक्तिग्रहाभावे। न तद्धर्मप्रकारकशाब्दबोधासंभवादुपस्थितस्य दस्य च विशेषणत्वमभ्युपगम्य शाब्दबोः
धस्योपपादसंभवो यथा वृत्त्या तदुपस्थितिस्तयोपपादितं नानार्थनिरूपणे इतिभावः। अन्यथेति। जात्यंशे शब्द
स्यप्रकारत्वानभ्युपगमे इत्यर्थः। जातिरूपप्रकाराणां त्यन्तिकर्षेण जातिधर्मितावच्छेदककशक्तिग्रहसंभवादुक्तं
नागरिकाणीति। एवमेवेति। यत्प्रकारेणैवेत्यर्थः। अप्रसिद्धेति। अगृहीतजात्यादिविशिष्टशक्तिकपदेष्विः
त्यर्थः। जात्यादिभेदेनेति। तद्विशेषणेत्यर्थः। क्वचित्तु जात्यादिरूपेणेत्येव पाठः। उभयमिति। जात्यादिरूपप
दं चेत्यर्थः। अवच्छेदकमिति। शक्त्यवच्छेदकमित्यर्थः। ननु जात्याद्यनुपस्थितिदशायामयमर्थ इत्याद्यबोः
नीति शक्तिग्रहोपपसंभवदुक्तिको गत आह। यत्प्रकारकेति। विशिष्य। घटत्वादिरूपेणेत्यर्थः। यद्यपि सर्वभावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. इतिसर्वशब्दोपादानादेतत्कल्पेशब्दस्यैवसर्वशब्दप्रवृत्तिनिमित्तत्वमवगम्यते। तथापि घटत्वादिनाऽगृहीतशक्तिक
२४१ घटादिपदाद्घटत्वप्रकारकबोधस्य सार्वजनीनप्रसिद्धिसिद्धस्यापह्नोतुमशक्यतयाशयशः प्रसिद्धार्थकस्य
लेशब्दप्रकारकबोधस्याननुभवेन चैतत्कल्पेपि जात्यादीनां शब्दप्रवृत्तिनिमित्तत्वमङ्गीकरणमेव। वार्त्ति
कं तु भावशब्दस्याप्रसिद्धार्थकशब्दयाभजया योज्यम्। तत्र निमित्तान्तराभावेन वार्त्तिकेवलाच्छब्दस्यैव शब्द
प्रवृत्तिनिमित्तत्वावधारणात्। यथा क्रादियन्त्वकशंकेकपदे अतस्वानुदात्तङीतइतिसूत्रेःऽनुदात्तङि
तो ह्रो आत्मनेपदमित्यस्य तङानौ वा कार्यं इति तत्र संख्यातानुदेशः प्राप्नोतीति यथासङ्ख्यसूत्रे भाष्यकृदु रामः
क्तं सङ्ग्रहेऽभिहितःऽन्यथा तवानां तङर्थत्वेनात्मनेपदत्वेन बोधे सर्वेषामेकत्वेन चद्वा वित्यस्यानुपपत्तिः। २४१

241

स्यादेवातएवसारकृतास्युभयमवच्छेदकमित्युपसंहृतम्।क्वचिच्छक्योपीतितत्त्वइति।कथंतर्हिशक्तिग्रहोऽत॰
आह।किंत्विति।क्वचिच्छक्तमिति।किंचिन्निष्ठशक्तिनिरूपकमित्यर्थः।तथाचरूपादिवर्णनप्रस्तावेरूपत्वादि॰
नोपस्थितनलादीनांशक्यत्वंशेभानेउपस्थितत्वान्नलादिपदानामपितदंशेभानमपिरू[illegible]मिदमेतच्छक्या॰
मित्याकारकार्थशक्तिग्रहस्यविशेष्यरूपेणोपस्थितेस्तत्त्वत्वादितिभावः।तथैवबोधइति।पदवाच्यत्वप्र॰
कारकस्यैवेत्यर्थः।एवकारेणजात्यादिप्रकारकबोधन्यवच्छेदः।शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानांस
मानप्रकारकत्वमित्यस्यतुशक्तिग्रहस्यार्थांशेयद्धर्मप्रकारकत्वंतज्जन्योपस्थितिशाब्दबोधयोरपितदंशे॰
तद्धर्मप्रकारकत्वमित्यर्थन्नपाविशेष्यकात्तस्मादर्थविशेष्यकबोधानुपपत्तेरित्यवधेयम्।नैयायिकार

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰ द॰ स्तु नलादिपदानामपि विशिष्य शक्तिग्रहो नानुपपन्नः यत्र नलत्वादिसंबन्धेन यत्किंचिद्धर्मवत्त्वधीस्तद्वि
२४२ षयीभूतनलत्वादेः शक्तिग्रहे धर्मितावच्छेदकतयाभाने बाधकाभावात्। यद्वा यत्र प्रमेयत्वेन प्रमेयवानित्या
कारान्नलत्वादिविषयबुद्धिः तत्र अप्रमेयत्वांशे मोघइच्छायां स्वरूपतो नलत्वादिप्रकारकनलविशेष्यकस्म
रणे बाधकाभावात्। नहि विषयत्वनलत्वादि विशिष्य नलादौ नलादिपदशक्तिग्रहेण तद्रूपेण नलादिपदान्नलादिबो
धस्य सुलभत्वात्। न च प्रमेयत्वांशे मोघकल्पने मानाभावः। अनुभूयमानतत्तद्धर्मप्रकारकशाब्दबोधानुपपत्तेरेव 242
मानत्वात्। कथमन्यथानुभवात्मकस्य सूत्रालम्बनादेकपदार्थोद्बोधकासम्भवधर्मेऽन्यपदार्थस्मृतिः। अक्लृ राम:
प्तस्यार्थांशोपदविशेषणाः कल्पनापेक्षया तादृशस्मृतौ प्रमेयत्वांशे मोघकल्पनस्यैव न्याय्यत्वात्। २४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदस्यार्थधर्मत्वाभावेननियमेनतस्यतदंशेविशेषणत्वासम्भवाच्च।तस्यपदस्यतस्मिन्पदेशक्तिरित्यपर्यवस्यालौकि
कत्वेनपदप्रकारकबोधस्यसर्वत्रिकत्वासम्भवाच्चेत्याहुः।अस्त्वरसस्तुप्रमेयत्वांशेपेक्षणेसमानाभावान्यदविशेष
णकार्थस्योपस्थितिरवश्यक्लृप्तेति·अन्यस्वन्दत्तेनैपिकास्तादृशपदप्रकारकलक्ष्यार्थमङ्गीकुर्वन्ति·आधुनिकास्तेलप
वाच्यसन्निकर्षेणजातिप्रकारकशक्यार्थोपस्थितिरितिनलादिगानुसमानशब्दवाच्यत्वरूपशक्यसंबन्धलक्ष
यापदप्रकारकार्थविषयकोबोधइतितदाशयः स्पष्टमेवोक्तंचेदंशक्तिवादेगदाधरीये·हरिवत्त्वभोजरू
तत्रुलिङ्गस्वव·अत्रविवदन्तेइत्यादिना॥ ॥इतिभूषणसारदर्पणेभावप्रत्ययार्थनिरूपणम्॥ ॥ननुदेव
ताया।इन्द्रादिपदात्रनतदत्वभावेणानिरूढतशक्तिकल्पनमनर्थकंमता आह·।देवतात्वोपस्थायके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. ति। इन्द्रत्वेन रूपेण देवतोपस्थितावपि देवतात्वेन रूपेण तद्रूपस्थापकाभावादित्यर्थः। तेन रूपेणेति। देवतात्वे
२४३ न रूपेणेन्द्रोपस्थित्यपेक्षेत्यर्थः। अन्यथा तद्धितेन चतुर्थ्या वा समन्त्रलिङ्गेन वा पुनः देवतासङ्गतिस्तत्र दुर्बलं च परः
स्पर मिति मीमांसकसिद्धान्तात् सङ्गतिः। द्रव्यस्य देवतासंबन्धित्वं च तदुद्देश्यकत्यागकर्मत्वम्। त्यागोद्देश्य
त्वमपि वेदबोधितत्वा। वित्तद्रव्यत्वादिप्रकारेण स्वत्वाविषयत्वं तदेव च देवतात्वम्। नातो ब्राह्मणादिसम्प्रदान
ब्राह्मणस्य त्यागोद्देश्यत्वेऽपि देवतात्वम्। तस्य तत्त्वाभिलापाबाधात्। ऐन्द्रो मन्त्र इत्यादौ मन्त्रस्य तद्देवताक
त्वं च न तदुद्देश्यकत्यागकरणत्वम्। विनापि मन्त्रं मिश्रितं विशेषात्मकत्यागोत्पत्त्या व्यभिचारात्। किन्तु राम:
त्यागाङ्गोच्चारणकत्वम्। स्वजन्यदेवतासंबन्धी प्रत्ययार्थः। ननु तद्देवताकत्वम्। ऐन्द्रं हविरित्यादावनुपपत्तेः २४३

243

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सचामिक्षादिपदसमभिव्याहारे तत्तद्रूपेण प्रतीयते। देयं प्रत्ययार्थ इति तु तस्या मिक्षादिपदसमभिव्याहारे-
दानकर्मत्वेनापि प्रतीतेरित्यभिप्रायेणेति भावः। उक्तार्थे संमतिमाह। अत एवेति। देवतासंबन्धिनः प्रत्यया-
र्थत्वादेवेत्यर्थः। सान्निध्यादिति। सामिक्षा वैश्वदेवी तत्राऽऽमिक्षापदसमभिव्याहारादित्यर्थः। विषया-
यैरामिति। आमिक्षात्मकद्रव्यस्यैव देवतोद्देश्यकत्यागकर्मत्वप्रतीतिरित्यर्थः। केवलादिति। सोमादिप-
दासमभिव्याहृतात्। अग्नेः समुच्चरन्। प्रत्ययत्वादग्निशब्दात्परः प्रादुर्भवन्। आग्नेयोऽष्टाकपालो भवत्य-
माघास्यायामित्यादेः नान्य। सोमादिसाहित्यापन्नाग्निदेवतोद्देश्यकत्यागविषयं द्रव्यं प्रतियादयितुं ने-
ऽष्टे किन्तु तद्देवताकमेवेति तद्भावः। तथा च देवता विशिष्टदेयस्य तद्धितार्थत्वं तेषामपि संमतमिति भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ व:। प्रकृत्येर्थेति। पदार्थ:। यदार्थेनान्वेतीति व्युत्पत्तेरिति भावः। अस्मिन्कल्पे च प्रकृत्यर्थस्याभेदसंबन्धेन
२४४ देवतारूपतद्धितार्थेन्वयः। तस्य च स्वोद्देश्यकत्यागकर्मत्वसंबन्धेन द्रव्यरूपतद्धितापर पदार्थे इति बोध्यम्
द्योतकत्वनय इति। वाचकत्वनये प्रकृत्यर्थस्योपसर्गार्थत्वेन तद्विशिष्टे धात्वर्थे लक्षणाया अकल्पनेन दृष्टा
न्तत्वासंभवादिति भावः। प्रकृष्टे अयवादिति। प्रकर्षे श्रमात्प्रमादाच्च दृष्टान्तत्वं बोध्यम्। लाभादिति। सम
भिव्याहृतदध्यादिपदेन देवपर्यन्तसंबन्धिभानादित्यर्थः कुतः पुनरिति। अनन्यलभ्यो हि शब्दार्थ इति न्यायात् न
किन्तु संबन्धार्थकत्वमेवोचितमिति भावः। यदा त्वनया श्रयणे संबन्धिप्रतीतिः। तथापि निरर्थकत्वादाह ऐन्द्रं दधी राम:
ती। संबन्धमात्रार्थकत्वे सामानाधिकरण्यानुपपत्तिरित्यर्थः। अन्यथेति। उक्तानुपपत्ते स्तदसाधकत्वे। २४४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यर्थः। पचति देवदत्तः पच्यते तण्डुल इत्यत्र सामानाधिकरण्यानुपपत्तिर्हि कर्त्रादिवाचित्वमाधिक्येति भा
वः। वैयाकरणानां स्वसमीयमर्यादातः। मीमांसकानामिति। तन्मते तत्र देवताकत्वरूपप्रत्ययार्थेन धर्मिणा आक्षे
याद्वाभेन सामानाधिकरण्योपपत्तेरिति भावः। पदान्तरादित्याक्षेपस्याप्युपलक्षणम्। वाच्यं मास्त्विति। आ
ख्यातस्य वत्तद्धितस्य ङ्म्भं वाच्यं मास्त्वित्यर्थः। रस्तु यता वामिक्षां देवता॰ क्तामिति त्वामिक्षान्तभङ्ग इति भा
वः। ननु तेषां कर्त्तुरन्यलभ्यत्वात्तत्प्रत्ययवाच्यत्वं किन्तु प्राक्ष्यान्यापत्तेरेव तत्त्व मत आह। दिगिति। तदर्थं स्तुप
लतिप्रत्यययोरिति न्यायस्य संख्यादौ व्यभिचारे र तेन प्राधान्यायत्पभावात्। भावप्रधानमाख्या। तमिति भि
हिक्तानस्यारम्भानार्थो मितिरिति प्रत्ययार्थविषयकत्वोपगमाच्चेति। अत्रेदं बोध्यम्। तद्धितस्य देवतात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ घटितार्थकत्वेति ऊतो न चतुर्थ्या वेति न्यायस्य सर्वसिद्धस्यात्र प्रवृत्तिः। न च तद्धितस्य तदर्थकत्वेपि कस्मै तदपेक्षया
२४५ चतुर्थ्या अन्यत्वम्। त्यागोद्देश्यत्वरूपदेवताबोधकत्वस्योभयत्राविशिष्टत्वादिति वाच्यम्। नहि देवतासंबन्धिदे
यमात्रं तद्धितार्थः किन्तु वेदबोध्यदेयतात्वघटितः। एवं च तद्धिताधीनबोधस्य देवतात्वांशे वेदबोध्यत्वाव
गाहित्वेन तदंशे अप्रामाण्यशङ्काया अनुवादस्यैतीति विनियोजकतया बलवत्त्वं चतुर्थ्यास्तु तदंशे वे
दबोध्यत्वानवगाहिबोधस्यैव जननेन तत्राप्रामाण्यशङ्कानिरासार्थमुपायान्तरस्यापेक्षणाऽज्जघस्य
त्वम्। यद्वा तद्धिते न देवतात्वेन देवताबोधः साध्यदेवतेति स्मरणमस्ति चतुर्थ्यास्तु देवतात्वेन स्मरणं च रामः
तुर्थी सम्प्रदाने इति सम्प्रदान एव तत्स्मरणात्। सम्प्रदानत्वं च त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्वम् २४५

245

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं च ततः सिम्भुदानत्त्वघटकतया देवतात्त्वप्रतीतावपि तद्भिन्नादिवस्तुस्वरूपतया देवतात्वानधिगमात्तस्यास्ति॰
ङ्गितायेक्षयाजघन्यत्वम्। एवं मन्त्रवर्णादधिष्ठानप्रतीतावपि देवतात्वस्य साक्षादप्रतीतेर्मन्त्रवर्णस्य वस्तु
र्थापेक्षयाजघन्यत्वं बोध्यम्। तद्भिन्नस्य देवतार्थकत्वानभ्युपगमेनुतदसङ्गः। तस्यैवं च। नन्विन्द्रादिपदाच्छक्तेर्
व देवतात्वाभेतत्र लक्षणाभ्युपगमो व्यर्थः। न उत्तरदेवतात्वेन रूपेणेति। तथा च शब्दादन्येन रूपेण ज्ञाते भ॰
वति लक्षणेति वृद्धोक्तेर्देवताया रुद्रत्वरूपायाः शक्यत्वे। यान्तु भिन्नदेवतात्वेन तज्ज्ञानार्थं सोपि चेत्ते वेतिभा
वः। अनुपपत्तिज्ञानपूर्वोक्तामामपि यजमानः प्रस्तर इत्यादौ प्रस्तरादिपदलक्षणायां निरूढत्वव्यवहारा द
हानादीति। एतत्तत्त्वमभिहितम्। प्राक्। एकदेशान्वयप्रसङ्गमाशङ्क्याह। प्रहरणं कीडेति। युत्मानिवे॰

ल॰द॰ त्रिस्यादेकपदोपस्थितयोरपि तयोः। परस्परमन्वय इति भावः। प्रकरणस्यापि प्रकृत्यैव लाभमभिप्रेत्याह। क्रोड
२४६ मात्रं वेति। क्रोडरूपसम्बन्ध्येवेत्यर्थः। मात्रपदेन प्रकरणस्य तद्धितार्थत्वव्यवच्छेदः। तथा च दण्डाभिन्नप्र
हारसाधनविशिष्टा क्रीडेति बोधः। सोऽस्येति। एतत्सूत्रविहितप्रत्ययस्यानिवासः संबन्धितार्थः। अत्रनि
वासशब्दोऽधिकरणघञन्तः। निशब्देन च वासेनैनं तात्पर्यं रूपातिशयः प्रत्याय्यतेऽस्य प्रकरणादिना तत्तत्का
ल्यघटितो ग्राह्यः। तथा च स्रुघ्नाभिन्ननिवासाधिकरणसंबन्धीति बोधः। निवासश्च प्रत्यासत्त्या प्रत्ययार्थ
संबन्धिकर्तृकस्य। अत एव कादाचित्कस्य प्रवासकर्तरि न तथाप्रयोगः। सास्मिन्निति सूत्रविहिततद्धित राम॰
स्य तुयोगो मासीघटितत्वाच्च। किन्तोऽर्थः। नक्षत्रयुक्तकालविहिताणप्रत्ययान्तपौर्णमास्याः शिष्टानां पुष्या २४६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घभिन्ननक्षत्रकर्मकराशिभोगाश्रयकालोऽर्थः। तस्योक्तार्थैकदेशपौर्णमास्या समभेदेनान्वयः। तथा च पौषो मास इत्यादौ पुष्या
यभिन्ननक्षत्रकर्मकराशिभोगाश्रयकालोऽर्थः। तस्योक्तार्थैकदेशपौर्णमास्या समभेदेनान्वयः। तथा च पौषो मास इत्यादौ पु
ष्यायभिन्ननक्षत्रकर्मकराशिभोगाश्रयकालाभिन्नपौर्णमासीघटितो मास इत्यादिबोधः। पौषादिपदं चन्द्रकेवलपै
शिकम्। पौषः पक्ष इति व्यवहारविरहात्। किन्तु रूढमपि। एतद्बोधनायैव सूत्रे संज्ञाग्रहणं रूढि रीति रूपकतावच्छेद-
कं च न त्रिंशत्तिथिसमुदायत्वरूपमासत्वमात्रम्। यत्किंचित्तिथ्यवधिकत्रिंशत्तिथिसमुदाये मासादिव्यवहारेऽपि
चान्द्रसौरपौषादिव्यवहारे भूतपौर्णमास्यादिघटितत्रिंशत्तिथ्यन्तर्गततिथिषु पौषादिव्यवहारविरहात्। किन्तु शुक्लप्रतिपदा
दिदर्शान्ततिथिसमुदायत्वम्। अतो नोक्तदोष इत्याद्यन्यत्र विस्तरः। तदस्यास्त्यस्मिन्नित्यादिसूत्रैः प्रमाणात् दस्यर्थो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लं.द.
२५७

पाधिकान्तंवन्धिन्यधिकरणेचमर्थोपाविधीयतेः यद्यप्यस्मन्नुक्तेःस्पष्टार्थसंवन्धस्यवमतुवादिविधानमामानितथा
पिगोमाञ्श्वैवरतिसामानाधिकरण्यानुरोधात्संवन्धिवाचकैतैवेन्मुक्तंप्राक। एवंचगोमानित्यादौगोमानेइपितस्वामि॰
त्वसंवन्धवानित्याद्यन्वयवोधः नवभूस्मिन्दाप्रशंसासुनित्ययोगेतिशायनेः संवन्धेस्ति विवक्षायांभववन्तिमतुवा
दयइतिसंवन्धसमवक्षतयाभूमाद्यर्थानामप्युपादानात्तेषामपिमतुवादिशक्यत्वमितिशङ्क्यम्। स्यादेवंयदितेष्व
र्थेषुमतुवादीनांविधायकंसूत्रादिकमुपलभ्येतकिन्तुप्रयोगोपाधित्वमेवतेषाम्। अस्त्यर्थवत्। गवादिपदानांव॰
हुत्वादिविशिष्टलाक्षणिकतयैवभूमादिमतीतिसोल्लभाच्च। अन्यत्त्वेत्वास्तिशक्षान्मतुवर्थंनञ्हरणमित्याहुः राम:
नियमनेत्रविस्तरः। इत्यादिकमित्यादिपदाजस्यापन्पंतेनरक्तंरागात्संरक्तंतमस्याइत्यादिसङ्ग्रहः। तत्रागर्गिरित्या २५७

257

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैतद्धितार्थापत्यस्य जन्यजनकरूपसम्बन्धरूपस्यैकदेशे जन्यत्वे प्रकृत्यर्थगर्गादेर्निरूपकतयान्वयात् गर्गनिरूपितजन्यताश्र
यः पुमानित्यादिबोधः गार्ग्य इत्यादौ तु जन्यपुरुषजन्मपुरुषाद्यात्मकगोत्रापत्यार्थैकदेशे जन्यत्वे प्रकृत्यर्था
न्वयः परन्तु । जीवति तु वंश्ये युवेति परिभाषणात् गर्गजीवनसमानकालिकत्वमपि प्रधानप्रत्ययार्थे विशेषण
म् । तस्यापि प्रत्ययशक्यत्वात् । एवं च गार्ग्यजीवनसमानकालिक गर्गगोत्रापत्यनिरूपितजन्यताश्रयः पुमानि
ति बोधः । तेन नक्तमिति विहितप्रत्ययस्य तत्सम्बन्धाधीन तदीयरूपारोपविषयोऽर्थः । तादृशारोपविषयत्व
मेव तेन रक्तत्वम् । शङ्खः । पीत इत्यारोपमादाय शङ्खवारे आरोप्यपीतिमाश्रयहरितालादिना रक्तत्ववार
णायाधीनान्तमारोपविशेषणम् । माञ्जिष्ठपदादेः कुसुरादिना रक्तत्ववारणाय तदीयत्वं रूपविशेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰ द॰ अत्र नामकरणस्य प्राग्जिष्ठादेः प्रकृत्यर्थस्य तद्धितार्थैकदेशसंबन्धे प्रतियोगितया रूपे चाधेयतयान्वयः। तथा
२४८ च माञ्जिष्ठासंबन्धाधीनो माञ्जिष्ठो निष्ठरूपारोपस्तद्विषयताश्रय इति माञ्जिष्ठस्य ततो बोधः। स्थूलपृषतमित्या॰
दौ संस्कृतं भक्षा इति सूत्रविहिततद्धितार्थैकदेशे पाकादिसंस्कारे स्थूलादेः प्रकृत्यर्थस्याधिकरणत्वेनान्वयः
अनयैव रीत्या तद्धितान्तराण्यप्यूहनीयः। तद्धितानां क्वचित्प्रकृत्यर्थे स्वार्थैकदेशस्य क्वचित्स्वार्थस्यैवान्वयबोध
कत्वादिति। जहत्स्वार्थवृत्तिपक्षे मतल्लिकामुद्भवतारयति। वृत्तिमात्र इति। तथा च तत्पक्षे पदानामनर्थ 248
क्यात्तदर्थनिरूपणे सिद्धान्तप्र— तिरिति भावः। नन्वीत्येवेति। शास्त्रान्तरापरीत्येवेत्यर्थः। ननु वैयाकरणम रामः
ते जहत्स्वार्थवृत्तिपक्षस्यैवाश्रयणे नरजनानेनरकेनागादित्यादिस्थानां का गतिरत आह। आनोपि २४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेति। विशिष्टत्वेनैवेति। विशिष्टार्थस्येति शेषः। इत्तोयस्तद्वयाभ्युपगमन जहत्स्वार्थपक्षे तद्द्वार पदार्थनिरूपणस्यानुप
योगस्य जहत्स्वार्थपक्षे विशिष्टशक्तिग्रहस्य प्रत्येकशक्तिनिरूपणोपजीवकतया तन्निरूपणस्यौचित्यमेवेतत्त्व
चनायैवमूलेऽन्तर्विनुपात्तमिति तु रहस्यम्॥ ॥इति भूषणसारदर्पणे तद्धितार्थनिरूपणम्॥ ॥ नञ्प्रक्रा
न्ते प्रातिपदिकघटकप्रत्ययार्थनिरूपणे भेदैकत्वसंख्यानिरूपणप्रसङ्गं तन्मते आह। इतिप्रसङ्गादिति। तथा च प्र
ति निरूपणोक्तियमाणे स्पष्टानियथशापि तत्र मोपेक्षानुचितेति प्रसङ्गसङ्गतिं मत्वा। नोक्तदोष इति भावः। यद्यपि व
क्ष्यमाणन्यायेनैतेपि ह्रा। उक्तिसमत्वात दनन्तरमेव संख्यानिरूपणमुचिता। तथापि तत्प्रकृत्यर्थे संख्यापा उभाना
दाकाङ्क्षाविच्छेदः। स्यादित्यत्रैव तन्निरूपितमिति बोध्यम्। अभेदैकत्वसंख्या पदार्थमतभेदेन द्विधा। निर्वक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ । संख्याविशेषाणामिति । एकत्वत्वावच्छिन्नानामित्यर्थः । अविभागेन अभेदेन । अविरोधेनेति यावत् । उक्तार्थे
२४९ हरिवाक्यं प्रमाणयति उक्तं चेति । आहितशक्तयः । आहिता समर्पिता तत्तद्धीभेदनिबन्धनाविरोधरूपा
शक्तिर्यैरित्यर्थः । त्यक्तविरोधा इति यावत् । अत एव । अविभागेनाविरोधेनेत्यर्थः । तासां । अभेदे कत्वसंख्याः
म् । तादृशीम् । मधुनि षड्रसस्थितितुल्यामित्यर्थः । नन्वेकत्वद्वित्वादीनामेकत्र सत्त्वमनुपपन्नम् । नहि द्वावेक
कत्वेन व्यवह्रियते नाप्येको द्वाविति । नहि द्वि पुत्र इति भाष्यात् । किन्त्वदृष्टान्तोऽपि न समञ्जसः । तत्र रसवदार
ब्धे॰ त्रयविनिमायिके॰ वयवसजातीयरसान्तरस्यैवोत्पादाभ्युपगमादित्याह । परित्यक्तेति । वाशब्दः पक्षा राम॰
न्तरे । अगृहीतविशेषधर्मकं संख्याज्ञानमात्रमित्यर्थः । पूर्वकल्पे । उक्तास्वरसाभिसन्धिकं वाक्यपदीयं तत्र २४९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेपि प्रमाणत्वेनोपन्यस्यति भेदानामिति। भेदानामेकत्वत्वाद्भित्वत्वादिविशेषधर्माणाम्। परित्यागाद
ग्रहणात्। इदं व्यापारपदार्थेऽभेदेनान्वयि। संख्यात्मा संख्यात्वरूपः। सः एकत्वादिः। तथाविधः। अभेदैक
त्वव्यपदेश्य इत्यर्थः। तदेव विशदयति जातिभागस्येति। एकतत्त्वादेरित्यर्थः। भेदायोहेनेति। भेदस्य वि
शेषस्य योयोयोहोऽग्रहस्तेनेत्यर्थः। यद्वा भेदायोहेनेत्यस्य व्यापारादित्यनेनान्वयः। प्रकृत्यादित्वात्
तीयाः। तथा चैकत्वत्वादेर्जातिविशेषस्य भेदाग्रहरूपो यो व्यापारो विशेषणात्मा तयोर्वर्त्तत इत्यर्थः। भेदा
योहो न वर्त्तते। निवर्त्तत इति यावत्तु भेदरूपो योयोहो न व्यावृत्तत्वं सन्नवर्त्तते न भासत इत्यर्थो वसेयः। यद्यात्
राव लोकनेनैतत्पाठस्यैव हीस न्मतत्वमध्यवसीयते। द्वित्वत्वाद्यग्रहकालिकं त्यात्व प्रकारकप्रतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ गोचरः। संख्यापदार्थयोः भेदे केन व्यपदेशो भवतीति मूलस्यार्थः। तत्र दृष्टान्तमाह। गृहीतविशेषणेति।
२५० शुक्लत्वादिप्रकारकग्रहसमानकालिकरूपत्वप्रकारकप्रतीतिविषये शुक्लादिनैव यथा घटादिरूपवा
निति प्रतीयते शुक्लादेर्योभेदः स्वरूपयोः शुक्लत्वादिना व्यावृत्तिरूपः स तु न प्रतीयते। तद्वद्राजपुरुष इ
त्यादौ राजादिपदार्थः संख्यावानिति प्रतीयते न तत्र संख्यांशस्य कत्वत्वादि भासत इत्यर्थः। तादृशसं
ख्याभानस्य परानभ्युपेतत्वात्कथमियं स्थितिरत आह। शेषं प्रत्येनव्याचष्टे। वैयाकरणानामिति। ननु ताद
शसंख्याया वृत्तौ भाने किं प्रमाणमत आह। अयं इति भावः। सामान्यज्ञानपूर्विकेति। तदुक्तेत्यर्थः। आ एषः
वश्यकीति॰ तां विनोक्तजिज्ञासाया असंभवादिति भावः। सा च संख्या पूर्वोत्तरपदार्थयोः संबन्धप २५०

250

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छेतिशंकेव। अजहत्स्वार्थवृत्तिपक्षे पूर्वपदस्य संख्याविशेषवाचकत्वे गमकाभावेनेन हि पञ्चाम्रो द्विको मा
सजातस्तु। वकोनोभवहिरामवसनेत्यादौ वृत्तावभेदैकत्वसंख्याया अभानेपि क्षतिः। आद्ये संख्याविशेष· शे
स्यैव पूर्वपदार्थत्वात् द्वितीयस्य तु द्वस्य क्रयकरणायोग्यत्वा। द्वन्द्वापत्तिः। तृतीये निशिष्टकालावगमा·
यमासपदप्रयोगात्संख्याध्यवसायः। चतुर्थे तु वृत्ताद्यादेशादेकत्वाधगतिः। यच्चमेप्रकरणाद्विन्त्वावगतिः। ए
वंकारकमध्य इत्यादौ अप्युच्यमेकस्य मध्यासम्भवात्। सतिप्रकरणे राजपुरुष इत्यादावपि संख्याविशेषप्र·
कारेणैवभानम्। तदा तत्रापि न तस्य वृत्त्यर्थतामिति। भेदोभेदद्वाद्वित्वादिसंख्यातदभाववत्साहित्यमेकत्वम·
भेदैकत्वमिति वृत्त्युत्पत्त्या संख्यात्वेनैकत्वमेवोपसर्जनपदार्थो भासते। तदेवैकवचनमुत्सर्गतः करिष्यत इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰द॰ तिवचनाद्वाजन् अस्मद्रूस्मसु इत्यलौकिकोविग्रहे एकवचनं प्रयुज्यते। यत्तुप्रकरणादिना संख्याविशेषभानेन
२५१ त्ववहुवचनमपि। यथा त्रित्रयुरित्यादौ त्रित्रा ऊस्त गोअस्त् इत्यभिप्रायभिप्रेत्योत्तरग्रन्थमवतारयति। तस्या इति
इति घटक पदार्थोपसर्जनवाक्ये इत्यर्थः। प्राप्तिं। ता विति। संख्यात्वावच्छिन्नैकत्वप्रकारतानिरूपितविशेष्य
त्वेनवोध इत्यर्थः। उपसर्जनपदार्थे संख्यात्वेनैकत्वमेव प्रतीयते। न द्वित्वादीत्यत्र दृष्टान्तमाहेतियावत्। गा
णानायामिति वहुत्वविशिष्टानेकसंख्याने इत्यर्थः। कपिञ्जलानालभेतेतिवाक्येन वहुत्वव्याप्यसंख्यावि 251
शिष्टकपिञ्जलालम्भनं विधीयते। तत्र प्रसारणं वजुरादीनां वाऽऽलम्भनमिति संशये वहुत्वव्याप्यत्वस एम॰
त्रित्यादि सर्वेष्वपि विशिष्टत्वाद्यथा प्राप्तमेवालब्धव्यमिति पूर्वपक्षे चतुरादीनामालम्भलेमाहिं २५१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सास्पादितिसामान्यशास्त्रविहितनिषेधस्यालम्भताव व्यक्तीतरपरत्वरूपतात्पर्य्यसंकोचकत्वेनगौरवाऽऽगम
नायांप्रथमोपस्थितत्रित्वपरत्वस्यापिबहुवचनस्यचारितार्थ्याल्लाघवाच्चवहुत्वव्याप्यत्वेनत्रित्वमेवबहुव
चनार्थइतिसिद्धान्तितंतन्न्यायादत्रापिसंख्यात्वेनैकत्वस्यैववहत्यर्थत्वंनतुद्वित्वादीनामप्रतीयमानविशेष
धर्मैकैकत्वमभेदैकत्वमितिव्युत्पत्तेरितिभावः।निजांत्रयारणाभिन्यादिनिर्देशेऽस्मिन्व्याकरणेव्याप्तिन्यायर
स्यैवाश्रयणेनप्रकृतेसंख्यात्वेन।नैकत्वप्रतीतिर्दुरुपपादेत्यकेचित्।ननुजिज्ञासायांशाब्दमेवसामान्यध
र्मप्रकारकज्ञानमपेक्षितमितिननियमः।आम्रादिफलदर्शनेनापितद्रसास्वादेच्छायाउत्पत्त्याव्यभिचारा
त्।निवैवंसामान्यधर्मप्रकारकज्ञानस्यैवहेतुत्वंविलियतेतिवाच्यम्।आम्रदर्शनस्योद्बोधकतयातद्रसस्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· रणेन तदुपपत्तेः। प्रकृते तस्या अप्रकृत्वेऽपि तदव्यभिचरितद्रव्यत्वेनानुमानिकज्ञानबोधसंभवात्। तादृशजि॰
२५२ ज्ञासाया अननुभवात्तन्नोक्तप्रक्रियैवेत्यभेदैकत्वसंख्यार्थकत्वसाधिकेत्यभिप्रेत्याह वस्तुत इति। जिज्ञासैवे
ति। राजपुरुष इत्यादौ पूर्वपदार्थैकत्वघटित्वादिप्रकारकजिज्ञासैवेत्यर्थः। अनुभवसिद्धेति। अन्वयेन तद
तदनुरोधेन सामान्यधर्मप्रकारकज्ञानस्यावश्यकतास्यादिति शेषः। अभेदैकत्वसंख्यायां वृत्तौ भानमिति मू
लं तु प्राचीनगाथानुवादरूपमेवेत्याहुः। अनुभवसिद्धत्वस्य सूत्रस्थनिर्णयसत्त्वं मत्वाह। तथात्वेनेति। अनुभवसि
द्धत्वे वेत्यर्थः। समानप्रकारकत्वे नैवेति। स्वकारेण विभिन्नप्रकारकव्यवच्छेदः। धर्मप्रकारकेच्छाम्प्रति ए॰ः
तद्धर्मप्रकारकज्ञानस्य हेतुतायाः सुखादिकामस्थले कृप्तत्वात्प्रकृते विशेषधर्मप्रकारकजिज्ञासायाः स २५२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयता कत्वेन ज्ञानप्रकारीभूतविशेष्यधर्मप्रकारकत्वस्या वच्छेदकत्वेन तत्तदर्थविशेष्यधर्मप्रकारकज्ञानका
र्य्यतावच्छेदकानाक्रान्तत्वादितिभावः तत्तद्रूपेणैवेति। एकत्वत्वादिविशेष्यधर्मेणैवेत्यर्थः। एवकारेण संख्या
सामान्यधर्मव्यवच्छेदः। इष्टापत्तिस्तु न तथा शतित्वाद्यादेर्वा विशेष्यधर्मोपस्थितौ तत्र जिज्ञासानुदयप्रसङ्गादि
तिभावः। अत्रेदं चिन्त्यम् ज्ञानेच्छयोः कार्य्यकारणभावे समानप्रकारकत्वस्य तन्त्रत्वेपि सामान्यधर्मज्ञा
नस्य सर्वसिद्धविशेष्यधर्मप्रकारकजिज्ञासाजनकत्वानुरोधात् तद्धर्मप्रकारज्ञानस्य कार्य्यतावच्छेदककोटौ
तद्धर्मप्रकारकत्वांशस्यात् तन्त्रेणैति निवेशनियमेव च जिज्ञासाया ज्ञानयोरतन्त्रेणैव तद्धर्मप्रकारकता
या तस्यात त्कार्यतावच्छेदकानाक्रान्तत्वान्न तस्य तत्र व्यभिचारः। तादृशजिज्ञासां प्रति त्वन्वयव्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· रेकाभ्यांसामाधर्मप्रकारकज्ञानंहेतुःयद्वासामान्यधर्मप्रकारकज्ञानंविशेषधर्मप्रकारकज्ञानद्वाराविशे
२५३ षधर्मप्रकारकजिज्ञासायोजकमस्तु।यत्रसामान्यंनत्वविशेषधर्मत्वावच्छिन्नमितिनियमाद्धिरुक्तं वि
धयासामान्यविशेषयोःसाहचर्य्येण।ततश्चमांशेभावयवशाद्बोधकाकांक्षयावासामान्यज्ञानोद्विशेषधर्म्य:
त्वेनविशेषधर्मस्यसिद्धत्वात्तस्मैसामान्यसिद्धत्वात्तद्धर्मप्रकारकज्ञानकार्य्यतावच्छेदककोटौसत्त्वात्
न्यानिवेशेपिनविशेषधर्मप्रकारकजिज्ञासानुपपत्तिः।धर्माभेदेप्येकस्मिन्नेकदासिद्धत्वासिद्धत्वयोर्निरू
पकभेदेनयागादेरिष्टत्वार्थमन्यथासामान्यधर्मप्रकारकनिरूपणानन्तरंविशेषधर्मप्रकारकनिरूपणं राम:
ग्रन्थकृतांसङ्गच्छेत अनाकाङ्क्षिताभिधानेऽर्थान्तरत्वात्।आहतस्यायमर्थोजायतेचकार्य्यकारणे· २५३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाज्ञानं किमस्य कार्यं किं कारणं वेति जिज्ञासेति वदतां दीधितिकृतां । प्रकृते च संख्यात्वरूपसामान्यज्ञाने जन्यु
धित्वत्वावच्छिन्नविषयक विशेषधर्मत्वावच्छिन्नद्वित्वादिप्रकारक जिज्ञासा निराबाधेति तदुपपत्तेः अभेदे कोत्वे
दृत्तेर्दृत्तिनावशिष्यका । स्वत्वम् भेदैकत्वसंख्यायावृत्तोऽभानमिति स्थूलस्यापि यथाऽतस्योपपत्तोभेदस्य
तत्सहचरितद्वित्वादेर्यापीति तज्ज्ञावङ्‌त्यर्थपरतया व्याख्या नमनादेयम् । नञोऽपसत्पदानगर्तत्वे न तदर्थ
स्यभानपदार्थान्वयित्वासंभवाच्चेति ॥ ॥ इति भूषणसारदर्पणेऽभेदैकत्वसंख्यानिरूपणम् ॥ ॥ संख्या
विवक्षानिरूपणे संगतिं दर्शयति । प्रसङ्गादिति अभेदैकत्वसंख्यानिरूपणे कपिञ्जलो नालभेतेत्यत्रा विधे
यविशेषणतया त्रित्वसंख्याविवक्षायाः स्मृतत्वादुपेक्षानर्हत्वाच्चेत्यर्थः । अविवक्षितमिति । तद्विव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·द· स्मरणो यज्ञियपात्राणां मार्जनाल्लाभ इति भावः। धातोरितीति। प्रत्ययविधौ धातोरिति सूत्रस्थधातुपदा
२५४ र्थविशेषणीभूतैकत्वादेरनुक्तस्य विवक्षणादित्यर्थः। अस्मत्सूत्रस्थे उद्देश्यगतविशेषणस्याविवक्षामिमां
सकामनामपि संमतेत्याह। उद्योतेति। विशेष्येणेति। तदा सप्रत्ययार्थैः सर्वैर्धात्वर्थो विशेष्यते इत्यर्थः। नत्व
नेयमुक्तिर्विवक्षासाधिका तादृशसमुदायस्य क्रियावत्त्वनत्वाभावेन ततः प्रत्ययोत्पत्तेर्गगनकुसुमायमान
त्वेन स्वत एवाविवक्षासत्त्वादत आह। आर्द्धधातुकस्येड्वलादेरितीति। विवक्षितत्वाच्चेति। अन्यथा तदुपा
दानवैयर्थ्यापत्तेरिति भावः। एवमिति। अनुवाद्यविशेषणमविवक्षितमेवेति नियमवाधित्यर्थः। पशुनायजे राम:
तेति सूत्रज्यार्थयागस्य करणाकाङ्क्षायां साधनत्वेन पशुभिर्विधीयते। एकत्वं च पशुशब्दस्य विधेयसमर्प २५४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्यात्तदुपस्थितानां केषांचिद्ग्रहणे केषांचित्परित्यागे मानाभावेन पशुत्वपुंस्त्वादिवदेकत्वमपि यागसाध-
नत्वेन विवक्षितं तेन नानेकवस्तुकारणाकरणकयागादृष्टसिद्धिरेवमन्यत्रापि विधेयविशेषणाविवक्षितमवि-
वक्षाकारणाविरहादिति मीमांसकपरिशीलितसरणिस्तदनुसरणानियमो नास्माकमित्यर्थः स्तच्चाग्रेतनः
ग्रथयणे निसुं प्रदर्शयितरदाभ्यामिति। विधानानापत्तेरिति। नइत्येकवचनोपस्थितैकत्वस्यापि विधेयविशे-
षणत्यात्तद्विवक्षायां नकारद्वयविधानस्यादित्यर्थः। ननु मास्तु नद्वयविधानमत आह तथा चेति। इदं चैकवाक्यतं
या विधानमभिप्रेत्य वाक्यभेदेन विधानपक्षे त्वाह। आद्गुणा इत्यादाविति। एकत्वविवक्षयेवेति। विधेयगुणाग-
तैकत्वाविवक्षयेवेत्यर्थः। तथा चैकग्रहणमेवोक्तार्थज्ञापकमिति भावः। ननु मरुत्वकत्वादिविवक्षाहेतूनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. जैमिनिसम्मतत्वान्न तदाश्रयणास्थानाकरत्वंमित्याशङ्क्याह मयाकरिष्यन्त्योजनाप्रदर्शनमिषेणाकरपपदा
२५५ र्थंव्याचष्टे। शद्वाधरित्यादि। पदैकत्वाधिकरणोक्तहेतूनामिति। पशुना यजेतेत्यत्र विधेयगतैकत्व॰
स्यापि विवक्षणोपपद्वेतराणलम्भे प्रयोगसम्भववाधेन यागवैगुण्यापत्तिः। गुणानुरोधेन यागावृत्तौ प्रधानत्वभ
ङ्गापत्तिर्याववचनकरणकयागासम्भवश्चेत्येवमादयो दोषा इत्तवृत्तेषामित्यर्थः। सिद्धान्तासिद्धमि
ति सिद्धान्तप्रतिपादकमीतौ भाष्यादिसिद्धमित्यर्थः। आदेशभेदधारणायेति। वस्तुतस्तु। नैकग्रहणं विधे 255
गत विशेषणा विवक्षायां तन्त्रम्। अन्ययोः फलयोः कंकुर्वित्यादौ विवाहणा इत्यादावपि पूर्वपरयोरिति रामः
द्वन्द्वनिर्देशेनैकवाक्यतयैवोभयोः स्थानेएकविधानसंभवात् स्थानिभेदान्नानेकोगुणाइत्येकग्रहणमस्यभा २५५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ये प्रत्याख्यानादीति रहस्यम्॥ वाक्यभेदादिरिति। प्राजापत्यानवयज्ञा इति वाक्यविच्छिन्नग्रहोद्देशेन संमार्गो वि-
धीयते ग्रहं संमार्ष्टीत्यनेन। तत्रानुवाद्यग्रहैकत्वविवक्षायामुन्मार्जितवाक्यभेदः संमार्गविरोधाद्वाक्यस्य यो भेदो
विभिन्नविशेष्यकबोधजनकत्वं तदापत्त्यादीत्यर्थः। अन्ये तु ग्रहं संमार्ष्टि तं चैकमित्याकारकवाक्यभेदापत्तिमा
हुः। आदित्यदेनोत्पत्तिवाक्यगतनवत्वसंख्यया ग्रहपदार्थस्य परिच्छिन्नत्वात् परिच्छेदकाकाङ्क्षाभावस्य ग्रह
मिति द्वितीयया संस्कार्यत्वलक्षणप्राधान्यबोधनात् प्रतिप्रधानं गुणावृत्तिरिति न्यायाद्विनिगमनाविरहत्वो
भावसैकत्वनिरासफलकसंमार्गस्य सर्वैग्रहैरपेक्षणादिधेयपश्वादिविशेषणवन्निक्रियाकुत्वाभावेन तद्धेकल्प
प्रयुक्तक्रियावैकल्याप्रसक्ते श्रुतोद्विवक्षाविरहबीजस्य वसङ्ग्रहः॥ अनाकारमिति पूर्ववत्। इडागमादेरित्यादिनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. दीवास्मात्तथानेपकपूर्वायायाइतिविहितेत्वसमहः। तत्राकारस्थानिकात्तुद्विषयेत्वविधानात्। अतएवैरित्नसेधे
२५६ काजितिसूत्रे। वहुस्येकत्वविवक्षादर्शनानेकाकोपदेशव्याहतिर्ग्रन्थकृद्भिर्व्याख्याता। वस्तुतस्तु ग्रहैक
दृष्टान्तेनान्नाप्यनुवाद्यविशेषणानां संख्यादीनां कचिदविवक्षास्तु तदितरविशेषणानामविवक्षायां तु न
किंचिद्बाधकम्। मीमांसायामनुवाद्यांशे जातिलिङ्गसंख्यातिरिक्तविशेषणस्यादर्शनात्तेषां चोत्पत्तिः
वाक्यादेवावगमेनानुषङ्गिकत्वादविवक्षा उच्यते। प्रकृते तु न तथेति बोध्यम्॥ ॥इतिभूषणसारद
र्पणे संख्याविवक्षादिनिर्णयः॥ ॥अथ समासशक्तिं क्त्वाद्यर्थनिरूपणेन दर्शयति। क्त्वाप्रत्ययादेरिति राम:
प्रकृत्यर्थान्वयफले यिसत्वादाह भावइति। तत्रापि समानकर्तृके व्यापार एव न तु पूर्वकालादावित्यर्थः। २५६

256

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पाकइत्यात्राविवयुक्तं यक्केत्यादिजन्यवोधेभावांशेवैलक्षण्यस्यानुभवादितिभावः। वस्तुतस्तुपक्केत्यादिज
न्यवोधेभावेलिङ्गसंख्यानन्वयित्वेतदनुभवसत्त्वात्। एवं पक्तुमित्यादौ कृत्वार्थकतुमुन्नासाध्यत्वेनतत्तद्धोः
धात्त्वेनत्युक्तप्रायमरुति। कागत्तिरिति। तत्रपूर्वकालइत्याद्युपादानात्पूर्वकालादौनावाच्यताप्रतीयते। भावः
मात्रार्थकत्वेतुतदनुपपत्तिरितिभावः। समानकर्तृकत्वादीति। तथाचसमानकर्तृकयोर्धात्वर्थयोर्मध्येपूर्व
कालसंबन्धीयोऽर्थस्तदाचकालेन्यर्थेऽर्थाकाङ्क्षायांकर्तृनिरूढित्यस्यप्रसक्तौतद्वाधनार्थंवार्तिकोरम्भे
णाभावस्यैवधात्वर्थतानिर्धार्यते। कर्तुः प्रत्ययविशेषणत्वेतुसमानकर्तृकान्येवब्रूयात्। स्वत्रोपात्तानांतु
यात्यत्वमेववर्तमानत्वादिवदितिभावः। ननुतद्धोपज्ञायामपिमानाभावस्तत्रैवक्रिययोर्वि। शेष्यवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ला.द. शेषणाभावस्यैवाभावादत आह। अयं भाव इति। एकवाक्यतेति। समानकर्तृकयोरित्यादिसूत्राणां धातु
२५७ संबन्धाधिकारीयत्वादिति भावः। अनुपपन्नेति। विशेष्यविशेषणत्वयोः संसर्गविषयताभिरूपत्वेन
संबन्धं विना विशिष्टबुद्धेरेवासंभवेनैकवाक्यत्वमनुपपन्नमिति भावः। अन्यथेति। विशेष्यविशेषण
भावसत्त्वेऽपि ऐकवाक्यताभ्युपगमे इत्यर्थः। सामानाधिकरण्यामिति। एकाश्रयवृत्तित्वमित्यर्थः। एवोत
रभावः। एकोत्तरसमयोत्पत्तिकत्वम्। एकपूर्वसमयवृत्तित्वं वा। आद्यन्तत्वम्। अविनाभावित्वम्। तस्य ना
घ्रतेशादिबोधादित्यमाह। तथा चेति। भोजनजनिकेति। जनकत्वस्य संसर्गतेति स्फुटीकर्तुमित्युक्त राम:
क्तिर्बोधाकारस्तु भोजनविशिष्टेत्येव। जनकत्वस्य पदार्थतया प्रकारत्वात्। कियायोर्जन्यजनक २५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावस्यापि सत्वन्धान्वेपुत्तिमाह॰। जनस्येति॰। जन्यत्वस्य संसर्गत्वान्भ्युपगमादेवेत्यर्थः। जन्यतया नानन्तर्य्यंस्येत
नेन पूर्वोत्तरभावसंवन्धसत्वं वोध्यते॰। जन्यत्वविवक्षायान्तु प्रयोग इष्ट एवेतिभावः। सामानाधिकरण्यस्यप्र
कृत पद वृत्तियत्वाविषयतया संसर्गतानभ्युपगमस्तु पचत्पूर्वापरीभावापन्नभोजनगमनक्रियपोर्वैयधिक
रण्यं नजत्युक्त्वाव्रजतीतिप्रयोगवारणाय। अव्यवहितोत्तरत्वस्यतु दिनान्तरितपूर्वकालवृत्तिसमानाधिकरणभो
जनादिक्रियामादायक्तोवारणाय अव्यवधानं वृत्तात्पर्य्यं वशाद्दिनादिनाग्राह्यम्॰। नातोभोजनानन्तरं दं
डादिव्यवधानेपिताहृशप्रयोगानुपपत्तिः स्मितावध्ययनानन्तर्य्याभावात्। एवं तु संवव्यादायस्त्वपितीतिनः
स्यात्। आस्तृप्स्वविभागरूपव्यादानकालएव स्वायादिमत्वेनाहृशप्रयोगस्यवृत्वेनव्यादानस्यस्वायपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰ द॰ वंत्वाभावादत उक्तं ॥ जघित्यतिशृतीत्यादि ॥ कालविशेषेति । विभिन्नकालिकयोः कालिकसंबन्धघटित
२५८ व्याप्यव्यापकभावेन तत्संबन्धावच्छिन्नव्याप्यत्वस्य संसर्गतोपगन्तव्या ॥ न केवलं तत्र व्याप्यत्वस्यैव संसर्ग
ता किंतु सामानाधिकरण्यस्यापीत्याह सामानाधिकरण्यं चेति ॥ नालो विभिन्नकर्तृकैककालिकाध्यय
नादिसमादाये गोपपत्तिरेवं च समानकर्तृकयोरिति सूत्रविहितक्त्वान्तस्थले समानकर्तृकत्वरूपसामाना
धिकरण्यसंसर्गस्य ज्ञानं त्ववोधविषयता सार्वत्रिकी ॥ जन्यत्वादीनां तु तात्पर्यवशात्काचित्कीत्तेतिभावः 1.58
अन्वेतु सामानाधिकरण्यस्येव पूर्वोत्तरभावस्यापि क्त्वान्तजन्यबोधविषयता सार्वत्रिकी ॥ मुखं व्यादायेत्या रामः
दौ मुखव्यादन्ते इत्यत्रैव व्यादानोत्तरमपि स्वापानुवृत्तेस्तयोर्वा पर्य्यमादायप्रयोगोपपत्तिः । एव २५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वोक्तसंबन्धव्यतिरिक्तोसंबन्धभानस्यैवक्ता। चित्कत्वमित्याहुः। नचावज्ञातानिमां यस्मादन्नस्तेनभवि
ष्यति। यन्मुखस्तिमनाराध्यप्रजेनित्वांशशापसा। इत्यत्र मत्प्रस्तिमनभाध्यतेप्रज्ञानभविष्यतीत्यर्था। दि
पदवाक्ययोरप्यनित्यत्वे तया प्रत्यभिज्ञानुपपत्तिर्दुष्परिहरैवेति भावः। एतेनेति। अयास्तामित्यन्वयि। प्रत्यभिज्ञानु
पपत्तिभिया अखण्डस्फोटस्य वाचकत्वव्यवस्थापनेनेत्यर्थः। अनुभवादिति। तथा च तत्रैव प्रमाणाभावेन वाचक
त्वं दूरापास्तमिति भावः। तेषां गकारादिवर्णानाम्। स्फोटातिरिक्तेति। गत्वप्रकारकप्रतीतिविषयगादि॰
स्फोटस्यैवास्माभिर्वाचकत्वाभ्युपगमादिति भावः। किमकाराणामपि स्थायिनां सहावस्थानादुक्तमाशुतरेति
तृतीयक्षणवृत्तिध्वंसप्रतियोगिनामित्यर्थः। आशुतरविनाशिनां सहोत्पन्नानां समुदायसंभवादुक्तं क्रमवता
मिति। अत एव चेति। प्रत्यक्षे तादात्म्येन विषयस्य हेतुतया समूहरूपविषयस्यैवाभावादिति भावः। पूर्वपूर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या.द. ति। ननुवर्णानां नित्यतावादिमते तृतीयक्षणध्वंसप्रतियोगिनां तेषां प्रत्यक्षस्यैवासम्भवात्कथं तज्जन्यसंस्कारस्य
२८१ सहकारितासम्भवः। तथाहि ककारादिप्रतीतिः ककारादौ विशेषणतया कत्वादिकमवगाहते विशिष्टबुद्धौ वि
शेषणज्ञानस्य हेतुतया ककारोत्पत्तिद्वितीयक्षणे निर्विकल्पकमभ्युपेत्य तृतीयक्षणे विशिष्टं ज्ञानं वा
च्यम्। तच्च न संभवति। संबद्धं वर्त्तमानं च गृह्यते चक्षुरादिनेति वृद्धोक्तेः प्रत्यक्षे विषयस्य कार्य्यसहभावे
न हेतुतया तृतीयतः वर्णरूपविषयस्याभावात् न च ककारोत्पत्तिक्षणोत्पन्नकत्वादिसत्त्वैव द्विती
यक्षणे सविकल्पसम्भवतीति वाच्यम्। तत्रापि प्राथमिकविशिष्टबुद्धेर्दुरुपपादत्वादिति चेदत्र वद राम:
न्ति। संसारस्यानादितया वा तस्मिन्नयानप्रवृत्तिहेतुविशिष्टसाधनत्वस्मृतेरिव प्राथमिककत्वादिविशि २८१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टबुद्धिजनकस्मृतेः सम्भवान्न तदनुपपत्तिः। ककाराद्युत्पत्त्यनन्तरं ककारो गकार इति विशिष्टबुद्धेरेव चतादृ
शकल्पने मानमिति। अन्ये तु प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्यसम्बन्धाव
वच्छिन्नस्वपूर्ववर्तित्वोभयसंबन्धेन यदि सामान्यतस्तादृशविशेषगुणस्य कारणता स्यात्तदा ककारादिप्रत्य
क्षानुपपत्तिः। प्रसङ्ग्ये। तापि सैव न। अन्तिमशब्दनाशे सुषुप्तिप्राक्कालोत्पन्नज्ञानादिनाशे च व्यभिचारात्। कि
न्तु विजातीयगुणनाशे वैजात्यं चरमशब्दादिव्यावृत्तमिव प्राथमिकविशिष्टबुद्धिविषयवर्णव्यावृत्तमपि
न वर्णतादृशवैजात्ये मानाभावः। नाश्यतावच्छेदककोटिप्रविष्टतयैव तत्सिद्धेः। तथा चान्तिमशब्दनाशे न द्विती
यक्षणस्यैव तादृशवर्णनाशेऽपि तत्तज्जनीयक्षणस्य तद्व्यक्तित्वेन हेतुत्वकल्पनान्न द्वितीयक्षणस्यापि तत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यप्रत्यक्षात्तु पपत्तिरुक्तहेतुमद्भावस्वीकारेपीत्याह ॥ अतिप्रसङ्ग इति सरसशब्दे परकस्य कारा कारे फ विसर्गान्तुभ
वजनन्यसंस्कारै रसबोधायत्तिरित्यर्थः । नादाव्यञ्ज इति । ध्वन्यनुगतवर्णाभिव्यञ्ज इत्यर्थः । अखण्डः । वर्णाघटि
तः । उपपादितत्वादित्यस्य सखण्डस्फोटनिरूपणावसर इति शेषः । तादृशाप्रत्यक्षस्यापत्तिमवर्णांशे लौकिकस्या
तीतवर्णांशेऽलौकिकस्य सत्त्वे सहइत्याद्यनतिप्रसक्तस्योपपादितत्वादित्यर्थः । अतिरिक्तस्य वाचकत्वे टयण
माह । वर्णानामिति । विकल्पग्रासादिति । प्रत्येकव्यञ्जकत्वे ज्ञाद्यवर्णादेव तदभिव्यक्तिसम्भवे इतरोच्चार
णवैयर्थ्यापत्तेरतिप्रसङ्गाच्च । समुदायस्य व्यक्तिरीत्यादुरुपपादत्वेन तद्व्यञ्जकत्वस्याप्यसम्भवदुक्तिकत्वादि
त्यर्थः । कैयटानुपायिनस्तु पूर्वपूर्ववर्णाकाले वोहितीयादिवर्णोत्पत्तिः सम्भवे तदसाम्यादपि कथं विद्वदुक्तरी

288

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यापद्वाक्यप्रत्यक्षनिर्वाहः। सैवन किन्तु यावदकारे वाग्वर्त्तते न तावदौकारे ऽप्येवं यत्नेनैको वर्णा उच्चार्य्यते नैव वि
च्छिन्ने तस्मिन्वर्णे उपसंहृत्य तं यत्नमन्यमुपादाय द्वितीयः प्रवर्त्तत इति परः सन्निकर्ष इति तन्त्रस्य भाष्यप्रमाणाप
त्सर्व्ववर्णविनाशानन्तरं यत्नान्तरेण द्वितीयवर्णाभ्युपगमात्। किञ्च भवन्मते वर्णप्रत्यक्षस्यैवानुपपत्तिः। तथाहु
च्चारितप्रध्वंसित्वेन तदुत्पत्तेरभिव्यक्तेर्वा क्षणिकत्वेनातीन्द्रियकरणाविच्छिन्नत्वात्। तथा चैकोयरणाचोत्यादिसूत्रो
ययोगिनोऽयं पूर्व्वोऽयं पर इति प्रत्यक्षविषयार्थके देशकालविद्यमानयोर्व्वा पर्य्यव्यवहारस्यासम्भवः। स्वेनष्टविद्यमा
नयोः संबन्धिनोरव्यवहितत्वस्य संबन्धतायावक्तुमशक्यतयापि पूर्व्वोत्तरीत्यायदप्रत्यक्षानुपपत्तिः। अपि
च गृहीतशक्तिकस्यैव बोधकत्वमिति नियमेनोच्चारणभेदाद्भिन्नेषु शक्तिग्रहासम्भवः। आनुपूर्व्व्यास्तत्काल

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्फ.द. घटितान्यवहितोत्तरत्वघटितत्वेनाननुगतत्वात्तद्युक्तत्वावच्छेदकत्वासम्भवात्। अखण्डस्फोटाङ्गीकारे तु तत्त
२८९ र्मीयाव्यवच्छिन्ने तस्मिन्पौर्वापर्यादिव्यवहारविषयत्वस्य सत्त्वयादत्वाद्योक्तानुपपत्तिः। तस्य चानुपूर्व्यंत
र्गत समस्तवर्णाएव यद्यपि व्यञ्जकास्तथापि चरमवर्णाभिव्यक्तएव सबोधहेतुरिति नोक्तविकल्पस्याप्यव॰
सर इत्याहुः। ननु वायुसंयोगानां प्रत्येकमभिव्यञ्जकत्वाभ्युपगमे घियोरित्यत्र घत्वेन च स्फोटोभिव्यज्येते
त्यत आह। परन्त्विति। तथा च विलक्षणवायुसंयोगस्य गत्वप्रकारकस्फोटाभिव्यञ्जकत्वाभ्युपगमादेवेत्य
र्थः। तदतिरेकास्वीकारः इति। तन्नसंयोगादेव कत्वादिप्रकारककारप्रतीत्युपपत्तौ स्फोटातिरिक्तत्वक॰ स्फ॰
ल्पनेमानाभावादिति भावः। ननु सरो रस इत्यादौ वर्णितिप्रसङ्गः तद्वस्यएव सत्त्वादिरूपेणाभिव्यञ्जकवायु २८९

संयोगानामुभयत्रतौल्यादतआह। एवञ्चेति। घटत्वमिति। तथाचौपाधिकभेदमादायतस्मिन्नेवघटकारात्मके॰
घटत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहःविषयेयथाघटपदव्यवहारविषयतातथारात्मकेस्फोटेसत्त्वप्रकार
प्रतीतिविषयाव्यवहितत्वग्रहेसरःपदव्यवहारविषयतेतिनसरआत्मकस्फोटस्यसरसरूपतेतिभावः। ननुतवमते
गकारादिवर्णस्याभिन्नस्फोटरूपतयानित्यत्वेनतद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वविशिष्टतदधिकरणक्षणो॰
त्पत्तिकत्वरूपाव्यवहितोत्तरत्वासम्भवात्कथमुक्तप्रकारसम्भवोऽतआह। परन्त्विति। तथाचवर्णानांनित्य॰
त्वेपितदभिव्यक्तेरनित्यत्वस्यसांख्यानामपिसंमतत्वेनतदव्यवहितोत्तरत्वस्यवर्णान्तसमभिव्याहाराबाधेनतद
दायघटादिपदप्रत्ययोपपत्तिरितिभावः। अतएवेति। अभिव्यक्तिनिरूपिताव्यवहितोत्तरत्वस्यात्तुपूर्वोव्यवहा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. रनियामकत्वादेवेत्यर्थः। नवीनैस्तथानभ्युपगमादाह स्फुटेति। एतेनेति। आनुपूर्व्यवच्छिन्नवर्णात्मकस्फोटस्यवा
२९० चकत्वव्यवस्थापनेनेत्यर्थः। अपास्तमित्यनेनान्वयि। स्फोट इति। वाचकत्वेनाभिमतोऽखण्डपदार्थ इत्यर्थः
घ इति। नैक इत्यर्थः। तत्पक्षे दूषणमाह घटपद इति। घट इत्यानुपूर्व्यवच्छिन्नस्फोटे गृहीतशक्तिकस्येत्यर्थः
कलशपदादित्यस्य गृहीततदवच्छिन्नस्फोटशक्तिकादित्यादिः। बोधप्रसङ्गादिति। घटबोधकानुपूर्वीकारणत्
ताके कलश इत्यानुपूर्व्यवच्छिन्नस्फोटस्य तदानींसत्त्वान्नित्यैकरूपत्वात्तस्य। वर्णसमुदायरूपपदस्यवा
चकत्वे तु नोक्तदोष इति भावः। अर्थधीहेतुरिति। उक्तस्थले च स्फोटस्य कलशपदरूपपर्य्यायाभिव्यक्त्यव राम.
च्छिन्नशक्तिग्रहविषयत्वाभावान्नार्थबोधप्रसङ्ग इति भावः। स्वमिति। नानापर्यायाभिव्यक्त्यवच्छिन्नश २९०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्ति ग्रहस्यावश्यमभ्युपेयत्वादिति भावः। उचितत्वादिति। औचित्यमेवाह। तथा सतीति। शक्तिग्रहत्वेनेति। तत्प-
र्य्यायगतशक्तिग्रहत्वेनेत्यर्थः। लाघवादिति। उक्तरूपायेक्षये तस्य कारणतावच्छेदकत्वे लाघवादित्यर्थः। चो
द्येतौ पूर्वकल्पे गौरवं प्रकाशयति। अन्यथेति। उक्तिवैचित्र्यमेतत्। नद्वितीय इति। पर्य्यायस्थले स्फोटनानात्व
मित्यपि पक्षो नेत्यर्थः। अनन्तेति। प्रतिपर्य्यायभिन्नानां स्फोटानां कल्पनामित्यर्थः। शक्तिमिति। तद्वद-
भिन्नानन्तशक्तिकल्पनां वायेक्षेत्यर्थः। लघुत्वादिति। तथा च वर्णातिरिक्तस्फोटकल्पनायार्थेति तत्र
त्वः। पर्य्यायेष्विति। एकधर्मावच्छिन्नबोधकनानापदेष्वित्यर्थः। अनेकेति। पर्य्यायभेदभिन्नेत्यर्थः। सर्वत्र
सिद्धत्वादिति तथा च पर्य्यायेषु नानाशक्तिकल्पना एवेति न दोषः। अयमाशयः। वर्णा स्फोटाभिव्यञ्ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या.द. काइतिस्वीकारोभवदुक्तइत्यतआस्याद्यसरोनतुस्फुटस्यवर्णानतिरेकपक्षे।तत्रपृथकशक्तिकल्पनायाअभा
२९१ वेनगौरवासंभवात्पर्य्यायशक्तिग्रहकार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशेनव्यभिचारवारणंतू
भयोःसममिति।ननुत्वन्मतेस्फोटानतिरेकेनवर्णानांनित्यत्वादुत्पत्तिघटिताव्यवहितोत्तरत्वसंबन्धेनो
त्तरवर्णेपूर्वपूर्ववर्णवत्त्वरूपशक्ततावच्छेदकानुपूर्व्यसंभवोऽतआहतदवच्छेदकेति।शक्ततावच्छेद
केत्यर्थः।प्रागिति।स्वाभिव्यक्त्यधिकरणक्षणोत्पत्तिकाभिव्यक्तिविषयत्वमितिग्रन्थेनेतिशेषः।ननुवर्णा 291
नांनित्यत्वाभ्युपगमेनित्यवर्णैरेवस्फोटकार्य्योपपत्तौस्फोटस्यैवासिद्धिः।तथाहि।आनुपूर्व्याभवदि राम:
रेवोपपादितत्वात्तद्भिन्नस्वनामेवनेवांपदत्वेनतत्प्रत्यक्षस्यसौलभ्येनशक्तिग्रहस्याप्युपपादितत्वा २९१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेवैदंपदं वाक्यमिति प्रत्यभिज्ञोपपत्तेश्चेत्यत आह। दिगिति। तदर्थं स्तु यदि स्वतन्त्रा नित्या वर्णाः स्युस्तदा स्या
देव नैः स्फोटान्यथासिद्धिः किन्तु कत्वादिना प्रतीयमानः स्फोटस्यैव कारणादिवर्णा इत्यभ्युपगमे नोक्तान्यथा
सिद्धिसंभवादत एव नानावर्णकल्पनाप्रयुक्तगौरवशङ्कापि नेति। ननु कोसौ स्फोटो यदनतिरिक्ता वर्णा इ
ति चेदत्राहुः। ईश्वरसिसृक्षामायाविन्दुपरपर्यायत्रिगुणात्मकाव्यक्तप्रभवः शब्दब्रह्मापरनामा चेतनाधि
ष्ठितोनभिव्यक्तवर्णविशेषोरवपराभिशब्दैर्व्यवह्रियमाणो नादः स्फोट इत्युच्यते। स च सर्वगतोपि पुरु
षस्य ज्ञातार्थविवक्षाधीनप्रयत्नाधिष्ठितमूलाधारस्थपवनेनाभिव्यक्तः परेति व्यवह्रियते। नाभिपर्यन्तमा
गच्छता तेनाभिव्यक्तः पश्यन्तीति। पुनर्हृदयमागच्छता तेनैवाभिव्यक्तस्तदर्थोल्लेखिज्ञानविषयः परश्रोत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल०द० ग्राह्यत्वात्सूक्ष्मो मध्यमा वागिति। वक्त्रानुकरणापिधाने सूक्ष्मतरनादाभिघातेनोपांशुप्रयोगे च श्रूयते।
२९२ सा च वक्तास्यपर्य्यन्तमागच्छतौ तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य ततः स्थानेष्वभिव्यक्त
ः परश्रोत्रेणापि ग्रहीतुं शक्या वैखरीति व्यवह्रियते। उक्तार्थे प्रमाणं च। चत्वारि वाक्परिमिता पदा
नि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति श्रुति
र्विन्दोस्तस्मात् क्रियमाना इवाऽव्यक्तात्मको भवत्साराव श्रुतिसम्पन्नेः। शब्दब्रह्मेति गीयते इति पुराण
वाक्यं च भागवतेप्येकादशस्कन्धादौ स्फुटोयमर्थः। शिक्षायामपि। आत्मा बुद्ध्या समेत्यार्थान्म रामः
नो युङ्क्ते विवक्षया मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमाप २९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घमारुतः। वर्णान्जनयते इत्यनेन। तथा च हृदयावच्छिन्नमध्यमार्यो योनादांश आन्तरप्रणवरूपः सएव वाचकः
ओङ्कारस्य सर्ववाक्तेयास्पर्शोऽस्माभिर्व्यज्यमाना नानारूपा भवतीति श्रुतिः। सर्वप्राणिहृद्देशस्थत्वाच्च ब्रह्म
पदव्यवहार्य्योऽपि इत्यन्यत्र विस्तरः। इति प्रतीतेरिति। अन्यथा वर्णपरम्परारूपमालायास्तत्समूहरूपपदान॰
तिरिक्ततया धारणेयभावावगाहिप्रतीत्यनुपपत्तिरिति भावः। अन्यथेति। प्रतीतेः पदार्थासाधकत्वे इत्यर्थः। कया
त्वे घट इति प्रतीत्याभेदावगाहिन्या नन्विसिद्धिः। प्रतीतिस्तदैसाधकत्वे तु घटाद्यसिद्धिः स्यादेव। संउक्तकयालघ
यमादयैवतादृशप्रतीत्युपपत्तेरिति भावः। कोऽस्तु भेदवितितुश शेनारुचिःसूचिताः तद्बीजं तु वर्णातिरिक्तस्फो॰
टानङ्गीकारेऽपि नोक्तप्रतीत्यनुपपत्तिः। आनुपूर्व्यवच्छिन्नवर्णानां मालापदार्थत्वेनतत्रा। न तु पूर्वान्तुपपद॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ साधारणधेयभावसंभवात्।घटकपालादीनांविजातीयैकारणजन्यत्वेनतद्भेदस्यायत्नपितुमशक्यतेभोक्तातिश
२९३ सङ्गभावाच्चेति।अन्येतुनवर्णानांस्फोटात्मकत्वम्।किन्तुस्फोटस्यवर्णाभिव्यञ्जकत्वमेव।नचप्रत्येकव्यञ्ज
कत्वपक्षोक्तदोषः।प्रयोगान्तर्गतसकलवर्णानांतद्व्यञ्जकत्वेपिचरमवर्णाभिव्यक्तस्यैवतस्यवाचकत्वोपग
मादतएवनायंवर्णाज्ञाभिव्यक्तपुनरमर्षबोधः।तस्यैकत्वेपिअन्त्यरूपप्रतिबिम्बनात्तद्रूपत्वेपितस्यैवप्रतीत्याना
नात्वेनप्रतीतिरौपाधिकी।एकस्यैवमुखस्यकृपाणदर्पणादर्पणाद्यभिव्यञ्जकवशाद्दैर्घ्यवर्तुलत्वादिप्र २९३
तीतिवत्।अतएवानुगमार्थन्नतत्रजातिकल्पनापि।वर्णाभिव्यञ्जकाभावाच्चनकदाचिदपिवर्णाग्रहित्वे॰ एमः
नतत्प्रतिबिम्बसमर्पकाश्चसंस्कारास्एवतेचयेनक्रमेणचित्तस्थास्तेनैवक्रमेणाव्यञ्जकरूपरूपितनातस्य॰ २९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भ्युपगमाच्च। सरोरस इत्यनयोरविशेषः। व्यञ्जकरूपरूषितस्यैव तस्यार्थे शक्तिग्रहाच्च न घटादिपर्य्यायाभिव्यक्ते

स्फोटे गृहीतशक्तिकस्याप्रसिद्धपदश्रवणेऽर्थबोधापत्तिरत एवेदमेकं पदमेकवाक्यमिति व्यवहारः स्वरसतः सङ्ग

च्छ इत्याहुः। एवमिति। अखण्डस्फोटस्यैव वाचकत्वे इत्यर्थः। अप्रामाण्यप्रसङ्गमेवोपपादयति। पदस्येति।

वाक्यस्याप्युपलक्षणम्। अखण्डत्वादिति। प्रकृतिप्रत्ययविभागशून्यत्वादित्यर्थः। तथा च तस्यैव वाचकताया

भवद्भिरुपपादितत्वादिति भावः। शास्त्रस्य व्याकरणात्मकस्य। प्रकृतिप्रत्ययाभ्यामिति। ताभ्यां यद्व्युत्पादनं श

क्तिबोधनम्। तन्मात्रप्रयोजनत्वादित्यर्थः। तथा च प्रकृतिप्रत्ययविभागेन पदार्थवाचकत्वबोधकस्यास्य शा

स्त्रस्य पदस्याखण्डत्वेऽप्रामाण्यापत्तिरिति भावः। मूलेऽपेपप्रातियन्त्वर्थेतिवचनविभीरणामेनोत्तरं चाप्पन्नोति

ल.ल. उपेयस्यवोध्नीयस्यप्रतिपत्तयेऽवाकल्पनाश्रिनास्वीकृताश्रुतिनेतिद्वेयः। तत्रदृष्टान्तमाह। यथाकाशादिवदि
२९५ ति। दृष्टान्तमेवस्फुटयति। सारेऽयंभावइतितत्रहिभृगुर्वैवारुणिर्वरुणंब्रह्मपृष्टवान्। तेनतपसाब्रह्मजिज्ञास
स्वेत्युपदिष्टोऽन्नंब्रह्मेतिव्यजानात्तस्योत्पत्त्यादिकंबुध्वापुनस्तेनपृष्टः प्राणोब्रह्मेतिव्यजानादितिसर्वत्र
संवध्यतेतस्यापितथात्वंबुध्वापृष्टोमनोब्रह्मेति। तस्याप्युक्तिमत्वंज्ञात्वाभवतियत्तस्यत्वंतत्तुरीयंयन्मध्यं
तन्मांसंयदणीयस्तन्मनइतिश्रवणादेतिन्यत्त्वमवधार्य्यपुनः पृष्टोविज्ञानंब्रह्मेति। तस्यापितत्तदुपहितत्वे
ज्ञात्वापुनःपृष्टेनोपदिष्टः आनन्दोब्रह्मेतिव्यजानात्ततोवस्तुतत्त्वंप्राप्यस्थितइतिप्रतीयादितस्मान्ननुनेयंव राम:
क्ष्यीपञ्चकोशप्रतीयादिका। अस्यसमस्यासुपायत्वादकोशत्वाच्च। तस्यैवतत्रब्रह्मत्ववोधेतादित्याशङ्क २९५

यानन्दव ह्लीस्य पञ्चकोशोदाहरणमाह। यथावेति। तत्रत्याहि पञ्चकोशाउपासाएव। उपदिष्टपञ्चमानन्दं
कोशस्याधिवैषयिकापिकतयाः नित्यत्वेनाब्रह्मत्वात् किंतु ब्रह्मपुच्छं प्रतिष्ठेत्यत्र पुच्छ समाराब्रह्मपदस्यैवमुख
ख्यब्रह्मपरत्वम्। अत्रजस्वाधारार्थकः पुच्छशब्दोऽनुपपद्यतो तस्यलाङ्गूलरूपमुख्यार्थस्य वाधात्। एवन्त्वानन्द
वल्ल्यांयथा पञ्चकोशाः सर्वाधारब्रह्मबोधनायोपायतया पाता नन्तु तेषां वास्तव ब्रह्मत्वं तथैहाप्यवास्तव
प्रकृतिप्रत्ययवाचकत्वमुत्पाद्यनं वास्तवस्फोटनिष्ठवाचकत्वबोधनायेत्यास्वखण्डलार्थः। श्रवणादित इति
आदिनाम ननादिपरिग्रहः। नशास्त्रमिति। एतच्छास्त्रं विनापि श्रवणादिना तद्बोधेन व्यभिचारादिति भावः
उपायस्योपायान्तरादूषकत्वे सदृष्टान्तां युक्तिमाह। तथावेति। व्याकरणाध्ययनस्य स्फोटज्ञानत्वं नकार्यं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.इ. तावच्छेदके किन्तु तादृशज्ञानगतनैजात्यं तदवच्छिन्नं च नो पापान्तरादिति न व्यभिचारः। वैजात्यस्य प्रागनुप
२९५ स्थितावपि कारणताग्रहो विधिवादोक्तदिशावसेय इति भावः। मन्त्रजन्यमिवेति। मन्त्रजन्यतावच्छेदकमि
वेत्यर्थः। एवमग्रेपि। ननु पुरुषार्थासाधकस्य तस्य संपादनं वैयर्थ्यमत आह। तस्य चेति। स्फोटज्ञानस्य चेत्यर्थः
यज्ञादीनामिति। कामनापरित्यागेन विधीयमानानामित्यर्थः। यज्ञादीत्यादिना तमेतं वेदानुवचनेन ब्रा
ह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुत्युक्तदानादिपरिग्रहः शरीरादीत्यादिना वाग्गिन्द्रि
यपरिग्रहः। ननु शरीरादिशुद्धेरप्यपुरुषार्थत्वात्तदुद्देशेनापि प्रवृत्तिर्दुर्घटेत्यत आह। साक्षादिति। स्वर्गा राम:
देरित्यादिनापवर्गपरिग्रहः। साक्षात्स्वर्गहेतुत्वं परम्परयापवर्गहेतुत्वं चेत्यर्थः। स्वर्गहेतुत्वे चैकः शब्दः २९५

295

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिभाष्यपठितश्रुतिः। परम्परया मोक्षहेतुत्वे तु ब्रह्मणो वेदितव्ये इति स्मृतिः प्रमाणम्। पान्चरात्रे केवात्मतत्त्व
ज्ञानं तमेव विदित्वेति श्रुत्या तदतिरिक्तस्य साक्षान्मोक्षहेतुत्वव्यवच्छेदनादिति बोध्यम्। उक्तार्थे हरिसंमति
माह तदुक्तमिति। तत्र नादात्मकस्फोटप्रतिपादकं शास्त्रम्। अपवर्गस्य मोक्षस्य द्वारम्। तदुपयोगीत्यर्थः। हेतु
गर्भं विशेषणमाह। वाङ्मलानामिति। चिकित्सितमिति। ज्ञापनयनार्थकमलनतो क्तेः। क्तप्रत्यये वाङ्म
लकर्मकापनयनसाधनं परस्ततो मोक्षद्वारमित्यर्थः। अतः शुद्धो यज्ञादौ मामिव वाकस्फुज्ञावेतस्योपयोगादि
तिदितिभावः। यतः सर्वविद्यानां मध्ये पवित्रमतोऽधिविद्यं विद्यासु प्रकर्षेणादीप्यत इत्यर्थः। तथा चोक्तम्।
तेषां च सामर्ग्ये प्रत्यापवित्रं महर्षयो व्याकरणं निराहुरिति। इदमिति। सिद्धिसोपानपर्वणां मध्ये इदं प्रथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. मंपरस्थित्यधिकरणमित्यर्थः। अत्रस्फोटे। अतीतेति विपर्य्यासः भ्रान्तिरन्यःस्तत्तत्त्वज्ञानवानिति नियावत्।
२९६ केवलांपरपश्यन्ति। अनुपश्यन्तीति। योगजधर्मेण प्रत्यक्षीकरोतीत्यर्थः। तथा च योगिन्वासिद्धौ किमवशि-
ष्यते तत्त्वज्ञानमित्यर्थः। तदुक्तं भागवते चादर्शे नादनिरूपणानन्तरं पदुपासनयाब्रह्मन्योगिनोमलमात्म-
नः। द्रव्यक्रियाकारकाख्यंधूत्वायात्यपुनर्भवम्। इतिभावः। अलौकिकत्वासिद्धेरिति। पञ्चकोशादिवत्स-
रूतिप्रत्ययभिभागस्यापिमापिकत्वेननात्यन्तासत्त्वशशशृङ्गादिवदलीकत्वमिति वक्ष्यमाणत्वादित्यर्थ 296
ः। अवास्तवत्वेपि मणिप्रमाप्रतिविम्बस्य मणिप्राप्त्याविवेतस्यापि परस्फोटदर्शने उपयोगसंभवादि यम:
तिभावः। आदिपदेनेति। पञ्चकोशौदित्यत्रोपात्तेनादिशब्देनेत्यर्थः। न्यायकुसुमासवादेप्रपञ्चितः २९६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्पत्तिविनाशप्रतीतिसाक्षिकं वर्णा । नास्ति नित्यत्वं तादृशवर्णात्मकस्फोटस्याप्युपगमे तस्याप्यनित्यत्वप्रसङ्ग इ-
त्याशङ्कासमाधानपरतया मूलमवतारयति नन्विति । वर्णजातिर्नास्तीति । वर्णानां तज्जातिकत्वादिजातीनां चेत्य-
र्थः । तस्यादिति । अयं भावः । उत्पन्नो नष्टो वा घकार इति प्रतीतेः । ककारादिवर्णात्मकः स्फोटस्तद्गतजातिर्वोत्पन्ना-
दिमत्त्वेन विषयो वाच्यः । तथा च न संभवति द्वयोरेव नित्यत्वाज्ज्ञायमानायास्तस्या विषयबाधेन भ्रमत्वापत्ते-
रिति । तादृशप्रतीतेर्भ्रान्तित्वस्यापत्तेश्चाह । वाक्यसंयोगेति । कादिप्रतीतिर्नास्तु । ककारो गकार इत्यादिबुद्धी-
नाम् । भ्रमत्वापत्तिरिति यथाश्रुताभिप्रायेणायम् । पूर्वोक्तातिमकल्ये भ्रमत्वाप्रसङ्गात् । न च तन्मतेपि कत्वादी-
नां लौकिकविषयत्वानुपपत्तिः । तद्व्यञ्जकश्रोत्रसमवेतसमवायस्य लौकिकसन्निकर्षस्याभावादिति वाच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰ द॰ म। तन्मते कत्वादीनां वायुसंयोगइति धर्मत्वेनकत्वं साक्षात्करोमी तिप्रतीत्यास्तत्समवेतत्व ज्ञकसमवा-
२९७ यस्यैव संसर्गतो ग्रामेन लौकिक विषयत्वानयायत्। नाहष्टोगनेकघ्नतीतीनां भ्रमत्वकल्पनायेक्षयैतत्कल्प-
नायास्वौचित्यात्। आरोपे सति निमित्तानुसरणमिति न्यायात् मूलं तु तन्मत इत्यस्यावतारणीयम्। ननु स्व
समवेताभिव्यञ्जकगतसमवायस्य संबन्धतानके मान्याद्द इत्यत आह। कल्पितानामिति। कल्पितानां समवायसं
बन्धेन तद्वृत्तिनामप्युक्तसंबन्धेन तत्र कल्पितानां वायुसंयोगगतधर्मविशेषाणामुपाधित्वमुदात्तत्वा-
दिप्रकारकप्रतीतिजनकत्वमित्यर्थः। अधिकं त्वग्रे वक्ष्यते। इदानीं गुरुरीकारणायमीमांसकमतमाह। उ रामः
दात्तत्वादीति। आदिनानुदात्तत्वपरिग्रहः। उदात्तत्वयोः। परस्परविरोधाहरणाभिदेन तत्स्वत्त्वनाच्यो। वर्ण २९७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदस्य तद्‌नित्येनैकत्वे वास्यादेवतु नसम्भवतीत्याह तस्यैकत्वादित्यादि। नित्यत्वे प्रमाणमाहुः। तच्चेति। नित्य
त्वे मेकत्वं चेत्यर्थः। त्यागाद्योगादिति। अविषयत्वायोगादित्यर्थः। बाधिकेति। व्यक्त्यभेदप्रतीति बाधिकेत्य
र्थः। प्रागसत्त्वे सतीत्यादि। स्वाधिकरणसमयध्वंसवत्त्वसंवन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छि
न्नकालिकविशेषणतासंवन्धरूपाया इत्यर्थः। हीतियाक्षणसंवन्धस्य निरूक्तसंवन्धेन स्वतन्त्वान्न तत्रातिप्र
सङ्गः। अत एवेति। अनुभवविरुद्धत्वादेवेत्यर्थः। प्रत्ययोद्धानमः। व्यवहारः। शब्दप्रयोगः। नन्वाद्यौ रणमपितः
त्यस्य तत्कृत्नौ मापारस्वतयावसेयप्रतीतिर्वर्णनित्यत्वसाधिकेत्यत आह। उच्चारितत्वं चेति। अभिव्यक्ति विर
शिष्टत्वं मानादिविषयत्वमं तथाचतादृशप्रतीत्याभिव्यक्तिनिष्ठं वर्णनिरूपित विषयत्वमेव विषयीक्रियतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्त॰द॰ त्पतिनिरूवर्णत्वतित्त्वमितिनसानित्यत्वसाक्षिकेत्तिभावः।ननुवर्णाभिव्यक्तिजनकः कण्ठताल्वाद्यभि॰
२९८ घातस्योच्चारणपदार्थोनवर्णोत्पत्तिजनकइत्यत्रकिंप्रमाणम्।किंचवर्णानित्यत्ववादिनामुत्पन्नोगतोव॰
र्णोवर्णमुत्पादयतीत्यादिप्रयोगाइष्टाएवेतिनानुभवविरोधोपीत्यतआह।किञ्चेति।उत्पत्त्यादेरित्या॰
दिना कि।नष्टोवर्णइतिप्रतीतिसाक्षिकविनाशः।परिगृह्यते।परस्परया।स्वाश्रयध्वनिव्यञ्जकत्वरूपया।ना
तिरिक्तेति।वर्णानित्यत्वसाधिकेत्यर्थः।ननुस्फोटातिरिक्तेतितदर्थः।तैःस्फोटानङ्गीकारात्।नन्वन्यध 298
र्मोत्पत्त्यादेस्तादृशप्रतीत्यावर्णेष्ववगाहनेभ्रान्तत्वापत्तिरतआह।परस्परयावर्णेति।स्वाश्रयसंयोगा राम॰
वगाहित्वाल्लोहितःस्फटिकइतिप्रतीतेर्यथानभ्रमत्वंतथाऽस्याअपीतिभावः।अवसिध्यतइत्यस्यैवोत्पन्नो २९८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णा इतिप्रतितेरिति शेषः। ननु तादृशप्रतीतेर्नियमेन परस्परासंबन्धविषयत्त्वकल्पने गौरवमत आह। परन्त्यीति। अति
रिक्तेति। अनेकेत्यर्थः। तथा चानेकवर्णतद्ध्वंसादिकल्पनायेक्षया तत्प्रतीतेर्नियम्। तस्ताद्धासंबन्धा वर्णाहित्त्वकल्प
नैव लघीयसीति भावः। यदि वर्णास्थले ध्वनिर्नैयत्यं स्यात्त्यायेदेवतदोत्पत्तेस्त[illegible]ठिन परस्परासंबन्धेन वर्णानियुता।
नत्वैव वर्तमानाभाव इत्याशङ्क्य निराचष्टेनचेति। वर्णपार्थक्ये न ध्वनेर् ननु भवादिति भावः। हेत्व समवधानादपि न
त्तत्त्वं घटत इत्याह। तदुत्पत्तेरिति। शब्दो स्पाभिघातजवायुसंयोगादेरित्यर्थः। वर्णानुत्पत्तेरिति। वर्णा न भि
व्यक्तेमित्यर्थः। दर्शनादीति दशिज्ञानसामान्यार्थः। सत्त्वादिति। तथा च पार्थक्येनानुभूयमानायाः प्रतीतेर्भि
द्वाभिघातजकण्ठवायुसंयोगादेर्हेतोश्चसत्त्वान्न वर्णाभिव्यक्तिस्थले ध्वन्यनैयत्यमित्युक्तसंबन्धविषयक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल.द. प्रतीतिर्निराबाधेतिभावः।नवैवेति।वर्णस्थलेष्वन्यसत्त्ववादिनरवेत्यर्थः।विपरीतगौरवमिति।स्वकारणबला८
२९९ ञ्जापमानेध्वनौवर्णान्यादकसामर्थ्याः।प्रतिबन्धकत्वकल्पनमयुक्तंलाघवायेस्त्रयाविपरीतगौरवग्रस्तेतिया
वत्।तेषामिति।वर्णनित्यतावादिनांमीमांसकानामित्यर्थः।एवञ्चेति।उत्पत्त्यादीनांवर्णधर्मत्वइत्यर्थः।
प्रतिबन्धेवेति।पराभिमतसमाधिसमाधेयप्रतिपादकमुत्तरंप्रतिबन्दिसमेत्यर्थः।तथाचतत्रमीमांसकेरुत्पत्त्या
दिप्रतीतेःप्रमात्वेपःसमाधिराश्रितःसएवास्माभिरप्यनुसर्तव्यइतिभावः।तथाचास्वराउवाक्यस्फोटस्वीकारे
नकिञ्चिद्बाधकमितिफलितम्।नन्वेतत्कल्पेपदानामसत्त्वेनमीमांसकसिद्धान्तविरोधः।तथाहिव्रीहिभिः राम:
यजेतेत्यत्रयागेनद्रव्यमाक्षेपेव्रीहिश्रुतिर्नियमार्थाव्रीहिभिरेवनान्यैरितितत्रव्रीह्यभावेनित्यकर्मणःप्रार २९९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वकाम्यकर्मणस्त्वलोपो माभूदिति प्रतिनिधिरुपादीयते व्रीहित्वस्य शक्युपलक्षणत्वेन प्रतिनिधेरपि श्रौतत्वात्
तत्प्रतिनिधिमुपादाने तद्वाक्यावगतार्थाननुष्ठानान्नित्यादेर्विलोपापत्तिः। नावारकत्वाकक्रियाया अन्यत्वा
त्। क्रियान प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयत एवेति परिभाषाया या बुद्धेर्दृष्टः। एवं श्वेतं छागमालभेतेत्यत्र क्रि
यायाश्छागद्रव्येण संबन्धः श्रौतो द्वितीयाश्रुत्या तस्य साक्षात्प्रतिपादनात्। श्वेतगुणस्य तु वाक्यीयः सः। ते
षामानाधिकरण्यात्तस्या निर्गुणस्य द्रव्यस्य निरधिकरणस्य गुणस्य चासम्भवात्। श्वेतगुणस्य छागसंबन्धे
मुपजीव्यैव क्रियासंबन्धात्। श्रुतिप्रतीयमानद्रव्यसंबन्धाद्वाक्यप्रतीयमानगुणसंबन्धस्य दुर्बलत्वाच्छ
त च्छागाभावोऽन्यगुणकश्छाग आलभ्यते न तु श्वेतगुणयुक्तो मेषः श्रुतिबाधापत्तेः। तस्य वाक्यावगतपक्षेऽस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. म्भवात्। एवैमेवेर पदार्थनिबन्धनमीमांसान्यायासम्भवोपि। अखण्डस्फोटस्यैव भवन्मते ऽखण्डार्थत्वेन केनक
३०० स्यबाधो भवेदिति चेत्। अत्राह। अखण्डवाक्यादखण्डतत्तदर्थाद्धरे खण्डवत्प्रत्यायेन पदपदार्थावबोधेपि तत्त्वभूते
नवस्तुव्यवहारासम्भवाद्व्यवहारकाले निर्ज्ञातत्त्वस्यहेतोस्तैर्नानाप्रकारैः पदतदर्थानां व्यवह्रियमाणत्वान्नतद्वो
भिः यद पदार्थानां वास्तवसत्यत्वम्। वाक्यार्थस्यापि तदापेक्षिकमेव परमार्थदशायां सर्वस्यापि व्यावहारिकस्या
सत्यत्त्वादिति। नैयायिकास्तु सर्वमिदं वर्णानां नित्यत्वे सम्भवेत्तच्चैव तु प्रमाणाभावः। शब्दमात्रस्याकाशसमवायि 300
कारणकत्वात्। भेरीदण्डयोगादीनां ध्वन्यन्तरस्य शब्दं प्रति इव कण्ठाद्यादिस्थानवाद्यभिघातस्यापि वर्णात्मकशब्दं रामः
प्रति अन्वयव्यतिरेकाभ्यां निमित्तत्वावधारणाच्च। एवञ्च तादात्म्यसंबन्धे नञन्यभावस्य प्रतियोगितासंबन्धे ३००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचंसंस्थावच्छिन्नंप्रतिहेतुतयोच्चरितवर्णस्यैकक्षणान्तरितस्याप्रतीतेर्नष्टोवर्णइतिप्रतीतेश्चरमाव्यवहितोत्तरवर्णस्यै
वनाशकतावच्छिन्नप्रतियोगितासंबन्धेनयोग्यविभुविशेषगुणनाशंप्रतिस्वसामानाधिकरण्यस्वाव्यवहितपूर्व
वर्त्तित्वोभयसंबन्धेनयोग्यविभुविशेषगुणस्यहेतुतायाज्ञानादिस्थलेक्लृप्तत्वाच्च। कण्ठताल्वाद्यभिघातस्यवा
चकत्वादिकमेवकार्य्यतावच्छेदकम्। ननुतत्तद्वर्णाभिव्यक्तित्वंगौरवात्। नचलौकिकविषयिताकत्वमेव
तदवच्छेदकंवाच्यम्। इतिनगौरवमितिवाच्यम्। तथासतिकोलाहलप्रत्यक्षप्रसङ्गात्। नहिकोलाहलप्रत्य
क्षंक। त्वादिविषयकम्। यतस्तल्लौकिकविषयितायाः कार्य्यतावच्छेदकघटकत्वासंभाव्येन। किञ्चघटाप्रत्या
दकदशायादेरपितदभिव्यक्तित्वरूपेणकार्य्यतावच्छेदकत्वापत्तौघटादेर्नामपिनित्यत्वापत्तिरितिबहुव्याकोपः। न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल. द. वृसतस्वाभिव्यक्तिरिति सारेइव्य मताश्रयणादुक्ताप्रतीतिरिष्टैवेति वाच्यम्। तन्मतस्याप्यतमनोरमत्त्वात्। तथा हि।
३०१ अभिव्यक्तिः सत्त्वसती वा। नाद्यः। घटोत्पत्तिदशायां घटस्येवं स्याअपिसत्त्वाद्घट इतिप्रतीत्यापत्तेः। अभिव्यक्ते
ऽप्यभिव्यक्त्यङ्गीकारे तु तयाज्ञपिकार्यसत्त्वादुक्तदोषादुरुद्धारस्य। अन्त्ये त्वसिद्धान्तव्याघातः। युक्तितोल्पे
न पदार्थान्तरस्याप्युत्पत्तिसिद्धेरिति। किञ्चोत्पन्नो घटो नष्टो घट इति प्रतीत्या घटादिनामनित्यत्ववदुत्पन्नः
ककारो नष्टः ककार इत्येवं लक्षणप्रतीत्या ककारादीनामनित्यत्वमेवावधार्यते। कत्वादिनां संयोगधर्मत्वं दुरूपपा
दमेव। वर्णासमवेतत्त्वेन श्रोत्राग्राह्यत्वप्रसङ्गात्। नवोक्तसन्निकर्षादेव तत्प्रत्यक्षोपपत्तिस्तथा सति शब्दः राम:
दिप्रत्यक्षानापत्तेः। न च तत्तं वन्धस्य ककारं शृणोमीति प्रतीतेभावे प्रमाणाभाव इति। राहं शृणोमीति प्रतीतेः ३०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समवायविषयकत्ववदुक्तप्रतीतेरपि तद्विषयकत्वेनोपपत्तेश्च। समवायांशे सर्वत्रैतादृशप्रतीतीनां भ्रमत्वमित्यपि न। व
र्णासमवेतत्वस्य तन्नाभ्युपगमेनाविषयाबाधात्। एवञ्च वर्णानामवकत्वेन तन्नादात्तत्वादिप्रतीतिरपि स्वरसतः स
ञ्जस्फुटत इति दृष्टान्तादौ भिन्नस्यमेव। एवं च वर्णप्रागभावध्वंसानां प्रमाणसिद्धानामपि लपितुमशक्यत्वान्न तत्क
ल्पना गौरवमपि। न च वर्णानित्यतावादिमते सोऽयं गकार इति प्रत्यभिज्ञानुपपत्तिः स्यात् तज्जातिं यत्त्वि
षयत्वेनोपपादने तु तज्जातीयोऽयमित्येवाकारः स्यादिति वाच्यम्। यत्र प्रत्यभिज्ञायां गत्वादेर्जातित्वेन भानं
तत्रैव तस्या तज्जातीयोऽयमित्याकारापत्तेः स्वरूपेण तत्तत्त्वे सोऽयमित्याकार इत्यभ्युपगमात्। तज्जातीयाभे
दावगाहित्वात्तदेवेदमित्याकारायाः प्रत्यभिज्ञायाः सर्वसिद्धत्वाच्च। तस्माद्वर्णात्मकस्फोटस्य वाचकत्वम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ सम्भवद्वृत्तिकमेव। स्फोटस्यध्वन्य॰ तिरिक्तत्वाभावाच्च। योगशास्त्रादौ तस्य निरूपणं तु उपासनार्थमेवेति प्रागुक्त
३०२ प्रायम्। सखण्डस्फोटस्तु प्रागेव निरस्त इत्याह पूर्व्ववच्छिन्नवर्णानां वाचकत्वं मुख्यमिति वदन्ति॰ इत्यमिति। पू
र्वोक्तप्रकारेणेत्यर्थः। पञ्चेति वर्णपदवाक्याखण्डपदाखण्डवाक्यभेदभिन्ना इत्यर्थः॥ ॥इति भूष
णसारदर्पणे व्यक्तिस्फोटनिरूपणम्॥ ॥क्रमप्राप्तं जातिस्फोटं निरूपयितुं अवसरस्यसङ्गतित्वं सूचयति
नन्वुक्तरीत्या स्फोटातिरिक्तवर्णानामभ्युपगमे तेषां वाचकत्वविचारः। काकदन्तपरीक्षासमोत आह। अयं
भावइति। इकारगकारयोरभेदे साधकमाह। स्फोटस्यैकत्वादिति॰। तदभिन्नाभिन्नस्य तदभिन्नत्व नियमेन रास॰
इकारात्मकस्फोटाभिन्नगकारे तदभेदावगाहित्वं बुद्धेः। प्रमात्वापत्तिरित्यर्थः। अनायत्तेश्चेति अभेदादेव॰ ३०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वताहृशभेदावगाहित्वहेतुः। प्रमात्वानुपपत्तेरित्यर्थः। ननुवर्णात्मकस्फोटस्यैकत्वेपिगत्वादिविरुद्धधर्माध्यासमू
लकभेदप्रतीतेर्नानुपपत्तिः। प्रामाण्यंतुतस्यावर्णैकत्वादिमतेइवायास्तमेवेत्यतआह। किंचेति। उपाधित्वा
भिमतगत्वादिइत्यर्थः। आद्येस्फोटेगत्वाभ्युपगमपक्षे। तदेवागत्वमेव। ननुगत्वादेर्वर्णधर्मत्वात्भेदेनवे
द्यंतस्यतदात्मकत्वमतआह। वर्णनित्यतावादिभिरिति। मीमांसकादिभिरित्यर्थः। अतिरिक्तेति। धर्मध
र्मिणोरभेदाभ्युपगमादित्यर्थः। गौरवमिति। गकारादिप्रतीतीनांगत्वादिविशिष्टगकारादिविषयत्वे
नोपपत्तिसम्भवादितिभावः। अन्त्ये। स्फोटेगत्वाद्यनभ्युपगमकल्पइत्यर्थः। विरोधइतितिभावः। वायुसं
योगवृत्तितिस्वमते। ध्वनिनिष्ठेतितिमतान्तरे। पूर्वोक्तरीत्यानादृशवैजात्यारोपेणप्रतीतेः स्वयपादत्वादाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल०द० आरोप्येति। भ्रमत्वायोगादिति। साक्षात्संबन्धेन प्रमात्वोपपत्त्यावारोपितसंबन्धविषयकत्वे प्रमाणाभावादि
३०३ तिभावः। नन्वतिरिक्तानेकवर्णकल्पनापेक्षया तादृशप्रतीतीनां भ्रमत्वमेवन्याय्यमत आह। अस्तुवेति। त
थातावत्तैवप्रतीतेः प्रामाण्यनिर्वाहेऽलं स्फोटकल्पनयेतिभावः। तस्य संयोगस्य। अतीन्द्रियत्वमिति। लौ
किकविषयताशून्यत्वमित्यर्थः। दोषः। बाधकमित्यर्थः। प्रतिवन्द्योनस्यति। धर्मवदिति। यथातीन्द्रियमा
त्रवृत्तिधर्मत्वस्य साक्षात्काराविषयत्वव्याप्यत्वं त्वया न स्वीक्रियते। तथातीन्द्रियसंयोगगतविशेषस्यमया 402
पीत्यर्थः। यद्वातीन्द्रियसेन्द्रियकत्वमन्यतास्मम्भवतु किंतदा तादृशवैजात्यस्य स्फोटधर्मत्वमपितथै रामः
व। प्रत्यक्षानुपपत्तेरितिभावः। ननु कत्वादिधर्माणामतीन्द्रियत्वेपिज्ञानलक्षणयाभानादितीतोनेत्रानेवा। ३०३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धकाभावइतिचेन्नकत्वाद्इतिप्रत्ययेकत्वंसाक्षात्करोमीत्यनुव्यवसायेनकत्वांशेलौकिकविषयत्वावगाहे
नोक्तप्रकारासम्भवात्।शङ्ख: पीतइतिज्ञानानन्तरोत्पन्नपीतत्वंपश्यामीतिप्रत्ययस्तुभ्रमएव।दोषविशेष
स्यताहृशविषयतानियामक।त्वकल्पनेगौरवादितिविभावनीयम्।उपसंहरति।तस्मादिति।कत्वादिवि
शिष्टविषयकसाक्षात्कारोत्पत्तिप्रमाणसद्भावादित्यर्थः।सनत्त्येवेति।स्वाभिमतस्फोटातिरिक्ताः।कादे
यः सत्त्येवेत्यर्थः।परामिति।किन्त्वित्यर्थः।गौरवादिति।तत्तद्वर्णाभेदाभिन्नानन्तशक्तिकल्पनेगौरवादि
त्यर्थः।ननुतावद्वर्णगतपदत्वादिजात्यनङ्गीकृतेस्वैकस्याएवशक्तेरस्तुगमान्न नानात्वप्रयुक्तगौरवम
तआह।आकृत्यधिकरणेतिव्यापरतनामार्थनिरूपणेप्रपञ्चितः।ननुताहृशजातौमानाभावोऽत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०४ आह हरियदङ्गमितीति। अनुगतधर्मं विना सकलताद्दशयदेत्वेककारताद्दशप्रतीत्यनुपपत्तेरिति भावः। नन्व
नुगतप्रतीतिमात्रस्य जातिसाधकत्वे विभुत्वादेरपि जातित्वापत्तिरतः कारणतावच्छेदकत्वादिनैव त
त्सिद्धिर्वाच्या तदभावात्प्रकृते कथं तस्य जातित्वमत आह। इत्थंरूपस्थितित्वावच्छेदेनेति। कार्य्यताव
च्छेदकप्रदर्शनमिदम्। अवश्येति। अन्यथा तावत्पदानां तत्तद्व्यक्तित्वेन नानाव्यक्तिचारेणासंभवादि
ति भावः। प्रतीत्यवच्छेदकत्वयोरिति। अनुगतप्रतीत्यवच्छेदकत्वयोरित्यर्थः। वर्णानुपूर्व्येति। ताद्दश
जात्यभिव्यञ्जकत्वेनावश्यकल्प्यया तयेत्यर्थः। निर्वाह इति। तथा चावश्यक्लृप्तनियतपूर्ववर्तितावः रामः
च्छेदकतस्याऽऽनुपूर्व्या वानुगतप्रतीतिकारणतावच्छेदकत्वयोः संभवेन तद्रूपविशिष्टयदोपस्थिति ३०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेन हेतुत्वमन्यथासिद्धेरिति भावः। अन्यथासिद्ध्यापत्तेरिति। न च सेष्टा प्रत्यक्षादिप्रमाणविरोधादिति भावः। न
नु जातेः। शक्तत्वे जातित्वं शक्ततावच्छेदकं वाच्यम्। तस्य च तदितरावृत्तित्वविशिष्टसकलतद्वृत्तित्वरूपतया तत्त्वा स
म्भवो गौरवादत आह तादात्म्येनेति। अभेदेनेत्यर्थः। तथा च नोक्तदोष इति भावः। एतत्तत्त्वमभिहितं प्राक्। जात्योरि
तयोः पदयोरेफाकारसकारविसर्गघटितत्वाविशेषाद् इदंत्वविशिष्टोपस्थापकतावच्छेदकसेरत्व विशिष्टोपस्थाप
कजात्योरेकतरस्या एव सत्तायां विनिगमकाभावात् ततो विलक्षणार्थबोधानुपपत्तेरिति। त्यर्थः। वा शब्दस्य यस्मात्तर प
रत्वभ्रमं निराकरोति। वात्वर्थ इति। अवधारणाइत्यर्थः। भेद इति। तथा च तत्तद्वर्णानां तौल्ये यथा तु पूर्वावैलक्षण्येन रसत्वा
विशिष्टोपस्थापकतावच्छेदकजातेर्निरूकाव्यवहितोत्तरत्वसंबन्धेन रावविशिष्टसत्त्वादिरूपानुपूर्व्या एव व्यञ्जक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· त्यात्तदभावेनन सरः यदाद्रुसत्त्वविशिष्टबोधापत्तिरेव मन्यत्रापीति भावः । मूलेतारमन्द्रवदित्यत्र तारमन्द्रशब्दौ धर्मप
३०५ रौ· तथा च यथा वर्णानां नित्यैकत्त्वमते विजातीयवाय्वतात्वाद्यभिघातसत्त्वे तारत्वादिना भेदप्रतीतिस्तद्वदित्यर्थः । व
र्णजातिस्फोटमभिप्रेत्य शङ्कते सारेनन्विति । जातेरिति । तदभिव्यञ्जकवर्णसत्त्वादिति भावः । योगार्थतयेति । स्फुटत्व
थौ॰ स्मादिति व्युत्पत्त्यावयवव्युत्पत्त्येत्यर्थः । एतेनेति । तत्पदघटकयावद्वर्णाभिव्यक्तजातेर्वाचकत्वाङ्गीकारेणे
त्यर्थः । सर्वदा । यदाश्रयणेपि । परास्तमिति । जातेः सनातनत्वेप्युक्तस्थले व्यञ्जकासमवधानात्तदभिव्यक्त्यभावेना॰ 308
वोधस्यापादयितुमशक्यत्वादिति भावः । ननु वर्णजातिस्फोटपक्षे पदघटकयावद्वर्णगतजातीनामेवार्थवाधक एस:
त्वदपितुमशक्यत्वादिति भावः । ननु वर्णजातिस्फोटपक्षे पदघटकयावद्वर्णगतजातीनामेवार्थवोधकत्वमुपगतव्यम् ३०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वन्यवर्णगतजातेरन्यवर्णानभिव्यञ्जकत्वात्तत्तद्वर्णस्यैवाभिव्यञ्जकोवाच्यस्तथा चोक्तदोषस्तदवस्थएवेत्यतआ
ह। अयंभाव इति। उक्तदोषइति। तथा चतुष्टत्वासमयस्तोनाश्रयणीयइतिभावः। तत्रेतियद्देवाकेचनतस्याः। व्यासज्य
वृत्तित्वस्येति। पर्य्याप्त्याख्याविलक्षणसंबन्धेनवृत्तित्वस्येत्यर्थः। ननुजातेःसमवेतत्वस्यैवसार्वत्रिकत्वात्कथंसे
त्याः पर्य्याप्तत्वमतआह। धर्मियत्किंचनेति। धर्मवती। जातिमत्सुग्राहकेमानंपदत्वस्यवाक्यत्वव्यावर्त्तकत्वानुपपत्तिस्त १८
त्तिरुक्त्वादित्यर्थः। प्रत्येकवर्णविश्रान्तजातेर्वाचकत्वस्योक्तद्वयएकवलितत्वेनासम्भवाद्वाचकत्वानुपपत्त्याक
ल्प्यमानापदत्वादिजातिर्यदिपुनः। प्रत्येकविश्रान्तास्यात्तदातत्सिद्धिरेवनस्याद्वाचकत्वानुपपत्तेरपरिहारादत
स्तत्साधकमेवतत्पर्य्याप्तत्वसाधकमेवंचानेकव्यक्त्यभिव्यङ्ग्येत्यस्यानेकव्यक्तिपर्य्याप्तेत्यर्थइतिभावः। वस्तुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या·द गुणपदिप्रत्येकवर्णोघट इति सर्वसिद्धप्रतीत्या व्यवहारेणावसिध्यतु घटत्वादेः प्रत्येकमात्रवृत्तित्वम्। नह्येकवर्णो
३०६ घटपदादिव्यवहारो येन पदत्वादेः प्रत्येकवृत्तिता स्यात् किन्तु परशब्दः पदं न यकार इति वैपरीत्यमिति तादृशजातेः
पर्याप्तत्वमाकाशकस्य पदत्वं न पर्याप्तं जातित्वादित्यनुमानं त्वप्रयोजकमनुकूलतर्काभावादिति विभावनीयम्।
इदं च निरिहावधेयम्। अनेकवर्णत्वाभिव्यङ्ग्यत्वस्यापि पूर्ववत् किन्नवर्णाभिव्यङ्ग्येत्यर्थः। नातः सरोरस इत्यादाव
र्थभेदबाधानुपपत्तिः। एवं च पूर्वोक्तार्थस्यैवायं प्रपञ्चः। आनुपूर्वी वर्णयोर्विशेषविशेष्यभावव्यत्यासः पौर्वा ३०
तिरिच्यते। अत एवाग्रिमग्रन्थसङ्गतिरिति। यदुच्यते ऽन्त्ये तिष्ठत्यन्त्या व्यक्तिपदार्थो वर्णा इत्यभिप्रेत्याह ध्व राम:
निवर्णयोरिति। वर्णानां ध्वनिनैव यन्मादभेदोपचारो ऽत एवपरस्य सायामध्यगौरवमित्यत्रत्यकः। शब्द इति श ३०६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्ने लोकेऽर्थबोधकत्वे नदृष्टातो ध्वनिर्वर्णात्मकः समूह इत्यर्थकः अथवा प्रतीतपदार्थको ध्वनिः शब्द इत्युक्तोभि
तिभावः शेषार्थ इति प्रतकारिको नरार्थ इत्यर्थः। वर्णेषु ध्वनिर्व्यक्तो स्फोटमिति माह। उक्तं हीति। काव्यप्रकाशे इति
इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथित इति तन्निव्याख्यावसर इति शेषः। स्फोटव्यञ्जकेति। स्फोट
रूपं तद्व्यञ्जकेति व्यञ्जकवर्णात्मकशब्दस्येत्यर्थः। वक्तृत्वेनावक्ताप्रबन्धे नपदत्वादेर्जातित्वस्य तद्वाचकत्वस्य च व्यव
स्थापनम् फलम्। पुरुषार्थानुपयोगित्वादित्याशङ्का समाधानपरतया मूलमवतारयति ननु कासेति। स्वा
वाचकत्वेनाभिमता जातिकेति योजना। सत्यांश इति। सत्त्वं कालत्रयाबाध्यत्वम्। तद्विपरीतमसत्यत्वम्।
पर्यवसितार्थमाह। तत्तद्व्यक्तीति। तद्व्यक्त्युपलक्षितमित्यर्थः। परमार्थब्रह्मणा व्यक्तीनां वैशिष्ट्यासंभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्या॰द॰ वात्। अत एव जगत्कर्तृत्वादीनां तदुपलक्षणमामनन्तीति बोध्यम्। जातिरिति व्यवहारविषय इत्यर्थः। उप
३०७ न्योपाधीति। व्यक्तीनामुपाधित्वं च वस्तुत एकस्या अपि जातेर्नानाप्रतीतिजनकत्वम्। तदवच्छिन्नं तदुपलक्षित
मित्यर्थः। द्रव्यशब्देति। गवादिशब्द इत्यर्थः। गुणक्रियाशब्दानां जात्यवाचकत्वादेवाद्रव्यात्मकोयः शब्दस
द्भाव्यमित्यर्थः। मीमांसके॥ शब्दस्य द्रव्यत्वोपगमात्। शब्दस्वरूपतयेति। श्रुत्यानाकशब्दरूपतया इत्यर्थः
वेद्ब्रह्मणी वेदितव्ये इति श्रुतेः। अयमाशयः। तस्मादेतस्माद्वात्मन आकाशः संभूत इत्यादिनेति। एकश्रु
तौ ब्रह्मणो जगदुपादानत्वश्रवणादुपादेयस्य चोपादानाभिन्नत्वस्य लोकप्रसिद्धत्वान्नामार्थयोरपि स्वा॰ एमः
भिन्नोपादानाभिन्नत्वेन परस्पराभिन्नत्वे तु स्थिते पृथक्प्रतीयमानं जगतो नेह नानास्तीति श्रुत्या वाधेद्दृढे॰ ३०७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधितार्थप्रतीतेरधिष्ठानसत्तैकनियम्यत्वेनावशिष्यमाणब्रह्मणः सद्रूपस्य साक्षाऽज्ञानानुमग्राकतयोपल
क्षणीभूतरूपनामनिरूपणद्वारेण तज्ज्ञाने शास्त्रस्योपयोग इति। कथमिति संगच्छतामित्यनेनान्वितम्
एवं परविरोधादिति भावः। मिथ्याज्ञानरूपायाः तज्जन्यसंस्काररूपाया वाजाजित्वासंभवादाह। विघ्न
इति। अविघटकल्पितइत्यर्थः। धर्मविशेष इति। आवृत्तिवारणाय धर्मेति। तद्व्यक्तित्वादिवारणाय वि
शेषेति। यस्मान्तरमिति। तथा च मतभेदेनार्थद्वयस्याप्याकरस्थितत्वान्न पूर्वापरविरोध इति भावः। व
स्तुतस्तु गवाद्युपाध्यवच्छिन्नसत्तात्वमेव गोत्वादिव्यवहारनियामकमद्वैतदर्शने च गवादेरवच्छे
दकस्याभावान्न सत्तायां विशिष्टसत्तात्वं वदतां निर्धर्मत्वैनेनावस्थानादित्यर्थः परस्य यापि विरोधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. रुपरिहर इति बोध्यम्। यद्यप्यविशेषेण वाक्यविषये ऽखण्डवाक्यतज्जातिरूपस्फोटद्वयमुक्तम्। तथापि त-
३०८ दात्मकस्फोटकल्पे शास्त्रस्य पुरुषार्थपरम्परयोपयोगित्वमनित्यकल्पे तु साक्षादेवेति तस्यैव मुख्यत्व-
मित्याशयेनामूलमवतारणीयमेवेति। पूर्वोक्तप्रकारेण। अध्यस्तवाचकत्वेभ्यः प्रकृत्यादिभ्यः पृथक्कृ-
यमाणम्। अत एव निरञ्जनम्। उपाधिविनिर्मुक्तम्। अत एवाक्षरमविनाशि। यः स सर्वेषु भूतेषु नश्यत्सु न वि-
नश्यतीति स्मृतेः। सोपाधिकस्यैव विनाशप्रतियोगित्वात्। शब्दतत्त्वम्। शब्द पदमुरूस्याप्युपलक्षणम्। तेन 308
नामरूपोपादानं यत्तत्। ब्रह्मैवेति विशेषणसङ्गतेवकारेण ब्रह्मतादात्म्याभावरूपविशेषणयोगव्यव- रामः
च्छेदः शब्दतत्त्वरूपान्वयितावच्छेदकत्वं बोध्यते। आहुः। प्रकर्षेणाकपतिब्रह्माभेदेन जानन्तीति यावत् ३०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतितदर्थः। तत्रशब्दोपादानत्वस्यतत्त्वान्तरेगगने प्रसिद्धेः। कथंब्रह्मणस्तदुपादानत्वमित्याशङ्कायामाह
अयमर्थइत्यादिः। नामरूपे इति। अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतिसिद्धेत्यर्थः
द्वयीति। नामरूपात्मकव्यवपवसमूहरूपेत्यर्थः। तत्रप्रसिद्धद्वयमध्य·रूपस्येवेति। आकाशाद्यात्मकार्थस्ये
वेत्यर्थः। नाम्नइति। नवाचकशब्दस्यापीत्यर्थः। तदेव। ब्रह्मैव। तत्त्वमुपपादानमित्यर्थः। तस्मादेतस्माद्वा आत्म
नइत्यादिश्रुतेः। शब्दतन्मात्रकाकाशोपादानत्वेपर्य्यवसानाद्वयोरप्युपादानंब्रह्मैव। अतएवेतयोःपर
स्परमभेदेशिद्धिः। स्वोपादानब्रह्माभिन्नत्वा। नचब्रह्मणोजगदुपादानत्वेविकारित्वापत्तिः। जगदेत।
द्विवर्त्तइति वेदान्तसूत्रकर्तैवसमाहितत्वात्। तथाचव्यावहारिकप्रातिभासिकपदार्थनिरासेनश्रुत्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल.द. ब्रह्मैवपरिशेषीक्रियत इतिप्रागुक्तस्यार्थः। ननुनानात्वस्यसर्वथैवमिथ्यात्वेकथंतत्प्रत्ययोलोकानामतत्राह
३०९ प्रक्रियांशास्त्वितिः। प्रकृतिप्रत्ययपंचकोशादिव्यवहारशास्त्वित्यर्थः। आविद्येति। मलिनसत्वाज्ञानविलास
एवेत्यर्थः। तथाचब्रह्मातिरिक्तत्वेनासततामपितेषांपार्थक्येनप्रतीतिरभिष्टानाज्ञानकृतैवेतिनयावदधि
ष्टानाज्ञानंतन्निवृत्तिरितिभावः। यद्वाननुतादृशब्रह्मज्ञानेकथंशास्त्रप्रमाणानामुपयोगोऽतआह। प्रक्रियांश
इति। प्रकृतिप्रत्ययादिव्युत्पादनंत्वित्यर्थः। अविद्येति। तथाचपञ्चकोशादिन्यायेनशास्त्राणामुपयोगो
ननुतज्ज्ञानेसाक्षादुपयोगइतिभावः। अविद्येवोपायवर्ण्यतइतिवाक्यस्यदीयानन्तरमुपायाः। शिक्ष्यमाणाना 309 रामः
बालानामुपलालनाः। असत्यवर्त्मनिस्थित्वाततःसत्यंसमीहतेइतिश्लोकः। समारम्भानुभावानामि ३०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यस्य पूर्वार्द्धं तु घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयत इति। तदर्थस्तु यथा घटादिकं दृष्ट्वा लोको विश्वप्रपञ्चः प
रिच्छिन्नः किञ्चिन्निष्टकारणतानिरूपककार्यं तावत्त्वेनानुमीयते। एवं भावानामाकाशादीनाम्। समार
म्भादिति। समारम्भो जननं यस्मात्। भावप्रधानश्चायं निर्देशः। तदुत्पत्तिहेतुत्वादित्यक्षरार्थः। भावोपा
दानत्वादिति यावत्। तादात्म्येन वा हेतुः समारम्भादिति। शाश्वतं नित्यमपि ब्रह्म आदिमत्सकारणकमि
व। अवसीयत इत्यभ्युपगम्यते। परिणाम्युपादानत्वे तस्मिन्नभ्युपगम्यमाने विकारित्वप्रसङ्गः। शङ्का वस्तुतो
न तत्त्वसत्कि विवर्त्तोपादानताया एवाङ्गीकारात् रज्ज्वादेः प्रातिभासिकभुजङ्गस्येवेति भावः। अनादि
ब्रह्म शाश्वतमिति पाठस्त्वन्यतरविशेषणोपादानवैयर्थ्यापत्त्यानादरणीयः। ननु नादेरपि ब्रह्मव्यपदेशस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल·द· प्रायशो दर्शनात्तु रूप्यार्थानुपयोगितद्भेदज्ञानस्याद्‌नवेयर्थ्यमत आह। ब्रह्मैवेतिइति। तथा च प्रकृते ब्र॰

३१० स्वपदस्य प्रकाशरूपब्रह्मपरत्वान्नोक्तानुपपत्तिरितिभावः। तमेव भान्तमित्यस्य। न तत्र सूर्यो भाति न चन्द्र

तारकं नेमा विद्युतो भान्ति कुतोयमग्निरिति श्वेताश्वः। श्रुतौ तूपलक्षणं यदादित्यगतं तेजो जगद्भासय

तेऽखिलमित्यादिस्मृतेरपि। स्वपरप्रकाशत्वमिति। तत्र परप्रकाशकत्वे मानमुक्तम्। स्वप्रकाशकत्वे

च स्व। अन्याप्रकाश्यत्वे सति प्रकाश्यत्वं स्वात्मकं नित्यज्ञानमिति यावत्। नित्यं विज्ञानमानन्दं ब्रह्मे 310

तिश्रुतौ ब्रह्मणो नित्यज्ञानानन्दस्वरूपत्वप्रतिपादनात्। प्रकृ(त)श्रुतिः स्वयमेवात्मनात्मानमात्मना वेत्थ त्वं एम॰

उरुषोत्तमेतिस्म(ृ)तिश्च माप्रकाशकत्वे पराप्रकाश्यत्वे च न तद्भासयते सूर्य इत्यादिस्मृतिश्च मानमधिकं ३१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्यत्रानुसन्धेयम्। स्तवयतीति। स्फोटस्वप्रकाशपदयोः पर्यायत्वं बोधयतीत्यर्थः। तथा च जातिस्फोट-
वादिमते उपाधिनिरासद्वारा शुद्धब्रह्मणः स्वप्रकाशरूपेण पुरुषार्थोपयोगिनि ज्ञाने व्याकरणस्योपयोग इति
सिद्धम्। नादस्फोटवादिमते यथोपयोगस्तथा यथादितं प्राक् निर्विघ्नेति। अप्रतिबद्धस्वग्रन्थप्रचा-
रार्थमित्यर्थः। अन्ते। ग्रन्थावसाने। मङ्गलमिति। नत्यात्मकं तदित्यर्थः। मङ्गलान्तानि मङ्गलमध्यानि
च शास्त्राणि प्रथन्त इति भाष्यकारोक्तश्रुतेरिति भावः। पूर्णत्वमखण्डानन्दत्वम्। अप्रतिहतेच्छत्वं
वा। तेन रूपेण तन्नतिश्च स्वीयग्रन्थप्रचारेच्छाविषयसिद्ध इति बोध्यम्॥ ॥ज्ञात्वार्थी फणिभाष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल॰द॰ जालमतुलं नैयैपि कोक्तिरपि मीमांसानयमाकल्पयप्यवमन्यासम्यक्कृते दर्प्यगो॰। अस्मिन्भूवण्णसा
३०१ रतांवुधजनः सोत्कराढमाल्लोकतां यन्निरवासमल्लीमसोनष्टुकरस्तत्वार्थवोधक्षमः॥ १॥ असील्कर
मरिगौधरासुरवरः। श्रीवल्लभः कोविदो वेदान्तेष्वविनोमञ्जरितिरव्याताक्तियन्निर्मितिः। तत्स्तु
हरि पद्मभः समकोत्सद्युक्तिभरणज्ज्वलं श्रीमद्भरणसारदर्पण मिमम्मोदायविद्यावताम्॰। उ
त्प्रेक्षितार्थौ हि न मोऽहे तवेध्यतो भूशंसो पिवुधांतथैव। इत्याकलय्याभयमन्त्रशक्तिप्रमाण सिद्धं एमः
समुत्सूत्र तन्मया। असर्वोपयोवुधैः स्पृष्टोपदयीहतया। पि मे॰। तस्मेदर्भांशोतिमिततामसमताकेनवार्प्य ३०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते ॥ ४ ॥ ॥ इति श्रीमत्कूर्माचलाभिजनोत्पन्नभानीयोपनामकश्रीवल्लभात्मजहरिवल्लभविरचितभूषणसारदर्पणे स्फोटवादसमाप्तः ॥ छ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ ॥ पुस्तक मर्य्यदासस्य मम दोषो न दीयतां ॥ १ ॥ स्वस्ति श्री सम्वत् १९१६ मासे १ तिथौ १० गुरुवासरे ॥ लिखितमिदं पुस्तं वासुदेवपाडेन भूयात् ॥ ॥

ग्रन्थसंख्या ५६१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu